BHAVAN'S LIBRARY

This book is valuable and
NOT to be ISSUED
out of the Library
without Special Permission

मदनपालनिघण्टुः ।

्न्मदनपाल नृपतिना विरचितः ।

पण्डितकुलपति
ानन्द विद्यासागर भट्टाचार्य्यात्मजेन
ित श्रीआशुबोध विद्याभूषण भट्टाचार्य्येण
तथा
ण्डित श्रीनित्यबोध विद्यारत्न भट्टाचार्य्येण
परिवर्द्धित, परिवर्त्तित, संस्कृत संशोधित
प्रकाशितश्च ।

तृतीय संस्करणम् ।

कलिकातानगर्य्याम्
एम्, ग्रन्थ श्रीदक्षिणाचरण चक्रवर्त्तिना
मुद्रित ।

१८०२ ।

28445
LIBRARY.

अथ मदनपालनिघण्टौ वर्गानुक्रमेण

सूचीपत्रम्।

विषयाः	पृष्ठाङ्काः।	विषयाः	पृष्ठाङ्काः।
मङ्गलाचरणम्	१	इन्द्रियवर्गी	७
ग्रन्थप्रस्तावना	„	वृहती	„
अथ अभयादिवर्गः।		कण्टकारी	„
		लघुपञ्चमूलम्	„
हरीतकी	२	दशमूलम्	„
आमलकम्	३	ऋद्धिः-वृद्धिः	८
विभीतकः	„	काकोलीद्वयम्	„
त्रिफला	४	मेदाद्वयम्	„
भूधात्री	„	जीवकर्षभकौ	„
माषोनामलकी	„	अष्टवर्गः	„
वासकः (अटरूषः)	„	जीवन्ती	८
गुडूची	„	मधुयष्टी	„
विल्वः	५	माषपर्णी मुद्गपर्णी	„
अग्निमन्थः	„	जीवनीयगणः	„
पाटला	„	एरण्डद्वयम्	„
काश्मरी	„	शारिवाद्वयम्	१०
श्योनाकः	६	यवास धन्वयास	„
महत्पञ्चमूलम्	„	शुण्ठी	„
गोक्षुरः	„	महाशुण्ठी	११
शालपर्णी	„	अपामार्गद्वयम्	„

विषयाः	पृष्ठाङ्काः ।	विषयाः	पृष्ठाङ्काः ।
काम्पिल्यः	११	प्रसारणी	१८
दन्तीद्वयम्	,,	शतावरीद्वयम्	,,
जयपालः	१२	बलाचतुष्टयः	,,
चिवृत्द्वयम्	,,	ज्योतिष्मतीद्वयम्	१८
इन्द्रवारुणीद्वयम्	,,	देवदारु	,,
आरग्वधः	,,	सरलः	,,
नीलिनी	१३	पुष्करमूलम्	२०
कटुकी	,,	कुष्ठम्	,,
अङ्कोलकः	,,	कर्कटशृङ्गी	,,
सेहुण्ड	१४	कट्फलम्	,,
निम्बद्वयम्	,,	रोहिषम्	,,
किराततिक्तः	,,	भार्गी	२१
कुटज	१५	पाषाणभेदः	,,
इन्द्रयव	,,	मुस्तम्	,,
मदनः	,,	धातकी	,,
कटुष्ठम्	,,	माचिका	,,
हेमाह्वा	,,	विदारीकन्दद्वयम्	२२
सातला	१६	वाराहीकन्दः	,,
अपमत्त	,,	पाठा	,,
कारानारः	,,	मोरटी	,,
निर्गुण्डीद्वयम्	,,	मञ्जिष्ठा	,,
मेषशृङ्गी	१७	हरिद्रा	२३
पुनर्नवाद्वयम्	,,	दारुहरिद्रा	,,
रास्ना	,,	मधुवाटः	,,
अश्वगन्धा	,,	वाकुची	,,

विषयाः	पृष्ठाङ्काः ।	विषयाः	पृष्ठाङ्काः ।
भृङ्गराजः	२४	घरपोटा	२८
पर्पटः	,,	द्रोणपुष्पी	२९
त्रायमाणा	,,	ब्राह्मी-मण्डूकपर्णी	,,
महाजालिनिका	,,	सुवर्चलाद्वयम्	,,
अतिविषाचतुष्टयम्	२५	मत्स्याक्षी	,,
काकमाची	,,	जलपिप्पली	,,
काकजङ्घा	,,	गोजिह्वा	,,
लोध्रद्वयम्	,,	नागदमनी	३०
सुरदारुद्वयम्	२६	गुञ्जाद्वयम्	,,
देवदाली	,,	वेल्लन्तरः	,,
हंसपादी	,,	वन्दाकः	,,
सोमवल्ली	,,	पिण्डारः	,,
आकाशवल्ली	,,	छिक्किका	,,
शाकुली	,,	रोहितः	,,
वटपत्री	२७	मोचरसः	३१
मज्जालुः	,,	अजगन्धा	,,
सुपर्णी	,,	मौरियकः	,,
कपिकच्छुः	,,	स्यन्दाद्वयम्	,,
पुत्रजीवः	,,	इक्षुरः	,,
वन्ध्याकर्कोटकी	,,	कार्पासः	३२
विष्णुक्रान्ता	२८	आरामशीतला	,,
शङ्खपुष्पी	,,	कुक्कुरद्रुः	,,
दुग्धिका	,,	शमी	,,
अर्कपुष्पी	,,	शरपुङ्खा	,,
भल्लातकः	,,	धमासोटा	,,

विषयाः	पृष्ठाङ्काः।
सुदर्शना	३२
मयूरशिखा	,,
लक्ष्मणा	३३
मांसरोहिणी	,,
अस्थिसंहारकः	,,
अर्कद्वयम्	,,
करवीरद्वयम्	,,
धत्तूरः	,,
कलिकारी	३४
कुमारी	,,
भङ्गा	,,
काञ्चनी	,,
दूर्वाद्वयम्	,,
गण्डदूर्वा	३५
काशः	,,
कुशः	,,
मुञ्जः	,,
नलः	,,
वंशः	,,
जवानी	,,
खसतिलः	३६
अहिफेनः	,,
क्षिलिङ्गिष्टः	,,

विषयाः	पृष्ठाङ्काः।
अथ शुण्ठ्यादिवर्गः।	
शुण्ठी	३६
आर्द्रकम्	३७
मरिचम्	,,
पिप्पली	,,
त्र्यूषण चतुरूषणम्	३८
पिप्पलीमूलम्	,,
चव्यम्	,,
चित्रकः	,,
पञ्चकोल-षडूषणम्	३८
शतपुष्पाद्वयम्	,,
मिश्रेया	,,
वनमेथी	,,
अजमोदा	,,
जीरकत्रितयम्	,,
यवानीद्वयम्	४०
अजगन्धा	,,
वचा	,,
हपुषा	,,
विडङ्गम्	४१
धान्याकम्	,,
हिङ्गुपत्रीद्वयम्	,,
हिङ्गुकम्	,,
वंशलोचना	४२

विषयाः	पृष्ठाङ्काः।	विषयाः	पृष्ठाङ्काः।
सैन्धवम्	४२	एलाद्वयम्	४६
सौवर्चलम्	,,	गुड़त्वचम्	४७
विड़म्	,,	तेजपत्रम्	,,
सामुद्रम्	,,	नागकेशरम्	,,
औद्भिदम्	,,	त्रिजात-चतुर्जातम्	,,
गण्डाख्यम्	,,	तालीशपत्रम्	,,
क्षारम्	४३	सरलः	,,
काचलवणम्	,,	श्रीवासः	,,
यवक्षार स्वर्जिकाक्षारः	,,	बालकम्	४८
टङ्कणः	,,	जटामांसीद्वयम्	,,
सुधाक्षारः	,,	उशीरम्	,,
सर्वक्षारः	,,	रेणुका	,,
अथ कर्पूरादिवर्गः।		प्रियङ्गुः	,,
		परिपेलम्	,,
कर्पूरः	४४	शैलेयम्	,,
कस्तूरिकाद्वयम्	,,	लामज्जकम्	४९
मार्जारी	,,	कुन्दुरुः	,,
चन्दनचतुष्टयम्	४५	गुग्गुलुः	,,
कुङ्कुमम्	,,	राला	,,
सिह्लकः	,,	स्थौणेयम्	,,
एलवालुकम्	४६	चोरकः	५०
जातीफलम्	,,	मुरा	,,
जातीपत्री	,,	कर्चूरः	,,
लवङ्गम्	,,	शटी	,,
कङ्कोलम्	,,	स्पृक्का	,,

विषयाः	पृष्ठाङ्काः ।
ग्रन्थिपर्णः	५०
नलिका	,,
पद्मकम्	,,
प्रपौण्डरीकम्	५१
तगरद्वयम्	,,
गोरोचना	,,
नखद्वयम्	,,
पत्तङ्गम्	,,
लाक्षाऽलक्तकः	,,
पर्पटी	५२
पद्मिनी कैरविणी	,,
पद्मचारिणी	,,
कमलम्	,,
रक्तोत्पलम्	,,
नीलोत्पलम्	,,
कुमुदम्	,,
कह्लारम्	५३
किञ्जल्कः	,,
पद्मबीजम्	,,
मृणाल शालूकम्	,,
जातीद्वयम्	,,
मल्लिका	,,
यूथिकाद्वयम्	५४
कुब्जकाद्वयम्	,,
केतकीद्वयम्	,,

विषयाः	पृष्ठाङ्काः ।
वासन्ती	५४
नैपालीद्वयम्	,,
माधवी	,,
चम्पकः	५५
पुन्नागः	,,
वकुलः	,,
कुब्जः	,,
कुन्दः	,,
मुचुकुन्दः	,,
विचच्छिन्नः	,,
तिलकः	,,
गणिकः	५६
बन्धूकः	,,
जपा-त्रिसन्ध्या	,,
सिन्दूरी	,,
तुलसी	,,
मरुवकः	,,
दमनः	,,
बर्बरीत्रयम्	,,
अथ सुवर्णादिवर्गः ।	
सुवर्णम्	५७
रूप्यकम्	,,
ताम्रम्	५८
कांस्यम्	,,
पीतलौहम्	,,

विषया:	पृष्ठाङ्का	विषया	पृष्ठाङ्का ।
रङ्गम्	५८	सूर्यकान्त	६२
यशदम्	„	चन्द्रकान्त	६३
सीसम्	„	गोमेदम्	„
लोहम्	५९	हीरकम्	„
पारद	„	नील वैदूर्य्यम्	„
अभ्रकम्	„	मरकतम्	„
गन्धक	„	मुक्तास्फोट	„
सुवर्णमाचिकम्	„	शङ्ख	„
मन:शिला	६०	लघुशङ्ख कपर्द्दक	„
हरितालम्	„	खटोद्वयम्	६४
गैरिकम्	„	पङ्क बालुका	„
तुत्यद्वयम्	„	चुम्बक	„
कासीसद्वयम्	„	काच	„
हिङ्गुलम्	६१	**अथ वटादिवर्ग: ।**	
सिन्दुरम्	„	वट	६५
सौवीर स्रोतोऽञ्जनम्	„	पिप्पल	„
रसाञ्जनम्	„	पारिश	„
पुष्पाञ्जनम्	„	उदुम्बर	„
शिलाजतु	„	प्लच	„
वोलद्वयम्	६२	पचक्षीरवृच	„
स्फटिकाख्या तुवरी	„	नन्दीवृच	६६
समुद्रफेन	„	कदम्बद्वयम्	„
प्रवालम्	„	ककुभ	„
मौक्तिकम्	„	शिरीष	„
माणिक्यम्	„	आर्त्तगल	„

विषयाः	पृष्ठाङ्काः	विषयाः	पृष्ठाङ्काः ।
सेतरुद्वयम्	६६	शाल्मली	७१
इज्जलः	६७	तूणिः	"
श्लेषान्तकः	"	सप्तपर्णः	"
पीलुः	"	हारिद्रकः	"
शाकः	"	करञ्जचतुष्टयम्	"
सालः	"	शमीद्वयम्	७२
तमालः	६८	टिण्टिनिका	"
खदिरद्वयम्	"	अरिष्टकः	"
इरिमेदः	"	शिंशपाद्वयम्	"
बर्बूरः	"	अगस्त्यः	"
बीजकः	"		
तिनिशः	"		

अथ द्राक्षादिवर्गः ।

विषयाः	पृष्ठाङ्काः	विषयाः	पृष्ठाङ्काः
भूर्जपत्रम्	६९	द्राक्षा	७३
पलाशः	"	आम्रः	"
धवः	"	जम्बूत्रयम्	७४
धन्वनः	"	नारिकेलः	"
सर्जः	"	खर्जूरिका	"
आखोटः	"	सुलेमानी	७५
वरुणः	"	कदली	"
जिङ्गिनी	७०	दाडिमी	"
गम्भारी	"	कतकः	"
इङ्गुदः	"	बदरी	"
कटभरः	"	क्षीरी	७६
मुष्ककः	"	चारः	"
पारिभद्रः	"	परूषकः	"

विषया:	पृष्ठाङ्का ।	विषया:	पृष्ठाङ्का: ।
तिन्दुकद्वयम्	७६	जम्बीरम्	८१
किङ्किणी	७७	अम्लवेतसम्	,,
आरुकम्	,,	साराम्लक:	,,
मधूकद्वयम्	,,	निम्बूकम्	,,
पनस	,,	कर्मरङ्गम्	८२
लकुच	७८	अम्लिका	,,
ताल	,,	तिन्तिडीकम्	,,
खर्बूजम्	,,	करमर्द्दम्	,,
स्यन्दनकम्	,,	कपित्थम्	,,
मेवम्	,,	कपित्थपर्णी	,,
अभ्र फलम्	,,	आम्रातकम्	,,
अमृतफलम्	७९	राजाम्र	८३
वादामम्	,,	पञ्चाम्लम्	,,
पिस्तद्वयम्	,,	कोशाम्र:	,,
एला	,,	पूगीफलम्	,,
आलुकम्	,,	ताम्बूलम्	८४
अञ्जीरम्	,,	लवलीफलम्	,,
आखोटम्	,,	**अथ कुष्माण्डादिवर्ग: ।**	
पालेवतद्वयम्	८०		
तूतम्	,	शाकनिरूपणम्	८५
गङ्गेरुकम्	,,	कुष्माण्डको	,,
तुम्बरम्	,,	कर्कटी	,,
वीजपूरम्	,,	कालिङ्गम्	८६
मधुकर्कटी	८१	मिष्टतुम्बी	,,
नारङ्गद्वयम्	,,	कटुतुम्बी	,,

विषया	पृष्ठाङ्का ।	विषया	पृष्ठाङ्का ।
त्रपुषम्	८६	सूक्ष्मपत्र	८१
निर्भटम्	„	टुटुका	„
वालुकम्	„	वस्तिज	„
शीर्षवृन्तम्	„	शीतवार नाडी	„
कोशातकीद्वयम्	८७	सार्षप कौसुम्भम्	„
हल्लाकीद्वयम्	„	चणकम्	„
विम्बी	„	कलायम	„
कारवेल्लम्	८८	चाङ्गेरी	„
कर्कोटकीद्वयम्	,	कासमर्द गञ्जन	८२
डोडिका	„	मूलकम्	„
डिण्डिश	„	करीर	,
कोलशिम्बी	„	शोभाञ्जनद्वयम्	„
कुशिम्बी	,	लशुनद्वयम्	८३
वास्तुक	„	पलाण्डु	„
जीवन्त	८८	शूरणद्वयम्	„
चिल्ली	„	अस्थिशृङ्खलिका	„
कालशाकद्वयम्	,	वाराही	८४
तण्डुलीयद्वयम्	„	मुसली	„
मोग	,	कच्चुका	„
पटोल	„	भूच्छत्रम्	„
चञ्चुद्वयम्	८०	स्थूलकन्द मानकन्द	„
पालक्या	„	कसेरुद्वय शृङ्गाट	„
पोतकी	,	पिण्डालुकादि	„
लोणी कुटोर	,	केयूरम्	८५
सुनिषण्ण तिलपर्णी	,		

विषयाः	पृष्ठाङ्काः।
अथ पानीयादिवर्गः।	
पानीयनामानि	९५
साधारण दुग्धनामानि	९९
गोदुग्धम्	१००
अजादुग्धम्	"
आविकदुग्धम्	"
महिषीदुग्धम्	"
नारीदुग्धम्	"
हस्तिनीदुग्धम्	"
औष्ट्रदुग्धम्	१०१
आश्वदुग्धम्	"
दधिनाम	१०२
तक्रवर्गः	१०४
नवनीतवर्गः	१०५
घृतम्	"
तिलतैलम्	१०६
एरण्डतैलम्	"
कटुतैलम्	"
निम्बतैलम्	१०७
अतसीतैलम्	"
सार्षपतैलम्	"
कुसुम्भतैलम्	"
ज्योतिष्मतीतैलम्	"
नारिकेलतैलम्	"

विषयाः	पृष्ठाङ्काः।
शिंशपातैलम्	१०७
भल्लातकतैलम्	"
पालाश-माधूक-पाटलातैलम्	१०८
त्रपुषादितैलम्	"
एकैषिजतैलम्	"
यवतिक्तोद्भवतैलम्	"
आम्रतैलम्	"
स्नेहवर्गः	"
मद्यम्	१०९
काञ्जिकम्	११२
मूत्रगुणाः	"
अश्वमूत्रम्	"
आजमूत्रम्	११३
आविकमूत्रम्	"
गर्दभमूत्रम्	"
उष्ट्रमूत्रम्	"
नरमूत्रादि	"
अथ इक्षुकादिवर्गः।	
इक्षुः	११३
इक्षुरसः	११४
मत्स्यण्डी	"
सितोपला	"
खण्डम्	"
मधुशर्करा	११५

विषया	पृष्ठाङ्का ।	विषया	पृष्ठाङ्का ।
मांसरस सौरम	१३६	गोकर्ण शम्बर	१४०
खानिष्कम्	,,	गवय	,,
कथितम्	१३७	कस्तूरी मुण्डिनी	,,
पर्पटा	,,	शतमालादि	१४१
पिण्याक	,,	रुरु न्यङ्कु	,,
पललम्	,,	मृग	,,
अथ मांसवर्गः ।		महामृग	,,
		शशक	,,
हस्ति	१३७	विडाल नकुल	,,
घोटक	१३८	वानर	१४२
अश्वतरी	,,	शृगाल	,,
उष्ट्रः	,	मूषक	,,
गर्द्दभ	,,	पक्षी	,
महिष	,,	तित्तिरि	,,
भल्लूक गण्डक	१३८	वर्त्तीक	,,
सिंह शार्दूल	,,	लावचतुष्टयम्	,,
व्याघ्र	,	चटक	१४३
चित्रक		वार्त्तिक	,,
वृक तरक्ष्वादि	,	पारावत कपोतादि	,,
कुक्कुर	,,	मयूर	,,
शूकर	,,	कुक्कुट	१४४
छागो	,	शुक	,,
मेष मेढ़ पुरुष	१४०	कोकिल	,,
हरिण	,,	काक भास	,,
एण	,,	ग्रध	,,

विषया	पृष्ठाङ्का	विषया	पृष्ठाङ्का ।
हंस	१४४	स्वभावतोहितानि	१५१
इक्ष्वाकु कङ्क	१४५	दन्तधावनगुणा	„
बक	„	मुखप्रक्षालनगुणा	„
आडि	„	पादप्रक्षालनगुणा	„
करेटु	„	गण्डूषगुणा	„
खञ्जरीट चाष	„	अञ्जनगुणा	१५२
चातक	„	व्यायामगुणा	„
भारद्वाज	„	मर्द्दन कर्त्तनगुणा	„
श्येन चिरि	१४६	अभ्यङ्गगुणा	„
उलूक	„	उद्वर्त्तनगुणा	१५३
चकोर	„	स्नानगुणा	„
क्रौञ्चादि	„	अनुलेपादिधारणगुणा	„
रोहितादि मत्स्य	„	उष्णीषधारणगुणा	१५४
क्षुद्रमत्स्य मत्स्याण्डम्	१४७	छत्रधारणगुणा	„
शिशुमार मकर	„	व्यजनधारणगुणा	„
कच्छप	„	यष्टिधारणगुणा	„
मण्डूक	१४८	अवस्थानगुणा	„
कर्कट	„	शय्यागुणा	„
सर्पभेदा	„	आतपच्छायासेवनगुणा	„
गोधा	„	अग्न्यादिसेवनगुणा	„
सद्योहतादिमासम्	„	ज्योत्स्नादिसेवनगुणा	१५५
अथ मिश्रवर्गः ।		प्रवातसेवनगुणा	„
		आयुष्यकर्माणि	„
अनुपानादि	१५०	स्वभावतो वर्जनीयानि	„
क्षुधापानम्	„	मद्यादि गुणा	„

विषयाः	पृष्ठाङ्काः
यवासशर्करा	११५
पुष्पसिताशर्करा	"
फाणितम्	"
मधूकम्	"
गुड़ः	"
मधु	"

अथ धान्यादिवर्गः ।

शाल्यादि	११७
गोधूमः	११८
यवः	"
शिम्बी	११९
मुद्गः	"
माषः	"
राजमाषः	१२०
मकुष्ठः	"
निष्पावः	"
सतीनः	"
कलायः	"
चणकः	"
मसूरिः	"
कुलत्थः	"
तिलः	१२१
तुम्बरी	"
धतसी	"

विषयाः	पृष्ठाङ्काः
कुसुम्भम्	१२१
सर्षपः	१२२
शणः	"
क्षुद्रधान्यम्	"
नीवारः	१२३
यवनालः	"
गवेधुका	"

अथ कृतान्नवर्गः ।

आहारनामानि	१२४
भक्तम्	"
यवागूः	"
विलेपी	१२५
पेया	"
मण्डः	"
वाट्यमण्ड-लाजमण्डः	"
अष्टगुणमण्डः	"
मुद्गयूषः	"
दाडिमामलकयूषः	"
मुद्गामलकयूषः	१२६
कुलत्थयूषः	"
मूलकयूषः	"
चणकयूषः	"
मकुष्ठयूषः	"
कृताकृतयूषः	"

विषया	पृष्ठाङ्का ।
मांसरस सौरस	१३६
खानिष्कम्	,,
क्वथितम्	१३७
पर्पटा	,,
पिण्याक	,,
पललम्	,,

अथ मांसवर्गः ।

हस्ति	१३७
घोटक	१३८
अश्वतरी	,,
उष्ट्रः	,,
गर्द्दभ	,,
महिष	,,
भल्लूक गण्डक	१३९
सिंह शार्दूल	,,
व्याघ्र	,,
चित्रक	,,
वृक तरक्ष्वादि	,,
कुक्कुर	,,
शूकर	,,
छागी	,,
मेष मेढ पुच्छ	१४०
हरिण	,,
एण	,,

विषया	पृष्ठाङ्का ।
गोकर्ण-शम्बरः	१४०
गवय	,,
कस्तूरी मुण्डिनी	,,
क्षतमालादि	१४१
रुरु न्यङ्कु	,,
शश	,,
महामृगः	,,
शल्लकः	,,
विडाल नकुल	,,
वानर	१४२
शृगाल	,,
मूषक	,,
पक्षी	,,
तित्तिरि	,,
वर्त्तीक.	,,
लावचतुष्टयम्	,,
चटक	१४३
वार्त्तिक	,,
पारावत कपोतादि	,,
मयूर	,,
कुक्कुट	१४४
शुक	,,
कोकिल	,,
काक भास	,,
गृध्रः	,,

विषया	पृष्ठाङ्का	विषया	पृष्ठाङ्का ।
हंस	१४४	स्वभावतोहितानि	१५१
चक्रवाक कङ्क	१४५	दन्तधावनगुणा	"
वक	"	मुखप्रक्षालनगुणा	"
घाडि	"	पादप्रक्षालनगुणा	"
करेटु	"	गण्डूषगुणा	"
खञ्जरीट चाष	"	अञ्जनगुणा	१५२
चातक	"	व्यायामगुणा	"
भारद्वाज	"	मर्द्दन कर्त्तनगुणा	"
श्येन चिरि	१४६	अभ्यङ्गगुणा	"
उलूक	"	उद्वर्त्तनगुणा	१५३
चकोर	"	स्नानगुणा	"
क्रौञ्चादि	"	अनुलेपादिधारणगुणा	"
रोहितादि मत्स्य	"	उष्णीषधारणगुणा	१५४
क्षुद्रमत्स्य मत्स्याण्डम्	१४७	छत्रधारणगुणा	"
शिशुमार मकर	"	व्यजनधारणगुणा	"
कच्छप	"	यष्टिधारणगुणा	"
मण्डूक	१४८	चङ्क्रमणगुणा	"
कर्कट	"	शय्यागुणा	"
सर्पभेदा	"	आतपच्छायासेवनगुणा	"
गोधा	"	अग्न्यादिसेवनगुणा	"
मद्योद्भृतादिमांसम्	"	ज्योत्स्नादिसेवनगुणा	१५५
		प्रवातसेवनगुणा	"
अथ मिश्रवर्गः ।		आयुष्यकर्माणि	"
अनुपानादि	१५०	स्वभावतो वर्जनीयानि	"
अनुपानम्	"	पवादि गुणा	"

विषयाः	पृष्ठाङ्काः।	विषयाः	पृष्ठाङ्काः।
लङ्घनगुणा	१५५	कषायरस गुणाः	१५७
पूर्वादिक्रमेण वायुगुणाः	„	वमन गुणा.	„
मधुररस गुणा	१५६	विरेचन गुणा	„
अम्लरस गुणा	„	वस्तिकर्मादि गुणाः	„
कटुरस गुणा	„	रक्तमोचण गुणा	„
तिक्तरस गुणा	„	ऋतुचर्य्या	१५८
लवणरस गुणा	१५७	ग्रन्थकृत् परिचय	१५८

सूचीपत्र सम्पूर्णम्।

सर्वौषधिनामगुणानाम्
निघण्टुः ।

मङ्गलाचरणम् ।

बीजं श्रुतीनां सदनं स्मृतीनां
जीवं जडानां महदादिकानाम् ।
आम्नेयमस्तं भवपारकाणां
किञ्चिन्महः श्याममनाश्रयामि ॥ १ ॥

लुब्धा कपोलमधुधारिमधुव्रताली
कुम्भस्थली मधुविभूषणलोहिताङ्गी ।
माणिक्यमौलिरिव राजति यस्य मौलौ
विघ्नं स धूनयतु विघ्नपतिः सदा नः ॥ २ ॥

यो ध्वान्तमन्तिगभीरपयोधिमध्या-
न्निष्काशयत्यशरणं भुवनं निमज्जत् ।
दत्त्वा जगत्त्रयहितः स्वकरावलम्बं
वाञ्छां स वो दिनकरः सफलीकरोतु ॥ ३ ॥

मिथ्यागमादिकृतदोषचये न कोपा-
मध्यस्युवर्द्धित उपद्रवनक्रभीमे ।
रोगाम्बुधौ भवजनस्य निमज्जतो यः
पोतः प्रयच्छतु शुभानि स काशिराजः ॥ ४ ॥

केचित्सन्ति निघण्टवोऽतिमहतः केचिन्नवान्ताः परे
केचिद् दुर्गमनामकाः कतिपये भाषाः स्वभावोज्झिताः ।
सम्यग्नातिलघुर्न चातिविपुलः ख्यातादिनाम्ना सतां
प्रीत्यै द्रव्यगुणाभिधोऽयमधुना यत्नो मया बध्यते ॥ ५ ॥

सर्वं कायेन संसाध्यं तस्यायुः स्थितिकारणम् ।
आयुर्वेदोपदेशस्तु कस्य न स्यात् फलावहः ॥ ६ ॥
तत्रापि पूर्वं ज्ञातव्या द्रव्यनामगुणागुणाः ।
अतस्त एव वक्ष्यन्ते तज्ज्ञाने हि क्रियाक्रमः ॥ ७ ॥

अथ हरीतकीनामगुणाः ।

हरस्य भवने जाता हरिता च स्वभावतः ।
हरयेत् सर्वरोगांश्च तेन प्रोक्ता हरीतकी ॥ ८ ॥
जीवन्ती पूतना पश्चादमृता विजयाभया ।
रोहिणी चेतकी सप्तभेदभिन्ना हरीतकी ॥ ९ ॥
जीवन्ती जीवनोद्योगात् पावनात् पूतनामृता ।
सुधावदमृता ज्ञेया विजया विजयप्रदा ॥ १० ॥
नृणामभयदा यस्मादभया तत् प्रकीर्त्तिता ।
रोहिणी तु गुणारोहाचेतनाचेतकी मता ॥ ११ ॥
जीवन्ती स्वर्णवर्णाभा पूतनास्थिमती मता ।
अमृता त्रिदला प्रोक्ता विजया तुम्बरूपिणी ॥ १२ ॥
पश्चाङ्गी त्वभया ज्ञेयामृता वृत्ता तु रोहिणी ।
त्र्यङ्गी तु चेतकी ज्ञेया कर्म्म तासामथोच्यते ॥ १३ ॥
सर्वरोगेषु जीवन्ती प्रलेपे पूतना हिता ।
शुद्धार्थममृता प्रोक्ता विजया सर्वरोगहृत् ॥ १४ ॥
अक्षिरोगेऽभया शस्ता रोहिणी व्रणरोहिणी ।
चेतकी चूर्णयोगे स्यात् सप्तधैव प्रकीर्त्तिता ॥ १५ ॥
नवा स्निग्धा घना वृत्ता गुर्वी क्षिप्ता च याम्भसि ।
निमज्जेत् सा प्रशस्ता स्याद्रोगघ्नीति गुणप्रदा ॥ १६ ॥
शोणाच्छिन्ना गुड़निभा किञ्चिदल्पा कषायणी ।
स्थूलत्वक् सरसा स्वल्पबीजा गुर्वी हरीतकी ॥ १७ ॥
चर्विता वर्द्धयत्यग्निं पेषिता मलशोधिनी ।

स्निग्धा सङ्ग्राहिणी पथ्या भ्रष्टा प्रोक्ता त्रिदोषनुत् ॥१८॥
ग्रीष्मे तुल्यगुड़ां सुसैन्धवयुतां मेघावनद्धेऽम्बरे
तुल्यां शर्करया शरद्यमलया शुण्ठ्या तुषारागमे।
पिप्पल्या शिशिरे वसन्तसमये क्षौद्रेण संयोजिता
राजन्! प्राप्य हरीतकीमिव रुजो नश्यन्ति ते शत्रवः ॥१९॥
शिवा हरीतकी पथ्या चेतकी विजया जया।
अपथ्या प्रमथा मोघा कायस्था प्राणदामृता ॥ २० ॥
जीवनीया हैमवती पूतना हतनाभया।
वयस्था नन्दिनी श्रेया श्रेयसी रोहिणी तथा ॥ २१ ॥
हरीतकी पञ्चरसा लवणा तुवरोत्कटा।
रूक्षोष्णा दीपनी मेध्या स्वादुपाका रसायनी ॥ २२ ॥
सरा बुद्धिप्रदा हृद्या चक्षुष्या बृंहणी लघुः।
श्वासकासप्रमेहार्शःकुष्ठशोफोदरान् क्रिमीन् ॥ २३ ॥
वैस्वर्यग्रहणीदोषविबन्धविषमज्वरान्।
गुल्माध्मानव्रणच्छर्दिहिक्काकण्डूहृदामयान् ॥ २४ ॥
कामलां शूलमानाहं प्लीहानं चापकर्षति।
मधुराम्लतया वातं कषायत्वादुभावतः।
पित्तं हन्ति कफं हन्ति कटुकेन हरीतकी ॥ २५ ॥

अथ आमलकनामगुणाः।

धात्रीफलामृतफलामलकं श्रीफलं शिवम्।
तद्वद्धात्रीफलं हृद्यं विशेषाद्रक्तपित्तजित् ॥ २६ ॥
अम्लत्वात् पवनं हन्ति पित्तं माधुर्यशैत्यतः।
कफं रूक्षकषायत्वात् तस्मात् किमधिकं फलम् ॥२७॥

अथ विभीतकनामगुणाः।

विभीतकः कर्षफलो भूतावासः कलिद्रुमः।
पाशकोऽक्षो हेमजातः सदार्द्रस्तिमपुष्पकः ॥ २८ ॥

विभीतकः स्वादुपाकः कषायः कफपित्तनुत्।
उष्णवीर्य्यो हिमस्पर्शो भेदनः कासनाशनः।
रूक्षो नेत्रहितः केश्यो मज्जा तीयदकारकः॥२८॥

अथ त्रिफलानामगुणाः।

हरीतक्यास्त्रयो भागा शिवा द्वादशभागिका:।
षड्भागाः स्युर्विभीतस्य त्रिफलेयं प्रकीर्त्तिता॥३०॥
पित्तं माधुर्य्यशैत्यन्तु कफं रूक्षकषायनुत्।
त्रिफलैतत्त्रयेण स्याद्वरा श्रेष्ठा फलोत्तमा॥ ३१॥
त्रिफला कुष्ठमेहार्शःकफपित्तविनाशिनी।
चक्षुष्या रोपणी हृद्या वयसः स्थापिनी परा॥ ३२॥

अथ भूधात्रीनामगुणाः।

भूधात्री बहुपत्री स्यादमृतामलका शिवा।
भूधात्री वातकृत्तिक्ता कषाया मधुरा हिमा।
पिपासाकासपित्तास्रकफपाण्डुक्षतापहा॥ ३३॥

अथ प्राचीनामलकीनामगुणाः।

प्राचीनामलको प्राची नागरं रक्तकं मतम्।
तत्पक्वं पित्तकफहृत् उष्णं गुरुसमीरजित्॥ ३४॥

अथ उत्पाटारूषकनामगुणाः।

अरूषकेणववासा वृषा सिंहमुखी भिषग्।
सिंहपर्णी वृषो वासा सिंहकोत्पाटरूषकः॥ ३५॥
वासको वातकृत्स्वर्य्यः कफपित्तास्रनाशनः।
श्वासकासज्वरच्छर्दिमेहकुष्ठक्षयापहः॥ ३६॥

अथ गुडूचीनामगुणाः।

गुडूची कुण्डली छिन्ना वयस्थामृतवल्लरी।
छिन्नोद्भवा छिन्नरुहामृता ज्वरविनाशिनी॥ ३७॥
वत्सादनी चन्द्रहासा जीवन्ती चक्रलक्षणा।

गुडूची कटुका लघ्वी स्वादुपाका रसायनी ॥ ३८ ॥
संग्राहिणी कषायोष्णा बल्या तिक्ताग्निदीपनी ।
कामला कुष्ठवातास्रज्वरपित्तक्रिमीन् जयेत् ॥ ३९ ॥
घृतेन वातं सगुडा विबन्धं पित्तं सिताढ्या मधुना कफञ्च ।
वातास्रमुग्रं रुबुतैलमिश्रा शुण्ठ्यामवातं शमयेद्गुडूची ॥ ४० ॥

अथ बिल्वनामगुणाः ।

बिल्वः शलाटुः शैलूषो मालूरश्च सदाफलः ।
लक्ष्मीफलो गन्धगर्भः शाण्डिल्यः कण्टकी मतः ॥ ४१ ॥
बिल्वं ग्राहि कषायोष्णं कटु दीपनपाचनम् ।
हृद्यं बालं लघु स्निग्धं तिक्तं वातकफापहम् ॥ ४२ ॥
पक्वं गुरु त्रिदोषं स्याद् दुर्जरं पूतिमारुतम् ।
विदाहि विष्टम्भकरं मधुरं वह्निमान्द्यकृत् ।
बस्तीकफवातामशूलघ्नी बिल्वपेषिका ॥ ४३ ॥

अथ अरणिनामगुणाः ।

अग्निमन्थो जयः केतुररणिर्वैजयन्तिका ।
अग्निमन्थः श्वयथुघ्नो वीर्योष्णः कफवातनुत् ॥ ४४ ॥

अथ पाटलानामगुणाः ।

पाटला कामदूतिः स्यात् कुम्भिका कालवृन्तिका ।
स्थाल्यमोघा मधुदूती ताम्रपुष्पाम्बुवासिनी ॥ ४५ ॥
अन्या फलेरुहा श्वेता कुम्भिका लघुपाटला ।
पाटलारुचिशोथार्शःश्वासतृट्छर्दिनाशिनी ॥ ४६ ॥
तत्पुष्पं मधुरं स्याद् तत्पुष्पं कफपित्तनुत् ।
पित्तातिसारदाहघ्नं फलं हिक्कास्रपित्तनुत् ॥ ४७ ॥

अथ काश्मरीनामगुणाः ।

काश्मरी सर्वतोभद्रा श्रीपर्णी मधुकुम्भिका ।
गम्भारी काश्मरी हीरा काश्मर्या भद्रपर्णिका ॥ ४८ ॥

काश्मरी ज्वरशूलघ्नी वीर्य्योष्णा मधुरा गुरुः।
तत्पुष्पं वातलं ग्राहि पित्तास्रक्प्रदरापहम् ॥४८॥
फलं रसायनं केश्यं बृंहणं शुक्रलं गुरु।
वातपित्तचयतृष्णारक्तशूलविबन्धनुत् ॥ ५० ॥

अथ श्योनाकनामगुणाः।

श्योनाकः पृथुशिम्बिः स्यात् शुकनाशः कुटन्नटः।
भूतवृक्षश्च कट्वङ्गः टुण्टुकः शल्लको रलुः।
मयूरजङ्घो भल्लूकः प्रियजीवः कटम्भरः ॥ ५१ ॥
श्योनाको दीपनः पाके कटुस्तुवरको हिमः।
ग्राही तिक्तोऽनिलश्लेष्मपित्तकासविनाशनः ॥ ५२ ॥
टुण्टुकस्य फलं बालं रूक्षं वातकफापहम्।
हृद्यं कषायमधुरं लघु रोचनदीपनम् ॥ ५३ ॥

अथ महत्पञ्चमूलनामगुणाः।

विल्वादिभिः पञ्चभिरेभिरेतत्स्यात्पञ्चमूलं महदग्निकारि।
लघूष्णतिक्तं रसतः कषायं मेदःकफश्वासमसमीरहारि ॥ ५४ ॥

अथ गोक्षुरनामगुणाः।

त्रिकण्टकः कण्टफलो गोक्षुरः स्वादुकण्टकः।
गोकण्टको भक्षटकः त्रिकण्टो व्यालदंष्ट्रकः ॥ ५५ ॥
श्वदंष्ट्रा स्थूलशृङ्गाटः पडङ्गः क्षुरकस्त्रिकः।
गोक्षुरः शीतलः स्वादुर्बलकृद् बस्तिशोधनः।
प्रमेहश्वासकासार्शःकृच्छ्रहृद्रोगवातजित् ॥ ५६ ॥

अथ शालपर्णीनामगुणाः।

शालपर्णी ध्रुवा सौम्या त्रिपर्णी पीवनी स्थिरा।
विदारिगन्धातिगुहा दीर्घमूलांशुमत्यपि ॥ ५७ ॥
शालपर्णी गुरुः छर्दिज्वरश्वासातिसारनुत्।
शोषदोषत्रयहरा बृंहण्युक्ता रसायनी ॥ ५८ ॥

अथ पृश्निपर्णीनामगुणाः ।

पृश्निपर्णी क्रोष्टुपुच्छा धावनी कलशी गुहा ।
शृगालवृन्ताङ्घ्रिवल्ली पृथक्पर्णी च पर्णिका ॥ ५९ ॥
पृश्निपर्णी लघुर्हृद्या मधुरोष्णा विनाशयेत् ।
रक्तातिसारदाहतृड्दोषत्रयवमिज्वरान् ॥ ६० ॥

अथ स्थूलभण्टाकीनामगुणाः ।

बृहती स्थूलभण्टाकी विपदा च महोत्कटा ।
भण्टाकी महती सिंही कण्टकी राष्ट्रिकाकुली ॥ ६१ ॥
बृहती ग्राहिणी हृद्या पाचनी कफवातजित् ।
उष्णा कुष्ठज्वरश्वासशूलकासाग्निमान्द्यजित् ॥ ६२ ॥

अथ श्वेतकण्टकारीनामगुणाः ।

कण्टारिका कण्टकिनी कण्टकारी निदिग्धिका ।
दुःस्पर्शा धावनी क्षुद्रा स्याद् व्याघ्री दुष्प्रधर्षिणी ॥ ६३ ॥
सिता क्षुद्रा चन्द्रहासा लक्ष्मणा क्षेत्रदूतिका ।
कण्टकारी सरा तिक्ता कटुका दीपनी लघुः ॥ ६४ ॥
रूक्षोष्णा पाचनी कासश्वासज्वरकफानिलान् ।
निहन्ति पीनसं पार्श्वपीडाकृमिहृदामयान् ।
तद्वत् प्रोक्ता सिता क्षुद्रा विशेषाद् गर्भकारिणी ॥ ६५ ॥

अथ लघुपञ्चमूलनामगुणाः ।

इत्यासां पञ्चमूलं स्यात् पञ्चभिर्गोक्षुरादिभिः ।
बल्यं पित्तानिलहरं नात्युष्णं स्वादु लाघवम् ॥ ६६ ॥

अथ दशमूलनामगुणाः ।

उभाभ्यां पञ्चमूलाभ्यां दशमूलमुदाहृतम् ।
दोषत्रयश्वासकासशिरःपीडापतन्त्रकान् ।
तन्द्राशोथज्वरानाहपार्श्वपीडारुचीर्हरेत् ॥ ६७ ॥

अथ ऋद्धिवृद्धिनामगुणाः ।
ऋद्धिः सुखं युगं लक्ष्मीः सिद्धिः सर्वजनप्रिया ।
ऋषिसृष्टा रथाङ्गं स्यान्माङ्गल्यं ब्राह्मणी वसुः ॥
योग्यं युग्या तुष्टिराशिर्वृद्धिरप्येतदाह्वया ॥ ६८ ॥
ऋद्धिर्बल्या त्रिदोषघ्नी शुक्रला मधुरा गुरुः ।
वृद्धिर्गर्भप्रदा शीता वृष्या कासक्षयास्त्रनुत् ॥ ६९ ॥
अथ काकोलीक्षीरकाकोलीनामगुणाः ।
काकोली मधुरा वीरा कायस्था क्षीरशुक्लिका ।
ध्वांक्षोली वायसोली स्यात् स्वादुमांसी पयस्विनी ॥७०॥
द्वितीया क्षीरकाकोली सुराह्वा क्षीरिणी मता ।
पीवरी सहशस्कन्धः स क्षीरः स सुगन्धकः ।
क्षीरकाकोलिकाख्यात पित्तदोषज्वरापहः ॥ ७१ ॥
काकोलीयुगलं शीतं शुक्रलं मधुरं गुरु ।
जयेत्समीरदाहास्रपित्तशोषक्षयाज्वरान् ॥७२॥
अथ मेदामहामेदानामगुणाः ।
मेदा ज्ञेया शालपर्णी वृष्या मेदोद्भवा धरा ।
महामेदा मणिच्छिद्रा त्वदन्ता देवता मणिः ॥७३॥
मेदायुग गुरु स्वादु वृष्यं स्तन्यकफापहम् ।
बृंहणं शीतलं रक्तपित्तक्षयसमीरनुत् ॥७४॥
अथ जीवकर्षभकनामगुणाः ।
जीवको मधुरः शृङ्गी ह्रस्वाङ्गः कूर्चशीर्षकः ।
ऋषभो वीर इन्द्राक्षी विषाणी दुर्धरो वृषः ॥७५॥
जीवकर्षभकौ बल्यौ शीतौ शुक्रकफप्रदौ ।
हरतः पित्तदाहास्रकार्श्यवातक्षयामयान् ॥७६॥
अथ अष्टवर्गनामगुणाः ।
अष्टवर्गोऽष्टभिर्द्रव्यैरेतैः शीतोऽतिशुक्रल ।

बृंहणः पित्तदाहास्रशोषघ्नस्तन्यगर्भकृत् ॥७७॥

अथ जीवन्तीनामगुणाः ।

जीवन्ती जीवनी जीवा जीवनीया यशस्करी ।
शाकश्रेष्ठा जीवभद्रा माङ्गल्या जीववर्द्धनी ॥७८॥
जीवन्ती शीतला स्वादुः स्निग्धा दोषत्रयापहा ।
रसायनी बलकरी चक्षुष्या ग्राहिणी लघुः ॥७९॥

अथ मधुयष्टीनामगुणाः ।

मधुयष्टी क्लीतनकं यष्टी मधु मधूलिका ।
यष्ट्याह्वं मधुकं यष्टिमधुकं जलजा मधुः ।
मधुयष्टी गुरुः शीता वल्या तृट् छर्दिपित्तजित् ॥८०॥

अथ माषपर्णीमुद्गपर्णीनामगुणाः ।

माषपर्णी कृष्णवृन्ता काम्बोजी हयपुच्छिका ।
मांसमाषा सिंहमुखी स्वादुमाषा महासहा ॥८१॥
मुद्गपर्णी क्षुद्रसहा सूर्यपर्णी कुरङ्गिणी ।
वनजा रिङ्गिणी शिम्बी सिंही मार्जारगन्धिका ॥८२॥
माषपर्णी हिमा तिक्ता रूक्षा शुक्रबलासकृत् ।
मधुरा ग्राहिणी शोफवातपित्तज्वरास्रनुत् ।
तद्वद्भवेन्मुद्गपर्णी ग्रहदोषार्शोहरा लघुः ॥८३॥

अथ जीवनीयनामगुणाः ।

जीवन्ती सूर्यपर्णीयुक् काकोल्यौ जीवकर्षभौ ।
मेदोयष्टीति मधुरो जीवनीयगणो गुरुः ॥८४॥
शुक्रकृद् बृंहणः शीतः स्तन्यगर्भकफप्रदः ।
रक्तपित्तक्षयाशोषज्वरदाहानिलापहः ॥८५॥

अथ एरण्डरक्तैरण्डनामगुणाः ।

एरण्डो दीर्घदण्डः स्यात्तरुणो वर्द्धमानकः ।
चित्रः पञ्चाङ्गुलो व्याघ्रः पुष्पो गन्धर्वहस्तकः ॥८६॥

रक्तैरण्डो हस्तिकर्णो व्याघ्रो व्याघ्रतरो लघु ।
उत्तानपत्र उरबु वातारीरो च चुञ्चुला ॥८७॥
एरण्ड युग्म मधुरसुष्ण गुरु विनाशयेत् ।
शूलशोथकटीवस्तिशिर पीडोदरज्वरान् ॥८८॥
ब्रध्नश्वासकफानाहकासकुष्ठाममारुतान् ।
तत्फल भेदन स्वादु क्षारमुष्ण समीरजित् ॥८९॥

अथ काष्ठसारिवाकृष्णसारिवानामगुणा ।

शारिवा शारदास्फोता गोपकन्या प्रतानिका ।
गोपाङ्गना गोपवल्ली लतास्त्रा काष्ठशारिवा ॥९०॥
शारिकन्या कृष्णमूली भद्रा चन्दनशारिवा ।
भद्रा चन्दनगोपा च चन्दना कृष्णवल्ल्यपि ॥९१॥
सारिवायुगल स्वादु स्निग्ध शुक्रकर गुरु ।
अग्निमान्द्यारुचिश्वासवमिकासत्रयापहम् ।
दोषत्रयास्रप्रदरज्वरातीसारनाशनम् ॥ ९२ ॥

अथ यवासधन्वयवासनामगुणा ।

यासो मरुद्भवोऽनन्तो दीर्घमूलो यवासक ।
बालपत्र समुद्रान्तो दूरमूलोऽतिकण्टक ॥९३॥
धन्वयासस्ताम्रमूली दु स्पर्शा स्याद् दुरालभा ।
यासक कच्छुरा चाम्रमूलो धन्वयवासक ॥९४॥
यास स्वादुरसस्तिक्तो हिम पित्तहरो लघु ।
हन्ति रक्तकफभ्रान्तीस्तद्वद्धन्वयवासक ॥ ९५ ॥

अथ मुण्डीनामगुणा ।

मुण्डी भिक्षु परिव्राजी यावनी स्यात् तपोधना ।
श्रावणी श्रीमती मुण्डी तिक्ता श्रावणशीर्षका ॥९६॥
मुण्डी तिक्ता कटु पाके वीर्योष्णा मधुरा लघु ।
मेध्या गण्डापचीकृच्छ्रकृमियोन्यर्तिपाण्डुजित् ॥९७॥

अथ महामुण्डीभूमिकदम्बनामगुणाः ।

महामुण्डी लोमनीया छिन्नग्रन्थीनिका स्मृता ।
भूतघ्नः कुलहनो मम्बुगान्धकदम्बकः ।
कदम्बपुष्पमुण्डीवत् गुणैर्भूमिकदम्बकः ॥९८॥

अथ अपामार्गनामगुणाः ।

अपामार्गस्तु शिखरी किणिही खरमञ्जरी ।
अधःशल्यः शैखरिकः प्रत्यक्पुष्पी मयूरका ॥ ९९ ॥
अपामार्गः सरस्तीक्ष्णो दीपनः कफवातजित् ।
निहन्ति दद्रुसिध्मार्श कण्डूशूलोदरारुची ॥१००॥

अथ रक्तापामार्गनामगुणाः ।

अन्यो रक्तो हस्तफलो वशिरः कपिपिप्पली ।
अपामार्गोऽरुणो वातविष्टम्भी कफनाशनः ।
ऊनं पूर्वगुणैः कषायस्तम्भं रक्तपित्तनुत् ॥१०१॥

अथ काम्पिल्लनामगुणाः ।

काम्पिल्लो रेचनो रक्तचूर्णको व्रणशोधनः ।
लोहितो रक्तगमनो रेचो रञ्जनको मतः ॥१०२॥
काम्पिल्लः कफपित्तास्रक्रिमिगुल्मोदरव्रणान् ।
हन्ति रेची कटूष्णश्च तच्छाकं पाचि शीतलम् ॥१०३॥

अथ दन्तीनामगुणाः ।

दन्ती शुभप्रिया नागदन्ती शीघ्रा निकुम्भकः ।
उपचित्रानुकुम्भी स्यादिगन्धोदुम्बरच्छदा ॥१०४॥
चाणुपर्णी हयेरण्डा दन्ती मर्करी मता ।
मूषकाह्वा सुतश्रेणी प्रत्यक्श्रेणी च कम्पिका ॥१०५॥
दन्तीद्वयं सरं पाकरसयोः कटु दीपनम् ।
तीक्ष्णोष्णं हन्ति पित्तास्रकफार्शोदरान् क्रमीन् ॥१०६॥

अथ जयपालनामगुणाः ।

जयपालो दन्तीबीजं स्यात् तत् तित्तिरीफलम् ।
जयपालो गुरुस्निग्धो रेचो पित्तकफापहः ॥१०७॥

अथ श्वेतत्रिवृन्नामगुणाः ।

त्रिवृत् कुम्भोऽरुणा त्रस्तभण्डी कूटरवाहिनी ।
सर्वानुभूतिस्त्रिवृता त्रिपुटा सरलासिता ॥१०८॥
त्रिवृत्तिक्ता सरा रूचा स्वादुरुष्णा समीरकृत् ।
कटुः पाके ज्वरश्लेष्मपित्तशोफोदरापहा ॥१०९॥

अथ कृष्णात्रिवृन्नामगुणाः ।

त्रिवृत्काला कालमेषी कालपर्ण्यर्द्धचन्द्रिका ।
सुखेनास्यामालिविका मसूरा विदलान्विता ॥११०॥
त्रिवृत्काला हीनगुणा तस्यास्तीव्रविरेचिनी ।
मूर्च्छादाहमदभ्रान्तिवान्तिकार्पणकारीणी ॥१११॥

अथ इन्द्रवारुणीद्वयनामगुणाः ।

इन्द्रवारुण्यथैन्द्राख्यं वृषभाची गवादनी ।
ऐन्द्रवारुः चुद्रफला वियालेन्द्री वृषादनी ॥११२॥
अन्येन्द्रवारुणी चित्रफला चित्रमहाफला ।
आमरचा नागदन्ती मधुपी गजचिर्भटी ॥११३॥
श्वेतपुष्पी मृगाची च तथा पञ्चसुरा मता ।
मरुद्भवा क्रमिगुहा चित्रदेवी च कीर्त्तिता ॥११४॥
ऐन्द्रवारुद्वय तिक्तं कटुपाके सरं लघु ।
वीर्य्योष्णं कामलापित्तकफप्लीहोदरापहम् ॥११५॥

अथ आरग्वधनामगुणाः ।

आरग्वधो राजवृक्षः शम्याकः कृतमालकः ।
व्याधिघातः कर्णिकारः सम्पाकचतुरङ्गुलः ॥११६॥
आरोग्यशिम्बी स्वर्णाटः कर्णी दीर्घफलो मतः ।

कुण्डली हिमपुष्पा च कलिख्यातो नृपद्रुमः ॥११७॥
स्वर्णशेफालिका श्यावा कुष्ठसूदननाम तत्।
स्वर्णाख्याल्या पित्तला च सुवर्णद्रुम ईरितः ॥११८॥
आरग्वधो गुरुः स्वादुः शीतलो मृदुरेचनः।
ज्वरहृद्रोगपित्तास्रवातोदावर्त्तशूलजित् ॥ ११८ ॥
तत्पुष्पं वातलं ग्राहि तिक्तं पित्तकफापहम्।
तन्मज्जा मधुरः पाके तिक्तः पित्तसमीरजित् ॥ १२० ॥

अथ नीलिनीनामगुणाः।

नीलिनी नीलिका ग्राम्या श्रीफला भारवाहिनी।
रञ्जनी कलिकामेला तूणी रूक्षा विशोधिनी ॥ १२१ ॥
नीलिनी रेचनी तिक्ता केश्या मोहभ्रमापहा।
उष्णा हन्त्युदरप्लीहवातपित्तकफानिलान् ॥ १२२ ॥

अथ कटुकीनामगुणाः।

कटुकी रोहिणी तिक्ता चक्राङ्गी कटुरोहिणी।
मत्स्यपित्ता पाण्डुरुहा कृष्णभेदा द्विजाङ्गिका।
अशोका रोहिणी मत्स्या सकुला सकुलादिनी ॥ १२३ ॥
कटुकी कटुपाके च तिक्ता रूक्षा सरा लघुः।
हिमा हन्ति कृमिश्वासदाहपित्तकफज्वरान् ॥ १२४ ॥

अथ अङ्कोलकनामगुणाः।

अङ्कोलकस्ताम्रफलः पीतसारो निकोचकः।
गुप्तस्नेहो विरेची स्यात् भूषितो दीर्घकीलकः ॥ १२५ ॥
अङ्कोलकः कटुस्निग्धतीक्ष्णोष्णस्तुवरो लघुः।
रेचनः कृमिशूलामशोफश्लेष्मविषापहः ॥ १२६ ॥
तत्फलं शीतलं स्वादु श्लेष्मलं बृंहणं गुरु।
बल्यं विरेचनं वातपित्तदाहक्षयास्रजित् ॥ १२७ ॥

अथ सेहुण्डनामगुणाः ।

सेहुण्डो वज्रतुण्डस्तु गाण्डीरो वज्रकण्टकः ।
सुडीरमथ दुग्धोऽसिपत्नो वज्री महातरुः ॥ १२८ ॥
सेहुण्डो रेचनस्तीक्ष्णो दीपनो कटुको गुरुः ।
शूलामाष्ठीलिकाध्मानगुल्मशोफोदरानिलान् ।
हन्ति दूषीविषप्लीहकुष्ठोन्मादाश्मपाण्डुताः ॥ १२९ ॥

अथ निम्बनामगुणाः ।

निम्बो नियमनो नेतारिष्टः स्यात्पारिभद्रकः ।
सुतिक्तः सर्वतोभद्रः पिचुमन्दः प्रभद्रकः ॥ १३० ॥
कुष्ठहा देवदत्तश्च रविसन्निभसूर्य्यकः ।
निम्बः शीतो लघुः ग्राही कटुपाकोऽग्निवातकृत् ॥१३१॥
व्रणपित्तकफच्छर्दिकुष्ठहृल्लासमेहनुत् ।
निम्बपत्रं घृतं नेत्र्यं कृमिपित्तविषप्रणुत् ॥ १३२ ॥
तत्फलं भेदनं स्निग्धमुष्णं कुष्ठहरं लघु ।
षपक्वं पाचयेन्निम्बः पक्वञ्चापरिशोषयेत् ॥ १३३ ॥

अथ महानिम्बनामगुणाः ।

महानिम्बो निम्बकरः कार्मुको विषमुष्टिकः ।
रम्यको गिरिकोद्रे काचारः स्यात् केशमुष्टिकः ॥१३४॥
महानिम्बो हिमो रूक्षस्तिक्तो ग्राही कषायकः ।
कफपित्तकृमिच्छर्दिकुष्ठहृल्लासरक्तजित् ॥१३५॥

अथ किराततिक्तनामगुणाः ।

किराततिक्तः कैरातो भूनिम्बो रामसेनकः ।
किरातकोऽन्यो नैपालो नाडितिक्तो ज्वरान्तकः ।
काण्डतिक्तोऽर्द्धतिक्तः स्याच्चिद्रारिः सन्निपातहा ॥१३६॥
किरातो वातलो रूक्षः शीतलस्तिक्तको लघुः ।
सन्निपातज्वरश्वासकासपित्तास्रदाहनुत् ॥१३७॥

अथ कुटजनामगुणाः।

कुटजो मल्लिकापुष्पः कलिङ्गो गिरिमल्लिका।
वत्सकः कुटजः कोटिवत्सकः शक्रभूरुहः ॥१३८॥
कुटजः कटुको रूचो दीपनस्तुवरो लघुः।
अर्शोऽतिसारपित्तास्रकफतृष्णामकुष्ठनुत्।
तत्पुष्पं वातलं शीतं तिक्तं पित्तातिसारजित् ॥१३९॥

अथ इन्द्रयवनामगुणाः।

ऐन्द्रयवस्तस्य फलं कालिङ्गः कोटजो मतः।
शक्राह्वः पुरुहूतश्च शीतो भद्रयवस्तथा ॥१४०॥
ऐन्द्रयवस्त्रिदोषघ्नः सग्राही शीतलः कटुः।
ज्वरातिसाररक्तार्शःक्रमिवीसर्पकुष्ठनुत् ॥१४१॥

अथ मदननामगुणाः।

मदनः छर्दनः पिण्डो राठपिण्डान्तकं फलम्।
वारद्दाटश्च तगरः शल्यको विषपुष्पकः ॥१४२॥
मदनो वमनस्तिक्तो वीर्योष्णो लेखनो लघुः।
रूक्षः कुष्ठकफानाहशोफगुल्मव्रणापहः ॥१४३॥

अथ कङ्कुष्ठनामगुणाः।

कङ्कुष्ठं काङ्कक्कुष्ठं रेचनं रङ्गनामकम्।
शोधनं पुलहं द्दासं वराङ्गं कुष्ठवालुकम् ॥१४४॥
कङ्कुष्ठं रेचनं तिक्तं कटुष्णं वर्णकारकम्।
क्रमिशोफोदराध्मानगुल्मानाहकफापहम् ॥१४५॥

अथ हैमाह्वानामगुणाः।

हैमाह्वा कनकक्षीरी हैमपुष्पी हिमावती।
क्षीरिणी काञ्चनक्षीरी कटुपर्णी चिक्रर्यणी।
तिक्तदुग्धा हैमवती पीतदुग्धा हिमाद्रिका ॥१४६॥

हैमाह्वा रेचनी तिक्ता मन्दाग्न्युत्क्लेदकारिणी।
क्रमिकण्डूकफानाहविषकुष्ठविनाशनी ॥१४७॥

अथ सातलानामगुणाः।

सातला विरला सारी सत्फला बहुफेनका।
चर्मसाह्वा चर्मकसा फेना दीप्ता च नालिका ॥१४८॥
सातला कटुका पाके वातला शीतला लघुः।
तिक्ता शोथकफानाहपित्तोदावर्त्तरक्तजित् ॥१४९॥

अथ अश्मन्तकनामगुणाः।

अश्मन्तो मालुकापत्रो युग्मपत्रोऽम्लपत्रकः।
श्लक्ष्णत्वगश्मयोनिः स्यात् कुशली पापनाशनः ॥१५०॥
अश्मन्तस्तुवरो ग्राही शीतोष्णः कफवातजित्।
निहन्ति गण्डमालासृगलगण्डगलामयान्।
तत्फलं लेखनं ग्राहि गुरुश्लेष्मानिलापहम् ॥१५१॥

अथ काञ्चनारनामगुणाः।

काञ्चनारः काञ्चनकः पाकारी रक्तपुष्पकः।
कोविदारोऽस्य भेदः स्यात् कुदालः कुद्दली कुली।
चास्फोती दालकः स्वल्पकेसरचमरी मता ॥१५२॥
काञ्चनारो हिमो ग्राही तुवरः श्लेष्मपित्तनुत्।
क्रिमिकुष्ठगुदभ्रंशगण्डमालाव्रणापहः ॥१५३॥
कोविदारोऽपि तद्वत् स्यात् पुष्पं शीतं तयोर्लघुः।
रूक्षं संग्राहि पित्तास्रप्रदरक्षतकासनुत् ॥१५४॥

अथ निर्गुण्डीद्वयनामगुणाः।

निर्गुण्डी श्वेतकुसुमः सिन्दुकः सिन्दुवारकः।
भूतकेशापरो नीलसिन्दुकः पुष्पनीलकः ॥१५५॥
शेफालिका शीतभीरुर्वनकोऽमिलमञ्जरी।
निर्गुण्डी स्मृतिदा तिक्ता कषाया कटुका लघुः ॥१५६॥

केश्या नेत्रहिता हन्ति शूलशोथाममारुतान्।
क्रिमिकुष्ठरुचिः श्लेष्मव्रणानीलापि तद्विधा ॥१५७॥

अथ मेषशृङ्गीनामगुणाः।

मेषशृङ्गी मेषवल्ली सप्तदंष्ट्राजशृङ्गिका।
अन्या तु दक्षिणावर्त्ता वृश्चिकाली विषाणिका ॥१५८॥
मेषशृङ्गी रसे तिक्ता वातला श्वासनाशनी।
रूक्षा पाके कटुः पित्तव्रणश्लेष्माक्षिशूलनुत् ॥१५९॥

अथ पुनर्नवाद्वयनामगुणाः।

पुनर्नवा श्वेतमूला पृथ्वीका दीर्घपत्रकः।
विषाददीर्घवर्षाभूः पुनर्भूर्मण्डलच्छदा ॥१६०॥
पुनर्नवा सरा तिक्ता रूक्षोष्णा मधुरा कटुः।
पुनर्नवारुणा तिक्ता रक्तपुष्पा कठिल्लका ॥१६१॥
क्रूरकः क्षुद्रवर्षाभूर्वर्षकेतुः शिवाटिका।
शोफानिलव्रणश्लेष्महरा रुच्या रसायनी ॥१६२॥
पुनर्नवा परा तिक्ता कटुपाका हिमा लघुः।
वातला ग्राहिणी श्लेष्मरक्तपित्तविनाशनी ॥१६३॥

अथ रास्नानामगुणाः।

रास्ना रम्या युक्तरसा रसना गन्धनाकुली।
सुगन्धमूलातिरसा श्रेयसी सुवहा रसा ॥१६४॥
रास्नामपाचनी तिक्ता गुरूष्णा श्लेष्मवातजित्।
शोफश्वासमीरास्रवातशूलोदरापहा ॥१६५॥

अथ अश्वगन्धानामगुणाः।

अश्वगन्धा तुरङ्गाह्वा गोकर्णावरोहकः।
वराहकर्णी वरदा बल्या वाजीकरी हया ॥१६६॥
अश्वगन्धानिलश्लेष्मशोफश्वित्रक्षयापहा।
बल्या रसायनी तिक्ता कषायोष्णातिशुक्रला ॥१६७॥

अथ प्रसारणीनामगुणा ।

प्रसारणी राजबला चारुपर्णी प्रतानिका ।
शरणी सारणी भद्रपर्णी सुप्रसरा सरा ॥१६८॥
प्रसारणी गुरुर्वृष्या सन्धानबलकृत् सरा ।
वीर्य्योष्णा वातनुत् तिक्ता वातरक्तकफापहा ॥१६९॥

अथ शतावरीनामगुणा ।

शतावरी द्वीपिशत्रुर्हिपिकाधरकण्टका ।
नारायणी शतपदी शतपाद् बहुपत्रिका ॥१७०॥
शतावरी गुरु शीता स्वादु स्निग्धा रसायनी ।
शुक्रस्तन्यकरा बल्या वातपित्तास्रशोफजित् ॥१७१॥

अथ महाशतावरीनामगुणा ।

शतावर्य्यूर्द्ध्वकण्टान्या पीवरी धीवरी वरी
अभीरुर्बहुपत्रा च महापुरुषदन्तिका ।
सहस्रवीर्य्या केशी स्यात् तुङ्गिनी सूक्ष्मपत्रिका ॥१७२॥
महाशतावरी मेध्या हृद्या वृष्या रसायनी ।
शीतवीर्य्या निहन्त्यर्शोग्रहणीनयनामयान् ।
तदङ्कुरस्त्रिदोषघ्नो लघुरर्शःक्षयापहः ॥१७३॥

अथ बलानामगुणा ।

बला वाट्यालका शीतपाकी वाट्योदराह्वया ।
भद्रौदनी समङ्गा स्यात् समांसा खरयष्टिका ॥१७४॥

अथ सहदेवीनामगुणा ।

महाबला पीतपुष्पी सहदेवी हृहम्ना ।
वाट्यायनी देवसहा वाट्या स्यात् पीतपुष्पिका ॥ १७५ ॥

अथ बलाकानामगुणा ।

बलाकातिबला भारद्वाजी स्याद् वृचगन्धिनी ॥ १७६ ॥

अथ गङ्गेरुकीनामगुणाः।
गङ्गेरुकी नागबला विश्वदेवा गवेधुका ॥ १७७ ॥
अथ बलाचतुष्टयगुणाः।
बलाचतुष्टयं शीतं मधुरं बलकान्तिकृत्।
स्निग्धं ग्राहि समीरास्रपित्तास्रक्षतनाशनम् ॥ १७८ ॥
भार्सी हृद्दला क्षच्छ्रं हन्ति वातानुलोमनी।
गुर्वी नागबला वृष्या विशेषात्कफपित्तजित्।
बल्या रसायनी पुंस्त्ववर्द्धिनी बृंहणी तथा ॥ १७९ ॥
तस्याः फलं हिमं स्वादु स्तम्भनं गुरुलेखनम्।
विबन्धाध्मानजननं रक्तपित्तविवर्द्धनम् ॥ १८० ॥
अथ ज्योतिष्मतीनामगुणाः।
ज्योतिष्मती वह्निरुचि कङ्गुणी कटभी तथा ॥ १८१ ॥
ज्योतिष्मती कटुस्तिक्ता सरा कफसमीरजित्।
अत्युष्णा वामनी तीक्ष्णा वह्निबुद्धिस्मृतिप्रदा ॥ १८२ ॥
अथ महाज्योतिष्मतीनामगुणाः।
तेजस्विनी तेजोवती तेजिन्या लघुवल्कला।
महौजसी पारिजाता शीता तिक्तातितेजिनी ॥ १८३ ॥
तेजस्विनी कफश्वासकासशूलामवातजित्।
पाचन्युष्णा कटुस्तिक्ता रुचिवह्निप्रदीपनी ॥ १८४ ॥
अथ देवदारुनामगुणाः।
देवदारु सुराह्व स्याद्भद्रदारु सुरद्रुम।
भद्रकाष्ठं स्नेहवृच्च क्रमिलं शक्रदारु च ॥ १८५ ॥
देवदारु कटु स्निग्ध तिक्तोष्णं लघु नाशयेत्।
आध्मानज्वरशोथामहिक्काकण्डुकफानिलान् ॥ १८६ ॥
अथ सरलनामगुणाः।
सरलो नन्दनो शीडा नमेरुद्विकटचका।

पीतदारु पीतद्रुघो महादीर्घकलिद्रुमा ॥ १८७ ॥
सरलः कटुकः पाकरसयोर्मधुरो लघुः।
उष्णा स्निग्धा समीराक्षिकण्ठकर्णामयापहा ॥ १८८ ॥

अथ पुष्करमूलनामगुणाः।

पौष्कराह्वं पद्मपत्रं पौष्करं पुष्कराह्वयम्।
काश्मीरं पुष्करजटा मूलवीरं सुगन्धिकम् ॥ १८९ ॥
पौष्करं कटुकं तिक्तमुष्णवातकफज्वरान्।
हन्ति शोफारुचिश्वासान् विशेषात् पार्श्वशूलजित् ॥१९०॥

अथ कुष्ठनामगुणाः।

कुष्ठं रोगाह्वयं दिव्यं कौबेरं पारिभद्रकम्।
पारिभाव्यं पारिभाव्यमुत्पलं पारिभव्यकम् ॥ १९१ ॥
कुष्ठमुष्णं कटु स्वादु तिक्तं शुक्रप्रदं लघु।
हन्ति वातास्रवीसर्पकुष्ठकासमरुत्कफान् ॥ १९२ ॥

अथ कर्कटशृङ्गीनामगुणाः।

शृङ्गी कुलीरशृङ्गी स्यादक्रा कर्कटशृङ्गिका।
कर्कटाख्या महाघोषा शृङ्गनाम्नी नतान्यपि ॥ १९३ ॥
शृङ्गी कषायतिक्तोष्णा हन्ति हिक्कावमिज्वरान्।
तृष्णा वमिकफश्वासक्षयकासोर्ध्वमारुतान् ॥ १९४ ॥

अथ कट्फलनामगुणाः।

कट्फलं कुमुदा कुम्भी श्रीपर्णी सोमपादपः।
सोमवल्को महाकुम्भी भद्रा भद्रवती शिवा ॥ १९५ ॥
कट्फलं तुवरं तिक्तं कटु वातकफज्वरान्।
हन्ति श्वासप्रमेहार्शः कासकण्ठामयारुचीः ॥ १९६ ॥

अथ रोहिषनामगुणाः।

रोहिषं कत्तृणं भूतिर्भूतिकं सरलं तृणम्।
श्यामलं युग्मकं पौरं व्यापकं देवगन्धकम् ॥ १९७ ॥

रोहिषं कटुकं पाके तिक्तोष्णं तुवरं जयेत्।
हन्ति मारुतपित्तास्रं चणाच्छासकफज्वरान् ॥ १९८ ॥

अथ भार्गीनामगुणाः।

भार्गी भृगुभवा पद्मा कासघ्नी गन्धपर्वणी।
खरशार्क शक्रमाता फञ्जी ब्राह्मणयष्टिका ॥ १९९ ॥
भार्गी रूक्षो कटुस्तिक्ता रुच्योष्णा पाचनी जयेत्।
शोथकासकफश्वासपीनसज्वरमारुतान् ॥ २०० ॥

अथ पाषाणभेदनामगुणाः।

पाषाणभेदः पाषाणोऽश्मरीभेदोऽश्मभेदकः।
शिलाभेदो ह्युपङ्भेदो नागभिन्नाङ्गभेदनः ॥ २०१ ॥
पाषाणभेदस्तुवरः शीतलो वस्तिशोधनः।
सरस्तिक्तः प्रमेहार्शःकृच्छ्राश्मरीरुजो जयेत् ॥ २०२ ॥

अथ मुस्तानामगुणाः।

मुस्तं वारिधरो मुस्तो मेघाख्यः कुरुविन्दकः ॥ २०३ ॥
वराहोऽब्दो घनो भद्रमुस्तं राजकसेरुकः।
पिण्डमुस्तं विषध्वंसी नागरोऽन्यः प्रकीर्त्तितः ॥ २०४ ॥
मुस्तं कटु हिमग्राहि तिक्तं दीपनपाचनम्।
कषायं कृमिपित्तासृक्कफतृष्णाज्वरापहम् ॥ २०५ ॥

अथ धातुकीनामगुणाः।

धातुकी कुञ्जरा सिन्धुपुष्पी प्रमदिनी मदा।
पार्वतीया ताम्रपुष्पी सुभिक्षा मद्यवासिनी ॥ २०६ ॥
धातुकी कटुका शीता मन्दोष्णा तुवरा लघुः।
तृष्णातीसारपित्तास्रविषकृमिविसर्पजित् ॥ २०७ ॥

अथ माचिकानामगुणाः।

माचिका बालिकाम्बष्ठा शठी दन्तशठाम्बिका।
अम्बष्ठकी सूचीमुखी कषाया कण्ठमुख्यपि ॥ २०८ ॥

माचिकाम्ला रसे पाके कषायो शीतलो लघुः ।
पक्वातोसारपित्तास्रकफकण्ठामयापहा ॥ २०९ ॥

अथ विदारिकन्दद्वयनामगुणाः ।

विदारिका स्वयवल्ली स्वयकन्दा विदालिका ।
शृगालिका कन्दवल्ली स्वादुकन्दा बिडालिका ॥२१०॥
अन्या शुक्ला चीरशुक्ला चारवल्ली पयस्विनी ।
इक्षुवल्ली महाश्वेता चीरकन्देक्षुगन्धिका ॥ २११ ॥
विदारी मधुरा स्निग्धा बृंहणी स्तन्यशुक्रदा ।
गुरुपित्तास्रपवनदाहान् हन्ति रसायनी ॥ २१२ ॥

अथ वाराहीकन्दनामगुणाः ।

वाराही माधवी गृष्टि शौकरी वनमालिका ।
विष्वक्सेनप्रिया क्रोड़नाम्ना शम्बरकन्दकः ॥ २१३ ॥
वाराही मधुरा कन्दे कटुस्तिक्तातिशुक्रला ।
बल्या शुक्रकरा वातकफमेहक्रमीन् जयेत् ॥ २१४ ॥

अथ पाठानामगुणाः ।

पाठाम्बष्ठा वृहत्तिक्ता प्राचीनाम्बष्ठिका रसा ।
वरा तिक्ता पापचेली श्रेयसी वृहकर्णिका ॥ २१५ ॥
पाठोष्णाकटुका तीक्ष्णा वातश्लेष्महरा लघुः ।
हन्ति शूलज्वरच्छर्दिकुष्ठातीसारहृद्रुजः ।
दाहकण्डूविषश्वासकृमिगुल्मगरव्रणान् ॥ २१६ ॥

अथ मोरटीनामगुणाः ।

मूर्वादेवी मधुरसा देवश्रेणी मधुस्रवा ।
चिग्धपर्णी पृथक्पर्णी मोरटी पीलुपर्णिका ॥ २१७ ॥

अथ मञ्जिष्ठानामगुणाः ।

मञ्जिष्ठा विजया रक्ता रक्ताङ्गी कालमेषिका ।
रक्तयष्टी ताम्रवल्ली समङ्गा वस्त्रभूषणा ॥ २१८ ॥

मञ्जिष्ठा विकसा भण्डी छत्रिका ज्वरनाशिनी ।
मञ्जिष्ठा मधुरा तिक्ता कषाया स्वरवर्णकृत् ॥ २१९ ॥
गुरुरुष्णा विषश्लेष्मशोफयोन्यक्षिशूलनुत् ।
रक्तातीसारकुष्ठास्रवीसर्पव्रणमेहजित् ।
तच्छाकं दीपनं स्वादु स्निग्धं पित्तानिलापहम् ॥ २२० ॥

अथ हरिद्रानामगुणा ।

हरिद्रा रजनी गौरी रञ्जिनी वरवर्णिनी ।
पिण्डा पीता वर्णवती निशावर्णा विलासिनी ॥ २२१ ॥
हरिद्रा कटुका तिक्ता रूक्षोष्णा श्लेष्मपित्तनुत् ।
वर्ण्या त्वग्दाहमेहास्रशोफपाण्डुव्रणापहा ॥ २२२ ॥

अथ दारुहरिद्रापीतदारुनामगुणा ।

दार्वी दारुहरिद्राऽन्या पीतदारु च पञ्चधा ।
कटं कटेरी पित्तद्रु, स्वर्णवर्णा कटङ्कटी ॥ २२३ ॥
दार्वी तद्वद्विशेषात्तु नेत्रकर्णास्यरोगनुत् ॥ २२४ ॥

अथ प्रपुन्नाटनामगुणाः ।

प्रपुन्नाटस्त्वेडगजचक्रमर्द प्रपुन्नडः ।
दद्रुघ्नो मर्दको मेषकुसुम कुष्ठकृन्तन ॥ २२५ ॥
प्रपुन्नाटो लघु स्वादु रूक्ष पित्तानिलापह ।
हृद्यो हिमकफश्वासकुष्ठदद्रुक्रमीन् जयेत् ॥ २२६ ॥
तदुष्णं तत्फलं कुष्ठकण्डूदद्रुविषानिलान् ।
वातरक्तापहं तस्य शाकं कफकरं लघु ॥ २२७ ॥

अथ वाकुचीनामगुणा ।

वाकुची चन्द्रिका सोमवल्ली पूतिफला वरा ।
सोमराजी कृष्णफला वल्गुजा कालमेषिका ।
चन्द्रलेखा तथा सोम. कुष्ठघ्नी च सितावरी ॥ २२८ ॥
वाकुची मधुरा तिक्ता कटुपाका रसायनी ।

विष्टम्भघ्नी हिमा रुच्या सरा हृद्यास्रपित्तनुत् ॥ २२८ ॥
रुच्या हन्तिकफ श्वासकुष्ठमेहज्वरक्रमीन् ।
तत्फलं पित्तकृत् केश्यं कुष्ठवातकफापहम् ॥ २३० ॥

अथ भृङ्गराजनामगुणाः ।

भृङ्गराजो मेकराजो मार्कवः केशरञ्जकः ।
भृङ्गारको भृङ्गराजो भृङ्गाह्वः सूर्य्यवल्लभः ॥ २३१ ॥
भृङ्गराजः कटुस्तिक्तो रुक्षोष्णः कफवातकृत् ।
दन्त्यो रसायनस्त्वच्यः कुष्ठमेवशिरोऽर्त्तिजित् ॥ २३२ ॥

अथ पर्पटनामगुणाः ।

पर्पटः कवचो रेणु पित्तघ्ना वरकण्टकः ।
वरतिक्तः पर्पटकः हृष्यिकश्चर्मकण्टकः ॥ २३३ ॥
पर्पटो हन्ति पित्तासृभ्रमतृष्णाकफज्वरान् ।
संग्राही शीतलस्तिक्तो दाहनुत् वातलो लघुः ॥२३४॥
रक्तपुष्पोऽतिसारस्य वारको ज्वरनाशनः ।
पर्पट पित्तहृद्दाहज्वरजित् श्लेष्मशोषणः ।
तिक्तशीतौ स्वरहरौ लघू भूनिम्बपर्पटौ ॥ २३५ ॥

अथ त्रायमाणानामगुणाः ।

शणपुष्पी माल्यपुष्पो धावनी शणघण्टिका ।
बृहत्पुष्पी स्वल्पघण्टा घण्टाशब्दा तु पुष्पिका ॥ २३६ ॥
शणपुष्पी कटु पित्तघ्नी अनिलच्छर्दिकारिणी ।
त्रायमाणा सुदृच्छाया त्रायन्ती गिरिजानुजा ।
बलभद्रा क्षतत्राणा वार्षिकं त्रायमाणिका ॥ २३७ ॥
त्रायमाणा सरा पित्तज्वरश्लेष्मासृगूलजित् ॥ २३८ ॥

अथ महाजालनिकानामगुणाः ।

महाजालनिका घर्मरङ्गः स्यात् तिमपुष्पिका ।
भायर्त्तको हिन्दुकिनी विभाण्डी रक्तपुष्पिका ॥ २३९ ॥

महाजालनिका तिक्ता रेचनी कफपित्तजित्।
हन्ति दाहोदरानाहशोफकुष्ठक्रिमिज्वरान् ॥२४०॥

अथ अतिविषाभेदनामगुणा ।

अतिविषा शुक्लकन्दा विषा प्रतिविषापरा।
श्यामकन्दा शिवाशृङ्गी भङ्गुरोपविषाणिका ॥२४१॥
विषोष्णा पाचनी तिक्ता श्लेष्मपित्तातिसारजित् ॥२४२॥
श्यामकन्दा चोपविषा सा विज्ञेया चतुर्विधा।
रक्ता श्वेता भवेत् कृष्णा पीतवर्णा तथैव च ॥२४३॥
यथापूर्ववद्विज्ञेया वन्ध्या श्रेष्ठा गुणोत्तमा।
सर्वदोषहराऽग्रत्वाल्लेपात् श्वयथुनाशिनी।
श्लेष्मजान् विंशतिरोगान् सद्यो हन्याद्रसायनी ॥२४४॥

अथ काकमाचीनामगुणा ।

काकमाची ध्वाङ्क्षमाची वायसी च घनाघना।
रसायनवरा सर्वतिक्ता स्यात् काकिनी कटु ॥२४५॥
काकमाची त्रिदोषघ्नी स्निग्धोष्णा स्वरशुक्रदा।
हृद्या रसायनी शोफकुष्ठार्शोज्वरमेहजित् ॥२४६॥

अथ काकजङ्घानामगुणा ।

काकजङ्घा नदीकान्ता काकतिक्ता सुलोमशा।
पारावतपदी काका मदाम्या छर्दिकारिणी ॥२४७॥
काकजङ्घा हिमा हन्ति रक्तपित्तकफज्वरान् ॥२४८॥

अथ लोध्रद्वयनामगुणा ।

लोध्रस्तिरीट कानीनस्तिलक मन्तलोद्भव ।
अन्यो घनत्वात् शरक श्वेतलोध्रोऽक्षिभेषजम् ॥२४९॥
लोध्रो विरेचक शीतश्चक्षुष्य कफपित्तनुत्।
कषायो रक्तशोफाश्मज्वरातीसारनाशन ।
तत्पुष्पं मधुरं ग्राहि सतिक्तं श्लेष्मपित्तजित् ॥२५०॥

अथ वृद्धदारुकगुणाः ।

वृद्धदारुर्महाश्यामा लाङ्गली जीर्णवल्कलः ।
अन्या कोटरपुष्पी स्यादावेगी छागलान्त्रिका ॥२५१॥
वृद्धदारुः कषायोष्णः सरस्तिक्तो रसायनः ।
वृष्यो वातामवातास्रशोफमेहकफान् जयेत् ॥२५२॥

अथ देवदालीनामगुणाः ।

देवदाली वृत्तकोशी देवताडो गरागरी ।
जीमूतस्तारका वेणी जालिन्याऽयुर्विषापहा ॥२५३॥
देवदाली रसे तिक्ता कफार्शःशोफपाण्डुताः ।
नाशयेद् वामनी तीक्ष्णा क्षयहिक्काक्रमिज्वरान् ।
देवदाली च कटुका प्रमेहश्वासमलापहा ॥२५४॥

अथ हंसपादीनामगुणाः ।

हंसपादी हंसपदी रक्तपादी त्रिपादिका ।
प्रह्लादिनी कीटमारी कीटमाता मधुस्रवा ॥२५५॥
हंसपादी गुरुः शीता हन्ति रक्तविषव्रणान् ।
विसर्पदाहातीसारलूताभूताग्निरोहिणीः ॥२५६॥

अथ सोमवल्लीनामगुणाः ।

सोमवल्ली यज्ञनेता सोमचीरी द्विजप्रिया ॥२५७॥
सोमवल्ली त्रिदोषघ्नी कटुस्तिक्ता रसायनी ॥२५८॥

अथ आकाशवल्लीनामगुणाः ।

आकाशवल्ली तु बुधैः कथितामरवल्लरी ॥२५९॥
खवल्ली ग्राहिणी तिक्ता पिच्छिलाक्ष्यामयापहा ॥२६०॥

अथ नाकुलीनामगुणाः ।

नाकुली सर्पहा सर्पगन्धिनी गन्धनाकुली ।
नकुलेष्टा महासर्पनेत्रा रोचकपत्रिका ॥२६१॥
नाकुली तुवरा तिक्ता कटुकोष्णा विनाशयेत् ।

विषं लूताहवृश्चिकाखुसर्पाणाञ्च क्रिमिव्रणान् ॥२६२॥

अथ वटपत्रीनामगुणाः।

वटपत्री मोहिनी स्यादीपनी रेचनी मता।
वटपत्री योनिगदान् कषायोष्णा विनाशयेत् ॥२६३॥
तत्फलं स्तम्भनं शीतं वातलं कफपित्तजित् ॥२६४॥

अथ लज्जालुनामगुणाः।

लज्जालुर्मोहिनी स्पृक्का खदिरो गन्धकारिणी।
नमस्कारी शमीपत्री समङ्गा रक्तपादिका ॥२६५॥
लज्जालुः शीतला तिक्ता कषाया श्लेष्मपित्तजित्।
रक्तपित्तमतीसारं योनिरोगान् विनाशयेत् ॥२६६॥

अथ मुषलीनामगुणाः।

मुषली खलिनी तालपत्री काञ्चनपुष्पिका।
महावृष्या वृषकन्दः खर्जूरी तालमूलिका ॥२६७॥
मुषली मधुरा वृष्या वीर्य्योष्णा बृंहणी गुरुः।
तिक्ता रसायनी हन्ति गुदजानानिलांस्तथा ॥२६८॥

अथ कपिकच्छूनामगुणाः।

कपिकच्छूः स्वयंगुप्ता कण्डूला दुरवग्रहा।
चण्डात्मगुप्ता लाङ्गूली मर्कटी स्यात् प्रहर्षणी ॥२६९॥
कपिकच्छूः परं वृष्या मधुरा बृंहणी गुरुः।
तद्वीजं वातशमनं वाजीकरणमुत्तमम् ॥२७०॥

अथ पुत्रजीवनामगुणाः।

पुत्रजीवो गर्भकरो यष्टीपुत्रोऽर्थसाधनः।
पुत्रजीवो गुरुर्वृष्यो गर्भदः श्लेष्मवातजित् ॥२७१॥

अथ वन्ध्याकर्कोटकीनामगुणाः।

वन्ध्याकर्कोटिकी देवी कुमारी विषकण्टकी।
मनोज्ञा नागदमनी वन्ध्या योगीश्वरी मता ॥२७२॥

वन्ध्याकर्कोटकी लघ्वी कफनुद् व्रणशोधनी।
सर्पदंष्ट्रहरा तीक्ष्णा विसर्पविषनाशिनी ॥२७३॥

अथ विष्णुक्रान्तानामगुणाः।

विष्णुक्रान्ता नीलपुष्पी जया वश्यापराजिता ॥२७४॥
विष्णुक्रान्ता कटुर्मेध्या क्रिमिव्रणकफान् जयेत् ॥२७५॥

अथ शङ्खपुष्पीनामगुणाः।

शङ्खपुष्पी शङ्खनाम्नी किरीटी कम्बुमालिनी ॥२७६॥
शङ्खपुष्पी सरा मेध्या हृद्या मानसरोगहृत्।
रसायनी कषायोष्णा स्मृतिकान्तिबलाग्निदा।
दोषापस्मारभूतासकुष्ठक्रिमिविषप्रणुत् ॥२७७॥

अथ दुग्धिकानामगुणाः।

दुग्धिका मधुपर्णी स्यात् चीरिणी स्वादुपुष्पिका ॥२७८॥
दुग्धिकोष्णा गुरू रूक्षा वातला गर्भकारिणी।
स्वादुर्विष्टम्भिनी हृद्या कफकुष्ठक्रमीन् जयेत् ॥२७९॥

अथ अर्कपुष्पीनामगुणाः।

अर्कपुष्पी क्रूरकर्मा जलकामा भिरिण्टिका ॥२८०॥
अर्कपुष्पी क्रिमिघ्ने प्रमेहपित्तविकारजित् ॥२८१॥

अथ भल्लातकनामगुणाः।

भल्लातको नभोवह्नी वीरवृक्षोऽग्निवक्त्रकः।
आरुष्करस्तथा रूक्षस्तपनोऽग्निमुखो धनुः ॥२८२॥
भल्लातकः कषायोष्ण शुक्रलो मधुरो लघुः।
वातश्लेष्मोदरानाहकुष्ठार्शोग्रहणीगदान्।
हन्ति गुल्मज्वरश्वित्रवह्निमान्द्यक्रिमिव्रणान् ॥२८३॥

अथ चरपोटानामगुणाः।

चरपोटा दीर्घपत्री कुन्तली तिलका मता ॥२८४॥
चरपोटा हिमा रूक्षा भेदिनी श्वासकासजित् ॥२८५॥

अथ द्रोणपुष्पीनामगुणाः।

द्रोणपुष्पी श्वसनकः पालिन्दी कुम्भयोनिका।
छत्राणी छत्रको द्रोणा कौडिन्यो वृत्तसारकः॥२८६॥
द्रोणपुष्पी गुरू रुचा स्वादूष्णा वातपित्तनुत्।
भेदिनी कामलाशोफकफक्रिमिहरा कटुः॥२८७॥

अथ ब्राह्मीब्राह्ममण्डूकीनामगुणाः।

ब्राह्मी सरस्वती सोमा सत्याह्वा ब्रह्मचारिणी।
मण्डूकपर्णी माण्डूकी त्वष्ट्री दिव्या महौषधी।
कपोतवेगा सुनिका लावण्या सोमवल्लरी॥२८८॥
ब्राह्मी हिमा सरा स्वादुर्लघुर्मेध्या रसायनी।
स्वर्या स्मृतिप्रदा कुष्ठपाण्डुमेहास्रकासजित्।
विषशोफज्वरहरा तद्वत् मण्डूकपर्णिनी॥२८९॥

अथ सुवर्चलाब्रह्मसुवर्चलानामगुणाः।

सुवर्चलाऽर्ककान्ता स्यात् सूर्य्यभक्ता सुखोद्भवा।
सूर्य्यावर्त्ता रविप्रीता त्वन्या ब्रह्मसुवर्चला॥२९०॥
सुवर्चला गुरु शीता मूत्रला कफवातजित्।
अन्योष्णा कुष्ठमेहाश्मकृच्छ्रज्वरहरा लघुः॥२९१॥

अथ मत्स्याक्षीनामगुणाः।

मत्स्याक्षी वालिका मत्स्यगन्धी मत्स्यादनी तथा।
मत्स्याक्षी ग्राहिणी शीता कुष्ठपित्तकफास्रनुत्॥२९२॥

अथ जलपिप्पलीनामगुणाः।

जलपिप्पल्यम्बुवल्ली यत्नूरं कच्छटस्तथा॥२९३॥
जलपिप्पलिका हृद्या चक्षुष्या शुक्रला लघुः।
संग्राहिणी हिमा रूक्षा रक्तदाहव्रणापहा॥२९४॥

अथ गोजिह्वानामगुणाः।

गोजिह्वा गोजिका गोभी दार्विका खरपर्णिनी॥२९५॥

गोजिह्वा वातला शीता ग्राहिणी कफपित्तनुत्।
हृद्या प्रमेहकासास्रव्रणज्वरहरा लघुः ॥२८६॥

अथ नागदमनीनामगुणाः।

नागाह्वादमनी नागगन्धा भुजगपर्णिनी ॥२८७॥
स्यान्नागदमनी वर्ण्या लूतासर्पविषापहा ॥२८८॥

अथ गुञ्जाद्वयनामगुणाः।

गुञ्जा शिखण्डिनी ताम्रा रक्तिका काकनासिका।
श्वेतान्या चक्रिका चूडा दुर्मुखा काकपीलुका ॥२८९॥
गुञ्जा केश्या बलकरा त्वच्या पित्तकफापहा।
नेत्रामयहरा हृद्या हन्ति कण्डूग्रहव्रणान्।
क्रिमीन् प्रलुप्तकुष्ठानि तद्वच्छ्वेतापि शस्यते ॥३००॥

अथ वेल्लन्तरनामगुणाः।

वेल्लन्तरो दीर्घपत्रो वीरद्रुर्बहुवारकः ॥३०१॥
वेलन्तरोऽश्मनुद् ग्राही कफमूत्रकृच्छ्रानिलार्त्तिजित् ॥३०२॥

अथ वन्दाकनामगुणाः।

वन्दाकः स्याद्वृक्षरुहा शेखरी कामवृक्षकः।
वृक्षादनी कामतरुः कामिनी पदरोहिणी ॥३०३॥
वन्दाकः कफवातास्रशोफव्रणविषापहः ॥३०४॥

अथ पिण्डारनामगुणाः।

पिण्डारः करहाटः स्यात् तीक्ष्णकोलः कुरङ्गकः ॥३०५॥
पिण्डारो मधुरः शीत. शोथपित्तकफापहः ॥३०६॥

अथ छिक्किकानामगुणाः।

छिक्किका क्षवक. क्रूरो नासासंवेदना पटुः ॥३०७॥
छिक्किका पित्तला कुष्ठक्रिमिवातकफापहा ॥३०८॥

अथ रोहितनामगुणाः।

रोहितो दाडिमीपुष्पो रोहितः कूटशाल्मलिः।

प्लीहारी रोहिणी रोही रक्तघ्न. पारिजातक. ॥३०९॥
रोहितक सरो गुल्मयकृत्प्लीहोदरापह. ॥३१०॥

अथ मोचरसनामगुणा ।

मोचक स्यान्मोचरस. शाल्मलीवेष्टक: स्मृत. ।
मोचनिर्यासक: पिच्छा मोचास्रावो च वेष्टक ॥३११॥
मोचक शीतलो ग्राही गुरुवृष्योऽतिसारजित् ।
प्रवाहकासपित्तास्रकफदाहनिवर्हण. ॥३१२॥

अथ अजगन्धानामगुणा ।

अजगन्धा वस्तगन्धा कवरी पूतववर्रः ॥३१३॥
अजगन्धा लघू रुच्या हृद्या तु कफवातनुत् ॥३१४॥

अथ सैरेयकनामगुणा. ।

सैरेयक सहचर सैरेय किङ्किरातक ।
दासी सहचर: झिण्टी शैर्यको मृदुकण्टक ॥३१५॥
रक्तपुष्प कुरुवक. पीतो ज्ञेय कुरुण्टक: ।
नील आर्त्तगल प्रोक्तो वाण वोदनपाक्यपि ॥३१६॥
सैरेय कुष्ठवातास्रकफकण्डूविषापह ।
तिक्तोष्णो मधुरोऽनम्ल सुस्निग्ध केशरञ्जन ॥३१७॥

अथ नीलश्वेतस्यन्दादयनामगुणा ।

श्वेतस्यन्दा श्वेतपुष्पा कटभिर्गिरिकर्णिका ।
सितापराजिता श्वेता विषघ्नी मेहनाशिनी ।
नीलस्यन्दा व्यक्तगन्धा नीलपुष्पा गवादनी ॥३१८॥
श्वेतस्यन्दाद्वयं शीत ग्रहघ्न दृष्टिकुष्ठनुत् ।
कुष्ठशूलविदोषामशोफव्रणविषापहम् ॥३१९॥

अथ इक्षुरनामगुणा ।

इक्षुर क्षुरिभाण्ड: कोकिलाक्ष क्षुर स्मृत ।
तैलकण्डस्तिचरिक्षुवालिका चेक्षुगन्धिका. ॥३२०॥

इक्षुरः शीतलो हृद्यो गुरुर्वातकफास्रजित् ॥३२१॥

अथ कार्पासनामगुणाः ।

कार्पासः पटशूलच्छादवनोवादरः पिचुः ॥३२२॥
कर्पासको लघुः कोष्णो मधुरो वातनाशनः ।
तद्बीजं स्तन्यदं हृद्यं स्निग्धं कफहरं गुरु ॥३२३॥

अथ आरामशीतलानामगुणाः ।

आरामशीतला देवी गन्धा कुक्कुरमर्दनः ॥३२४॥
आरामशीतला शीता कटुः पित्तकफास्रजित् ॥३२५॥

अथ कुक्कुरद्रुनामगुणाः ।

कुक्कुरद्रुस्ताम्रचूडः सूक्ष्मपत्रो मृदुच्छदः ॥३२६॥
कुक्कुरद्रुः कटुस्तिक्तो ज्वररक्तकफापहः ॥३२७॥

अथ वामीनामगुणाः ।

वामी शङ्खधरा वारि ब्राह्मी च छिलमोचिकः ॥३२८॥
वामी शोफहरा कुष्ठपित्तश्लेष्मानिलापहा ॥३२९॥

अथ शरपुङ्खानामगुणाः

शरपुङ्खा कालशाकं प्लीहारि कालको मतः ॥३३०॥
शरपुङ्खा यकृत्प्लीहदुष्टव्रणविषापहा ।
तिक्ता कषाया कासास्रश्वासज्वरहरा लघुः ॥३३१॥

अथ बलामोटानामगुणाः ।

बलामोटा चया सूक्ष्मपत्रा ज्ञेयापराजिता ॥३३२॥
बलामोटा विपघ्ने यकृच्छ्रतुहिजयप्रदा ॥३३३॥

अथ सुदर्शनानामगुणाः ।

सुदर्शना सोमवल्ली चक्राङ्का मधुपर्णिका ॥३३४॥
सुदर्शना स्वादुरुष्णा कफशोफास्रवातजित् ॥३३५॥

अथ मयूरशिखानामगुणाः

मयराङ्काशिखा ज्ञेया साहस्री मधुकच्छदा ॥३३६॥

मयूराङ्गशिखा लघ्वी पित्तघ्नातिसारजित् ॥३३७॥

अथ लक्ष्मणानामगुणाः ।

लक्ष्मणा पुत्रदा रक्ता बिन्दुपत्रा च नागिनी ।
गोचोरसदृशं पुष्पं रोमवल्लि समन्वितम् ।
रक्तबिन्दुसमं पुष्पं लक्ष्मणाकारमुच्यते ॥३३८॥
लक्ष्मणा गर्भदा शीता सरा हृद्या त्रिदोषनुत् ॥३३९॥

अथ मांसरोहिणीनामगुणाः ।

मांसरोहिण्यतिरुहा वृत्ता चर्मकसा वसा ॥३४०॥
स्यान्मांसरोहिणी वृष्या सरा दोषत्रयापहा ॥३४१॥

अथ अस्थिसंहारकनामगुणाः ।

अस्थिसंहारको वज्रवल्लरी क्रोष्टुघण्टिका ।
वज्राङ्गी ग्रन्थिमान् वज्रप्रोक्ता स्यादस्थिशृङ्खलाः ॥३४२॥
अस्थिसंहारकः शीतो वृष्यो वातहरोऽस्थियुक् ॥३४३॥

अथ अर्कद्वयनामगुणाः ।

अर्कः सूर्याह्वयः चीरी सदापुष्पो विकर्त्तणः ।
मन्दारो वसुकोलर्को राजार्को दीर्घपत्रकः ॥३४४॥
अर्कद्वयं शङ्खवातकुष्ठकण्डूविषव्रणान् ।
निहन्ति प्लीहगुल्मार्शोयकृत् श्लेष्मोदरक्रिमीन् ॥३४५॥

अथ करवीरद्वयनामगुणाः ।

करवीरोऽश्वहा श्वेतपुष्पः स्याच्छतपुष्पकः ।
रक्तपुष्पोऽपरश्चण्डो लगुडः करवीरकः ॥३४६॥
करवीरद्वयं नेत्ररोगकुष्ठव्रणापहम् ।
लघूष्णं क्रिमिकण्डूघ्नं भक्षितं विषवन्मतम् ॥३४७॥

अथ धत्तूरनामगुणाः ।

धत्तूरः कितवः धूर्त्तो देवता मदनः शठः ।
उन्मत्तो मातुलस्तूरी तरकः कनकाह्वयः ॥३४८॥

धत्तूरो मदवर्णाग्निवान्तिकुष्ठज्वरकुष्ठनुत् ।
उष्णो गुरुव्रणश्लेष्मकण्डूक्रिमिविषापहः ॥२४९॥

अथ कलिकारीनामगुणाः ।

कलिकारी वह्निमुखी लाङ्गली गर्भपातिनी ।
विशल्या हलिनी गौरी प्रमाता शक्रपुष्पिका ॥२५०॥
विद्युज्ज्वालाऽग्निजिह्वा च कथिता पुष्पसौरभा ।
वह्निशिखाऽग्निका ज्ञेया नक्तरन्ध्री च सा स्मृता ॥२५१॥
कलिकारी सरा कुष्ठशोफार्शोव्रणशूलजित् ।
तीक्ष्णोष्णा क्रिमिनुल्लघ्वी पित्तला गर्भपातिनी ॥२५२॥

अथ कुमारीनामगुणाः ।

कुमारी मण्डला माता गृहकन्याऽतिपिच्छला ।
रसायनी कण्टकिनी सवराख्या वनोद्भवा ॥२५३॥
कुमारी भेदिनी शीता यकृत्प्लीहकफज्वरान् ।
निहन्ति ग्रन्थिविस्फोटपित्तरक्तत्वगामयान् ॥२५४॥

अथ भङ्गानामगुणाः ।

भङ्गाऽऽज्ञा मातुलानी मोहिनी विजया जया ॥२५५॥
भङ्गा कफहरा तिक्ता ग्राहिणी दीपनी लघुः ।
तीक्ष्णोष्णापित्तलानाहमदकृद्वाऽग्निवर्द्धिनी ॥२५६॥

अथ काञ्चनीनामगुणाः ।

काञ्चनी शोणफलिनी काकायुः काकवल्लरी ॥२५७॥
काञ्चनी स्तन्यदा मूर्छाभ्ययादोषत्रयापहा ॥२५८॥

अथ दूर्वाद्वयनामगुणाः ।

दूर्वा शष्पा शीतकरी गोलोमी शतपर्विका ।
अन्या श्वेता श्वेतदण्डा मार्गवी दुर्मतादृशा ॥२५९॥
दूर्वा हिमा विसर्पास्रतृट्पित्तकफदाहजित् ॥२६०॥

अथ गण्डदूर्वानामगुणाः।

गण्डदूर्वा मत्स्यगन्धा मत्स्याक्षी शकुलादनी ॥३६१॥
गण्डदूर्वा हिमा लोहद्राविणी ग्राहिणी लघुः।
दाहतृष्णाबलासास्रकुष्ठपित्तज्वरापहा ॥३६२॥

अथ काशनामगुणाः।

काशः सुकाण्डः काशेक्षुः इक्षुगन्धः श्वेतचामरः।
इक्ष्वारिकेक्षुकाशश्च स चैवेक्षुरसः स्मृतः ॥३६३॥
काशकृच्छ्राश्मदाहास्रपित्तक्षयकरो हिमः ॥३६४॥

अथ कुशनामगुणाः।

दर्भो वर्हिः कुशस्तीक्ष्णः सूच्यग्रो यज्ञभूषणः ॥३६५॥
दर्भः कृच्छ्राश्मतृट्पित्तवस्तिनुत् कफरक्तजित् ॥३६६॥

अथ मुञ्जनामगुणाः।

मुञ्जः क्षुरा स्थूलदर्भो वाणाह्वो ब्रह्ममेखलः ॥३६७॥
मुञ्जोऽनुष्णो विसर्पास्रमूत्रवस्त्यक्षिरोगजित् ॥३६८॥

अथ नलनामगुणाः।

नलोरन्ध्री पुष्पमृत्युर्दमनोऽनन्तकः पिटः ॥३६९॥
नलो मूत्रार्त्तिदाहास्रकफपित्तविसर्पजित् ॥३७०॥

अथ वंशनामगुणाः।

वंशो वेणुः कीचकः स्यात् कर्मारस्त्वचिसारकः ॥३७१॥
वंशः सरो हिमः पित्तकफदाहास्रशोफजित्।
तत्करीरो गुरुर्भेदी स फलो वातपित्तजित्।
तयाथ भेदकोऽत्युष्णः कफघ्नो वातपित्तजित् ॥३७२॥

अथ जवानीनामगुणाः।

जवानी जवनी तीव्रा तुरुष्का मदकारिणी ॥३७३॥
जवानी जीवनी रूक्षा ग्राहिणी मादिनी गुरुः ॥३७४॥

अथ खसतिलनामगुणाः।

तिलभेदः खसतिलः शुभ्रपुष्पो लसत्फलः ॥३७५॥

हृष्यो बल्यः खसतिलः श्लेष्मलो वातजिद् गुरुः।

वल्कलस्तत्फलोद्भूतो रूक्षो ग्राही विशेषतः ॥३७६॥

अथ अहिफेननामगुणाः।

आफूकस्तद्रसोद्भूतमहिफेनं सफेनकम् ॥३७७॥

आफूकं शोषणं ग्राहि श्लेष्मघ्नं वातपित्तलम् ॥३७८॥

अथ छिलिहिण्टनामगुणाः।

छिलिहिण्टो महामूलः पातालो गरुडाह्वयः ॥३७९॥

छिलिहिण्ट' परं हृष्यः श्लेष्मलः पवनापहः ॥३८०॥

श्री राज्ञां सुखतिलकः कटारमल्ल-
स्तेन श्रीमदनत्रृपेण निर्मितेऽत्र।
ग्रन्थेऽभून्मदनविनोदनाम्नि पूर्णो
वर्गोऽयं ललितपदाङ्कितोऽभयादिः ॥३८१॥

इति अभयादिप्रथमवर्गः।

अथ शुण्ठ्यादिवर्गः।

श्री मद्रविराजितमध्यमनन्तं श्रीरुचिपरं परमधरमेकम्।
श्रीमदनक्षितिनाथ' सदा ते विष्णुपदं विपदं विनिहन्तु ॥१॥

अथ शुण्ठीनामगुणाः।

शुण्ठी विश्वौषधं विश्वं कटुभद्रं कटूत्कटम्।
महौषधं शृङ्गवेरं नागरं विश्वभेषजम् ॥२॥
शुण्ठी रुच्यामवातघ्नी पाचनी कटुका लघुः।
स्निग्धोष्णा मधुरा पाके कफवातविबन्धनुत् ॥३॥

हृद्या स्वर्या वमिश्वासकासशूलहृदामयान् ।
हन्ति श्लीपदशोफार्शमानाहोदरमारुतान् ॥४॥

अथ आर्द्रकनामगुणाः ।

कटूष्णं दीपनं हृद्यं रुच्यमार्द्रकनागरम् ।
श्वासकासवमीहिक्कावातघ्नं च विबन्धनुत् ॥५॥
पाचनं रोचनं हृद्यं कटूष्णं वह्निदीपनम् ।
वातप्रकोपशमनं पाचनं शोथहृत् परम् ॥६॥
भोजनादौ सदा पथ्यं जिह्वाकण्ठविशोधनम् ।
अध्यन्तरसवीर्यत्वात् तत्परन्तु कफापहम् ॥७॥
काञ्चिकार्द्रं सलवणं दीपनं पाचनं परम् ।
वातप्रकोपशमनं हर्षणं लवणार्द्रकम् ॥८॥

अन्यदपि ।

आर्द्रकं शृङ्गवेरन्तन्महौषधमुदाहृतम् ।
आर्द्रकं नागरगुणं भेदनं दीपनं गुरु ॥९॥

अथ मरिचनामगुणाः ।

मरीचं वह्निजं तीक्ष्णं मलिनं श्यामभूषणम् ॥१०॥
मरीचं कटुकं तीक्ष्णं दीपनं कफवातनुत् ।
उष्णं पित्तकरं रूक्षं श्वासशूलक्रिमीन् जयेत् ॥११
तदार्द्रं मधुरं पाके नात्युष्णं कटुकं गुरु ।
किञ्चित्तीक्ष्णगुणं श्लेष्मसेकि स्यादपित्तलम् ॥१२॥

अथ पिप्पलीनामगुणाः ।

पिप्पली चपला कृष्णा मागधी मगधा कणा ।
विश्वोपकुल्या वैदेही शौण्डी स्यात्तीक्ष्णतण्डुला ॥१३॥
पिप्पली दीपनी हृद्या स्वादुपाका रसायनी ।
अत्युष्णा कटुका स्निग्धा कफवातहरा लघुः ॥१४॥
पित्तला रेचनी हन्ति श्वासकासोदरज्वरान् ।

कुष्ठप्रमेहगुल्मार्शः श्वोहशूलाममारुतान् ।
आर्द्रा कफप्रदा स्निग्धा शीतला मधुरा गुरुः ॥१५॥

अथ त्र्यूषणचतुरूषणनामगुणाः ।

विश्वोपकुल्यामरिचैः त्र्यूषणं कटुकं कटु ।
व्योषं कटुत्रयं तत् स्यात् सग्रन्थि चतुरूषणम् ॥१६॥
त्र्यूषणं दीपनं हन्ति श्वासकासत्वगामयान् ।
गुल्ममेहकफस्थौल्यमेदःश्लोपदपीनसान् ॥१७॥

अथ पिप्पलीमूलनामगुणाः ।

कणामूलं कटुग्रन्थि· पिप्पलीमूलमूषणम् ।
षड्ग्रन्थि ग्रन्थिकं मूलं मागधं चटकाशिरः ॥१८॥
दीपनं पिप्पलीमूलं कटूष्णं पाचनं लघु ।
रूक्षं पित्तकरं भेदि कफवातोदरापहम् ॥१९॥

अथ चव्यतत्फलनामगुणाः ।

चव्यं चवणमुच्छिष्टश्चविका कोलवल्लिका ॥२०॥
पिप्पलीमूलवत् तस्याविशेषाद् गुदजापहम् ।
चव्यपुष्पं गरश्वासकासक्षयविनाशनम् ॥२१॥
तत्फलं श्रेयसी हस्तिमागधी गजपिप्पली ॥२२॥
गजकृष्णा कटुर्वातश्लेष्मनुत् वह्निवर्द्धिनी ।
उष्णा निहन्त्यतीसारं श्वासकण्ठामयक्रिमीन् ॥२३॥

अथ चित्रकनामगुणाः ।

चित्रको हुतभुग् व्यालो दारुणो दहनोऽरुणः ।
अग्निमाली हविःपाची वह्निनामा विशेषतः ॥२४॥
चित्रकः कटुकः पाके वह्निकृत्पाचनो लघुः ।
रूक्षोष्णो ग्रहणीकुष्ठशोफार्शः क्रमिकासजित् ।
श्लेष्मानिलहरो ग्राही तच्छाकं श्लेष्मवातनुत् ॥२५॥

अथ पञ्चकोलषडूषणनामगुणाः।

पिप्पली मागधीमूलचव्यनागरचित्रकैः।
पञ्चकोलं कफानाहगुल्मशूलारुचीन् जयेत् ॥२६॥
मरिचेनयुतं तत्तु षडूषणमुदाहृतम् ॥२७॥

अथ शतपुष्पाद्वयनामगुणाः।

शतपुष्पा शतव्होपा शताह्वा कारवी मिसिः।
अवाक्पुष्पी त्वचि छत्रा सेनिका मागधीऽपरा ॥२८॥
शतपुष्पा लघुस्तीक्ष्णा पित्तकृद्दीपनी कटुः।
उष्णा ज्वरानिलश्लेष्मव्रणशूलाक्षिरोगजित्।
सेनिका तद्गुणा प्रोक्ता विशेषाद् योनिशूलहृत् ॥ २९॥

अथ मिश्रेयानामगुणाः।

मिश्रेया मिशिशालीनौ शालो शीतशिवा मता ॥३०॥
मिश्रेया दीपनी हृद्या बद्धविट्क्रिमिशुक्रनुत्।
रूक्षोष्णा तत्फलं कासवमिश्लेष्मानिलान् जयेत् ॥३१॥

अथ वनमेथीनामगुणाः।

मेथिका वस्तिका शेलुरहिस्थी वनमेथिका ॥३२॥
अहिस्थोऽल्पगुणस्तद्वत् वाजिनां स तु पूजितः ॥३३॥

अथ अजमोदानामगुणाः।

अजमोदाऽत्युग्रगन्धा मोदा हस्ति मयूरकः।
खराह्वा कारवी वह्नी वस्तमोदा च मर्कटः ॥ ३४ ॥
अजमोदा कटुस्तीक्ष्णा दीपनी कफवातनुत्।
उष्णा विदाहिनी हृद्या वृष्या बलमला लघुः।
नेत्रामयक्रमिच्छर्दिहिक्कावस्तिरुजो जयेत् ॥३५॥

अथ जीरकत्रितयनामगुणाः।

जीरकं दीर्घकं शुक्लमजाजी कणजीरकम् ॥३६॥
जीरकं जरणं कृष्णं वर्षाकालो सुगन्धिकम् ॥३७॥

कालिका बाष्पिका कुञ्चिः कारवी चोपकुञ्चिका।
पृथ्वीका सुसवी पृथ्वी स्थूलजाज्यु पकालिका ॥३८॥
जीरकत्रितयं रूक्षं कटूष्णं दीपनं लघु।
संग्राहि पित्तलं मेध्यं गर्भाशयविशुद्धिकृत्।
चक्षुष्यं पवनाध्मानगुल्मच्छर्दिबलासजित् ॥३९॥

अथ यवानीनामगुणाः।

यवानी दीप्यको दीप्यो दीपनीया यवानिका।
यवसाह्वोग्रगन्धा स्यात् यवाह्वा भूकदम्बकः ॥४०॥
यवानी पाचनी रुच्या तीक्ष्णोष्णा कटुका लघुः।
वातश्लेष्मोदरानाहगुल्मशूलक्रिमीन् जयेत् ॥४१॥

अथ यवानिका(खोरासानी)नामगुणाः।

यवानिका यवानी स्याच्चौहारो जन्तुनाशनः ॥४२॥
चौहारस्तत् गुणः प्रोक्तो विशेषात् क्रिमिनाशनः ॥४३॥

अथ अजगन्धानामगुणाः।

अजगन्धा पूतिकीटा वर्वरी पूतिवर्वरः।
कारवी खरपुष्पा च तुङ्गी पूतिमयूरिका ॥४४॥
अजगन्धा कटुस्तीक्ष्णा रूक्षा हृद्याऽग्निवर्द्धनी।
दृष्टिमान्द्यप्रदा लघ्वी शुक्रवातकफापहा ॥४५॥

अथ वचानामगुणाः।

वचोग्रगन्धा गोलोमी षड्ग्रन्था जटिला मता।
जटिला शतपर्वाऽन्या लोमशा हैमवत्यपि ॥४६॥
वचोष्णा कटुका तिक्ता वामनी स्वरवह्निकृत्।
अपस्मारकफोन्मादभूतशूलानिलान् जयेत् ॥४७॥

अथ हपुषानामगुणाः।

हपुषा वपुषा विस्रा विगन्धा विस्रगन्धिका ॥४८॥

हपुषा दीपनी तिक्ता कटूष्णा तुवरा गुरुः ।
पित्तोदरसमीरार्शोग्रहणीशोफगुल्मजित् ॥४६॥

अथ विडङ्गनामगुणाः ।

विडङ्गं जन्तुहननं क्रिमिघ्नं क्षुद्रतण्डुला ।
भूतघ्नी तण्डुला घोषा कराला मृगगामिनी ॥५०॥
विडङ्गं कटु तिक्तोष्णं रूक्षं वह्निकरं लघु ।
गुल्माध्मानोदरश्लेष्मक्रिमिवातविबन्धनुत् ॥५१॥

अथ धान्याकनामगुणाः ।

धान्याकं धान्यकं धान्यं धानेयञ्च वितुन्नकम् ।
कुस्तुम्बुरु तदार्द्रं तु धानी धानेयकालुका: ॥५२॥
धान्यकं तुवरं स्निग्धमहृद्यं मूत्रलं लघु ।
हृद्यं रूक्षं बद्धविट्कं स्वादु पाके त्रिदोषनुत् ॥५३॥
पाचनं श्वासकासासतृष्णामार्शः क्रिमीन् जयेत् ।
आर्द्रन्तु तद्गुणा स्वादुर्विशेषात्पित्तनाशिनी ॥५४॥

अथ हिङ्गुपत्रीद्वयनामगुणाः ।

हिङ्गुपत्री पृथुस्तन्वी पृथ्वीका दारुपत्रिका ।
वाष्पिका कारवी तन्वी विल्विका दीर्घिका तथा ॥५५॥
हिङ्गुपत्र्यपरा वेणुपत्री हिङ्गु शिवाटिका ।
जन्तुका रामठी नाडी पिण्डा हिङ्गुफला मता ॥५६॥
हिङ्गुपत्रीद्वयं हृद्य तीक्ष्णोष्णं पाचनं कटु ।
हृद्वस्तिरुक् विबन्धार्शःश्लेष्मगुल्मानिलापहम् ॥५७॥

अथ हिङ्गुनामगुणाः ।

हिङ्गुर्बाह्लीकमत्युग्रं रामठं भूतनाशनम् ।
अगूढगन्धा जरणं जन्तुघ्नं सूपधूपनम् ॥५८॥
हिङ्गूष्णं पाचनं रुच्यं तीक्ष्णोष्णं कफवातनुत् ।
शूलगुल्मोदरानाहक्रिमिजित् पित्तवर्द्धनम् ॥५९॥

अथ वंशलोचनानामगुणाः।

वंशजा वैणवी क्षीरी त्वक्क्षीरी वंशलोचना।
तुगाक्षीरी तुगावंशी वंशक्षीरी शुभा सिता ॥६०॥
वंशजा बृंहणी हृष्या शीतला मधुरा जयेत्।
तृष्णाक्षयज्वरश्वासकासपित्तास्रकामलान् ॥६१॥

अथ सैन्धवनामगुणाः।

सैन्धवं सिन्धुजं शुद्धं माणिमन्थं पटूत्तमम् ॥६२॥
सैन्धवं मधुरं हृद्यं दीपनं शीतलं लघु।
चक्षुष्यं पाचनं स्निग्धं हृद्यं दोषत्रयापहम् ॥६३॥

अथ सौवर्चलनामगुणाः।

सौवर्चलं सुगन्ध्याख्यं रुचकं हृद्यगन्धकम् ॥६४॥
सौवर्चलं वह्निकरं कटूष्णं विशदं लघु।
उद्गारशुद्धिदं सूक्ष्मं विबन्धानाहशूलजित् ॥६५॥

अथ विडनामगुणाः।

विडं कृत्रिमकं पाक्यं धूर्त्तं द्राविडमासुरम् ॥६६॥
विडं लघूष्णं विष्टम्भि शूलहृद्गौरवारुचीः।
हन्त्यानाहकफौ शूलमधोवातानुलोमनम् ॥६७॥

अथ सामुद्रकनामगुणाः।

सामुद्रं वारिसम्भूतमक्षीवमासुरं तथा ॥६८॥
सामुद्रं दीपनं स्वादु नात्युष्णं भेदनं कटु।
श्लेष्मलं वातनुत् तिक्तमरूक्षं नातिपित्तलम् ॥६९॥

अथ औद्भिदनामगुणाः।

औद्भिदं भूमिजं भौमं पार्थिवं पृथिवीभवम् ॥७०॥
औद्भिदं क्षारं सूक्ष्मं लघु वातानुलोमनम् ॥७१॥

अथ गण्डनामगुणाः।

गण्डाख्यं रोमलवणं रौमं शाकम्भरीभवम् ॥७२॥

गण्डाख्य लघु वातघ्नमल्पुष्णं भेदि मूत्रलम् ॥७३॥

अथ चारनामगुणाः ।

चार पांशुभव लौयमौषर पाशव वसु ॥७४॥

चार गुरु कटु स्निग्ध श्लेष्मल वातनाशनम् ॥७५॥

अथ काचलवणनामगुणाः ।

काच त्रिकूट पाक्याख्य लवण काचसम्भवम् ॥७६॥

काच दीपनमल्पुष्णं रक्तपित्तविवर्द्धनम् ॥७७॥

अथ यवचारस्वर्जिकाचारनामगुणाः ।

यवचार शूकपाक्यौ यवशूको यवाग्रज ॥७८॥

स्वर्जिका स्वर्जिकापाक्य सुखपाक्य सुवर्चिका ॥७९॥

यवचारोऽग्निकृत् वातश्लेष्मश्वासगलामयान् ।

पामामार्शोग्रहणीगुल्मयकृत्प्लीहरुजो जयेत् ॥८०॥

स्वर्जिकाऽन्यगुणा तस्माद्विशेषात् गुल्मशूलनुत् ॥८१॥

अथ टङ्कणनामगुणाः ।

टङ्कणो मालतीजातो द्रावी लौहविशुद्धिद ॥८२॥

टङ्कणोऽग्निकरो रूक्ष कफघ्नो वातपित्तजित् ॥८३॥

अथ सुधाचार(चूर्ण)नामगुणाः ।

सुधाह्वय सुधा सौधभूषण कटुशर्करा ॥८४॥

सुधाचारोऽग्निसङ्काश पाकी क्लेदी विदारण ॥८५॥

अथ सर्वचारनामगुणाः ।

पलाशतिलनालखदङ्गकाकदलीभवा ।

अपामार्गोऽर्कसङ्कुण्डामोचकादिसमुद्भवा ॥८६॥

चारा वह्निसमा सर्वे पाचना भेदिदारणाः ।

लघव क्लेदिनस्तीक्ष्णा शुक्रला दृष्टिनाशना ॥८७॥

रक्तपित्तकरा घ्नन्ति विरुन्धानाहपीनसान् ।

यकृत्प्लीहशलाशामगुल्माशाग्रहणीक्रिमीन् ॥८८॥

यो राज्ञां मुकुटतिलकः कटारमल्ल-
स्तेन श्रीमदनमृपेण निर्मितेऽस्य ।
यन्थेऽभून्मदविनोदनाम्नि पूर्णः
शुण्ठ्यादिः खलु भिषजां हिताय वर्गः ॥८८॥
इति शुण्ठ्यादि द्वितीयवर्गः ।

अथ कर्पूरादिवर्गः।

पारीण्यो पाणी नवयज्ञयीभि-
र्यानं विनोदात्परिचुम्बिताम्यम् ।
श्रीष्ठं पिबन्तं प्रतिषद्दन्त-
मायव्युक्तं हरिमाश्रयामि ॥ १ ॥

अथ कर्पूरनामगुणाः ।

कर्पूरः स्फटिकश्चन्द्रः सिताभ्रो हिमवालुकः ।
हिमोपलः शीतरश्मी भूतिकस्तु हिमाह्वयः ।
हिमाह्वो घनसारश्च चन्द्राह्वयापि गीयते ॥ २ ॥
कर्पूरः शीतलो दृष्यश्चक्षुष्यो लेखनो लघुः ।
कफदाहास्यवैरस्यमेदःशोषविषापहः ॥ ३ ॥

अथ कस्तूरिकाद्वयनामगुणाः ।

कस्तूरिका मृगमदो वेधमुख्या मृगाण्डजः ।
मृगनाभिरथाऽन्या स्याल्लताकस्तूरिका मता ॥ ४ ॥
कस्तूरी शुक्रला गुर्वी कटुका कफशीतजित् ।
उष्णा हन्ति विषच्छर्दिशोषदौर्गन्ध्यमारुतान् ॥ ५ ॥
लताकस्तूरिका तद्वत् वरा शीता लघुस्तथा ॥ ६ ॥

अथ मार्जारीनामगुणाः ।

मार्जारी पूतिका पूतिकजा स्याद् गन्धचेलिका ॥ ७ ॥
मार्जारी कान्तिमाधत्ते चक्षुष्या कफवातजित् ॥८॥

अथ श्वेतचन्दननामगुणाः।

चन्दनं तिलपर्णं स्याग्महार्हं श्वेतचन्दनम्।
भद्रश्रियं मलयजं गोशीर्षं गन्धसारकम्॥ ९॥
चन्दनं शीतलं रूक्षं तिक्तमाह्लादनं लघु।
हृद्यं वर्ण्यं विषघ्नं श्लेष्मपित्तास्रदाहजित्॥ १०॥

अथ रक्तचन्दननामगुणाः।

रक्तचन्दनमुद्दिष्टं लोहितं क्षुद्रचन्दनम्।
ताम्रसारं रक्तसारं ज्योतिःसोमश्च रञ्जनम्॥ ११॥
रक्तं शीतं गुरु स्वादु छर्दितृष्णास्रपित्तनुत्।
तिक्तं नेत्रहितं वृष्यं ज्वरव्रणविषापहम्॥ १२॥

अथ पीतचन्दननामगुणाः।

कालीयकं पीतसारं पीतं नारायणप्रियम्॥ १३॥
कालीयकं रक्तगुणं विशेषात् पवनापहम्॥ १४॥

अथ कृष्णागुरुनामगुणाः।

कृष्णागुरु स्यादगुरु राजार्हं विश्वरूपकम्।
लोहकं शीतमलिनं क्रिमिजग्धमनार्यकम्॥१५॥
कृष्णागुरूष्णं कर्णाक्षिरोगनुत्पित्तलं लघु॥ १६॥

अथ कुङ्कुमनामगुणाः।

कुङ्कुमं चारु बाह्लीकं वर्ण्यमग्निशिखं वरम्।
काश्मीरं पीतमम्लाङ्ग सङ्कोच पिशुनारुणम्॥ १७॥
कुङ्कुमं कटुकं स्निग्धं शिरोरुग्व्रणजन्तुजित्।
उष्णं हास्यकरं वर्ण्यं व्यङ्गदोषत्रयापहम्॥ १८॥

अथ सिह्लकनामगुणाः।

सिह्लकः कपिजो धूम्रस्तुरुष्कः पिण्डितः कपिः॥१९॥
सिह्लकः कुष्ठकण्डूघ्नः स्निग्धोष्णः शुक्रकान्तिकृत्॥२०॥

यो राज्ञां मुकुटतिलकः कटारमल्ल-
स्तेन श्रीमदनन्नृपेण निर्मितेऽस्य ।
यन्थेऽभूम्मदविनोदनाम्नि पूर्णः
शुण्ठ्यादिः स्वनु भिषजो हिताय वर्गः ॥८८॥
इति शुण्ठ्यादि द्वितीयवर्गः ।

अथ कर्पूरादिवर्गः ।

आरोप्यो पाणी नवयज्ञसोभि-
र्बालं विनोदात्परिचुम्बितास्यम् ।
श्रोत्रं पिबन्तं प्रतिबद्धदन्त-
मायर्थ्ययुक्तं हरिमाश्रयामि ॥ १ ॥

अथ कर्पूरनामगुणाः ।

कर्पूरः स्फटिकश्चन्द्रः सिताभ्रो हिमवालुकः ।
हिमोपलः शीतरजो भूतिकश्च हिमाह्वयः ।
हिमांशुर्घनसारश्च चन्द्राह्वयापि गीयते ॥ २ ॥
कर्पूरः शीतलो हृद्यश्चक्षुष्यो लेखनो लघुः ।
कफदाहास्यवैरस्यमेदःशोथविषापहः ॥ ३ ॥

अथ कस्तूरिकाद्वयनामगुणाः ।

कस्तूरिका मृगमदो वेधमुख्या मृगाण्डजः ।
मृगनाभिरथान्या स्याल्लताकस्तूरिका मता ॥ ४ ॥
कस्तूरी शुक्रला गुर्वी कटुका कफशीतजित् ।
उष्णा हन्ति विषच्छर्दिशोफदौर्गन्ध्यमारुतान् ॥ ५ ॥
लताकस्तूरिका तद्वद्वरा शीता लघुस्तथा ॥ ६ ॥

अथ मार्जारीनामगुणाः ।

मार्जारी पूतिका पूतिकजा स्याद् गन्धचेलिका ॥ ७ ॥
मार्जारी कान्तिमाधत्ते चक्षुष्या कफवातजित् ॥८॥

हृद्रोगविषवस्त्यास्यविरोदग् वमिकासनुत् ॥३५॥

अथ गुडत्वचनामगुणाः।

त्वचं वराङ्गं शकलं त्वग्चोचं तनुक वरम्।
लटपर्णं घनं भृङ्गं गुड़त्वक् स्वर्णभूमिकम् ॥३६॥
त्वचं लघूष्णं कटुकविषदं स्वादु पित्तलम्।
हृद्वस्तिरोगवातार्शःपीनसक्रिमिशुक्रनुत् ॥३७॥

अथ तेजपत्रनामगुणाः।

पत्र दलाह्वं तापसं तमालं रोम रोमशम् ॥३८॥
पत्रमुष्णं लघु श्लेष्मह्नासार्शोऽनिलापहम् ॥ ३९॥

अथ नागकेशरनामगुणाः।

नागकेशरक नागं चाम्पेय केशरङ्कजम् ॥४०॥
नागकेशरक रूक्षमुष्णं लघ्वामपाचनम्।
दौर्गन्ध्यकुष्ठवीसर्पकफपित्तविषापहम् ॥ ४१ ॥

अथ त्रिजातचतुर्जातनामगुणाः।

एलादि त्रिभिरुद्दिष्ट त्रिजात त्रिसुगन्धिकम् ॥४२॥
चतुर्जात सनागं तद्दय वातकफापहम् ॥४३॥

अथ तालीसपत्रनामगुणाः।

तालीसपत्र तालीस धात्रीपत्र शुकोदरम्।
अपर ग्रन्थिकापत्र पत्राढ्य तुलसीच्छदम् ॥४४॥
तालीस लघु तीक्ष्णोष्णं श्वासकासकफानिलान्।
रुच्यं निहन्ति गुल्मामवह्निमान्द्यक्षयामयान् ॥४५॥

अथ सरलनामगुणाः।

सरलो मदनखण्डो नमेरुः पीतद्रुचकः ॥४६॥
सरल: कण्ठकर्णाक्षिगदघ्नोष्णो लघुः कटुः ॥४७॥

अथ श्रीवासनामगुणाः।

श्रीवासो वेष्टको दासो श्रीनिवासः कलिद्रुमः ॥४८॥

अथ एलवालुकनामगुणाः ।

एलवालुकमेल्यालु वालुकं हरिवालुकम् ॥२१॥
एल्यालु शीतलं हन्ति कण्डूकुष्ठकफक्रिमीन् ।
तृट्छर्दिकफपित्तास्रहृन्मूत्रगदजित् लघुः ॥ २२ ॥

अथ जातीफलनामगुणाः ।

जातीफलं जातीकोषं शालूकं मालतीसुतम् ॥२३॥
जातीफलं लघु स्वर्यं हृद्यं दीपनपाचनम् ।
उष्णं कफानिलच्छर्दिक्रिमिपीनसकासजित् ॥ २४ ॥

अथ जातीपत्रीनामगुणाः।

जातीपत्री जातीपर्णी मालतीपत्रिका तथा ॥२५॥
जातीपत्री लघूष्णा स्यात् कफक्रिमिविषापहा ॥ २६ ॥

अथ लवङ्गनामगुणाः ।

लवङ्गं शेखरं दिव्यं लवं चन्दनपुष्पकम् ।
श्रीपुष्पं देवकुसुमं भृङ्गारं वारिसम्भवम् ॥ २७ ॥
लवङ्गं लघु चक्षुष्यं हृद्यं दीपनपाचनम् ।
शूलानाहकफश्वासकासच्छर्दिक्षयापहम् ॥ २८ ॥

अथ कङ्कोलनामगुणाः ।

कङ्कोलं कटुकं कोलं मारीचं माधवोचितम् ॥२८॥
कङ्कोलमुष्णं हृद्रोगकफवाताग्निमान्द्यजित् ॥ ३० ॥

अथ सूक्ष्मैलानामगुणाः ।

एला त्रुटिश्चन्द्रबाला बहुला निष्कुटिस्त्रुसा ।
कपोतवर्णा सूक्ष्मैला कोरङ्गो द्राविड़ी मता ॥३१॥
एला सूक्ष्मा कफश्वासकासार्शोमूत्रकृच्छ्रहृत् ॥ ३२ ॥

अथ स्थूलैलानामगुणाः ।

स्थूलैला त्रिपुटा कन्या भद्रैला त्रिदिवोद्भवा ॥३३॥
स्थूलैला रोचनी तीक्ष्णा लघूष्णा कफपित्तजित् ॥३४॥

ह्रृल्लासविषवक्त्रास्यशिरोरुग् वमिकासनुत् ॥३५॥

अथ गुडत्वचनामगुणाः।

त्वच वराङ्गं शकलं त्वग्चोचं तनुक वरम्।
लटपर्णं घनं भङ्गं गुडत्वक् स्वर्णभूमिकम् ॥३६॥
त्वचं लघूष्णं कटुकविषदं स्वादु पित्तलम्।
हृदस्थिरोगवातार्शःपीनसक्रिमिशुक्रनुत् ॥३७॥

अथ तेजपत्रनामगुणाः।

पत्र दलाह्वं तापसं तमाल रोम रोमशम् ॥३८॥
पत्रमुष्णं लघु श्लेष्मह्ल्लासार्शोऽनिलापहम् ॥३९॥

अथ नागकेशरनामगुणाः।

नागकेशरक नाग चाम्पेय केशरङ्गजम् ॥४०॥
नागकेशरक रूक्षमुष्णं लघ्वामपाचनम्।
दौर्गन्ध्यकुष्ठवीसर्पकफपित्तविषापहम् ॥ ४१ ॥

अथ त्रिजातचतुर्जातनामगुणाः।

एलादि त्रिभिरुद्दिष्ट त्रिजात त्रिसुगन्धिकम् ॥४२॥
चतुर्जात सनाग तद्दय वातकफापहम् ॥४३॥

अथ तालीसपत्रनामगुणाः।

तालीसपत्र तालीस धात्रीपत्र शुकोदरम्।
अपर ग्रन्थिकापत्र पत्राढ्य तुलसीच्छदम् ॥४४॥
तालीस लघु तीक्ष्णोष्ण श्वासकासकफानिलान्।
रुच्यं निहन्ति गुल्मामवह्निमान्द्यक्षयामयान् ॥४५॥

अथ सरलनामगुणाः।

सरलो मदनयष्टी नमेरु पीतवृक्षकः ॥४६॥
सरल कण्ठकर्णाक्षिगदघ्नोष्णो लघुः कटुः ॥४७॥

अथ श्रीवासनामगुणाः।

श्रीवासो वेष्टको दासो श्रीनिवास. कलिद्रुम ॥४८॥

योवास: कफमूर्द्धार्त्तिरोगवातहर: सर: ॥४८॥

अथ वालकनामगुणाः

वालक वारि ह्रीवेरम्भिङ्गमाचमनं कचम्।
उदीच्यं यत्नमन्याङ्गं वर्हिष्ठं गन्धमूलकम् ॥५०॥
वालक शीतलं रूक्षं लघु दीपनपाचनम्।
रक्तपित्तज्वरश्लेष्मदाहतृष्णाव्रणापहम् ॥५१॥

अथ जटामांसीद्वयनामगुणाः।

मांसी जटा भूतकेशी क्रव्यादा नलदं शिखा ॥५२॥
क्रव्यादाऽन्या पूतनाकेशी गन्धमांसी पिशाचिका ॥५३॥
मांसी हिमा त्रिदोषास्रदाहवीसर्पकुष्ठजित् ॥५४॥

अथ उशीरनामगुणाः।

उशीरमभय सेव्यं वीरं वीरणमूलिका ॥५५॥
उशीर पाचन शीत स्तम्भन कफपित्तजित्।
तृष्णास्रविषवीसर्पदाहकृच्छ्रव्रणापहम् ॥५६॥

अथ रेणुकानामगुणाः।

रेणुका कपिला कौन्ती पाण्डुपत्री हरेणुका ॥५७॥
रेणुका पित्तला मेध्या वह्निकृत् गर्भपातिनी ॥५८॥

अथ प्रियङ्गुनामगुणाः।

प्रियङ्गु फलिनी श्यामा कान्ताह्वा नन्दिनी लता ॥५९॥
प्रियङ्गुः शीतलो वान्तिदाहपित्तज्वरास्रजित्।
मुखकान्तिप्रजननो गात्रदौर्गन्ध्यनाशनः ॥६०॥

अथ परिपेलनामगुणाः।

परिपेल प्लव धन्य गुप्ताद्र परिपेलवम् ॥६१॥
परिपेलं हिम वाण्डुकुष्ठास्रकफपित्तजित् ॥६२॥

अथ शैलेयनामगुणाः।

शैलेयं स्थविर हृद्य शिलापुष्प शिलोद्भवम् ॥६३॥

शैलेयं शीतलं हृद्यं कफपित्तहरं लघु ॥ ६४ ॥

अथ लामज्जकनामगुणाः ।

लामज्जकं जलाधारं दीर्घमूलं जलाशयम् ।
इष्टकापथकं शीघ्रमस्रणालं सुनालकम् ॥ ६५ ॥
लामज्जकं हिमं कृच्छ्रदाहदोषत्रयास्रजित् ॥ ६६ ॥

अथ कुन्दुरुनामगुणाः ।

कुन्दुरुर्मैचकः कुन्दः गोपुरो भीषणो बली ॥ ६७ ॥
कुन्दुरुः स्वेदपवनघ्नो ग्रहभज्वरापहः ॥ ६८ ॥

अथ गुग्गुलुनामगुणाः ।

गुग्गुलुः कालनिर्य्यासो महिषाक्षः पलङ्कषः ।
जटायुः कौशिको धूर्त्तो देवधूपः शिवः पुरः ॥ ६९ ॥
गुग्गुलुर्विशदस्तिक्तो वीर्य्योष्णो मधुरः सरः ।
भग्नसन्धानकृद् हृद्यः सूक्ष्मः स्वर्य्यो रसायनः ॥ ७० ॥
दीपनः पिच्छलो बल्यः कफवातव्रणापचीः ।
मेदोमेहाश्मवातास्र क्लेदकुष्ठाममारुतान् ॥ ७१ ॥
पिडकाग्रन्थिशोफार्शोगण्डमालाक्रिमीन् जयेत् ।
स नवो बृंहणो हृद्यः पुराणस्त्वतिलेखनः ॥ ७२ ॥

अथ रालानामगुणाः ।

राला सर्जरसो यक्षधूपसर्जोऽग्निवल्लभः ।
ललनः सालनिर्य्यासो कल. कललजश्च सः ॥ ७३ ।
राला हिमा गुरुस्तिक्ता कषाया ग्राहिणी जयेत् ।
दोषास्रस्वेदवीसर्पविषव्रणविपादिकाः ॥ ७४ ॥

अथ स्थौणेयकनामगुणाः ।

स्थौणेयकं बर्हिचूडं शुकवर्हं शुकच्छदम् ॥ ७५ ॥
स्थौणेयं शीतलं हृद्य मेध्यं दोषत्रयास्रजित् ॥ ७६ ॥

अथ चोरकनामगुणाः।

चोरकः कितवश्चण्डा दुष्पत्रः शङ्कितो रिपुः ॥ ७७ ॥
चोरः स्वादुर्लघुः शीतः कुष्ठवातकफास्रजित् ॥ ७८ ॥

अथ सुरानामगुणाः।

सुरा गन्धवती दैत्या गन्धाढ्या सुरभिः कुटिः ॥ ७९ ॥
सुरा शीता लघुः कुष्ठग्रहपित्तानिलास्रजित् ॥ ८० ॥

अथ कर्चुरनामगुणाः।

कर्चूरो द्राविडो गन्धमूलको दुर्लभः शटी ॥ ८१ ॥
कर्चूरो दीपनो रुच्यः कुष्ठार्शोव्रणकासजित्।
उष्णो लघुर्जयेत् श्वासगुल्मवातकफक्रिमीन् ॥ ८२ ॥

अथ शटीनामगुणाः।

शटी पलाशी षड्ग्रन्था सुव्रता गन्धमूलिनी ॥ ८३ ॥
शटी तिक्ता ज्वरामास्रकासजिद् ग्राहिणी लघुः ॥ ८४ ॥

अथ स्पृक्कानामगुणाः।

स्पृक्काऽसृक् ब्राह्मणी देवी निर्माल्या कोटिका वधूः ॥८५॥
स्पृक्का स्वादु हिमा हृद्या कुष्ठाऽश्मरीत्रिदोषनुत ॥ ८६ ॥

अथ ग्रन्थिपर्णनामगुणाः।

ग्रन्थिपर्णो नीलपुष्पः शुकपुष्पं शुकच्छदम् ॥ ८७ ॥
ग्रन्थिपर्णो लघुस्तिक्तः कटूष्णः कफवातजित् ॥ ८८ ॥

अथ नलिकानामगुणाः।

नलिका नर्त्तकी शून्या निर्मथ्या धमनी नटी ॥ ८९ ॥
नली पित्तास्रजित् शीता लघुर्या कुष्ठकण्डूजित् ॥९०॥

अथ पद्मकनामगुणाः।

पद्मक माल्यदारुपीतरक्तश्च सुप्रभः ॥ ९१ ॥
पद्मकं दाहविस्फोटकुष्ठश्लेष्मास्रपित्तहृत्।
गर्भसंस्थापनं शीतं छर्द्यायोसर्पदाहजित् ॥९२॥

अथ प्रपौण्डरीकनामगुणाः ।

प्रपौण्डरीकं पौण्ड्राह्वं शतपुष्पं सुपुष्पकम् ॥९३॥
पौण्ड्राह्वं शुक्रलं शीतं चक्षुष्यं श्लेष्मपित्तजित् ॥९४॥

अथ तगरद्वयनामगुणाः ।

तगरं वर्हिणं जिह्मं वक्राह्वं नहुषं नतम् ।
अपरं पिण्डतगरं दीनं कटु महोरगम् ॥९५॥
तगरं मधुरं स्निग्धं तिक्तोष्णं लघु भूतजित् ।
विषापस्मारमूर्द्धाक्षिरोगदोषत्रयापहम् ॥९६॥

अथ गोरोचनानामगुणाः ।

गोरोचना रुचिर्गौरी रोचना पिङ्गला मता ।
मङ्गल्या गौतमी मेध्या वन्द्या गोपित्तसम्भवा ॥९७॥
रोचना शीतला वश्या गर्भस्रावग्रहास्रजित् ॥९८ ॥

अथ नखद्वयनामगुणाः ।

नखाह्वो नखरः शुक्तिः हनुर्नागहनुः खुरः ।
शफः शङ्खो व्याघ्रनखमन्यत् व्याघ्रतलं पदम् ॥९९॥
नखद्वयं ग्रहघ्नं मवातास्रज्वरकुष्ठजित् ।
लघूष्णं शुक्रलं वर्ण्यं हृद्यं स्वादु विषापहम् ॥१००॥

अथ पत्तङ्गनामगुणाः ।

पत्तङ्गं पट्टरागं स्याद्रक्तकाष्ठं कुचन्दनम् ।
सुरङ्गदं सुरङ्गञ्च पत्तूरं पट्टरञ्जकम् ॥१०१॥
पत्तङ्गं मधुरं शीतं पित्तघ्नं व्रणास्रजित् ॥१०२॥

अथ लाक्षाऽलक्तकनामगुणाः ।

लाक्षा निर्भर्त्सना रक्ता द्रुमव्याधिः पलङ्कषा ।
क्रिमिजा जतु दीप्ताह्वा यावकोऽलक्तको मतः ॥१०३॥
लाक्षा वर्ण्या हिमा बल्या स्निग्धा श्लेष्मास्रपित्तजित् ।
व्रणोरःक्षतवीसर्पक्रिमिकुष्ठगदापहा ॥१०४॥

अनन्तको गुणैस्तद्वद्विशेषाद्व्यङ्गनाशनः ॥१०५॥

अथ पर्पटीनामगुणाः।

पर्पटी रञ्जनी कृष्णा जतुका जननी जनी ॥१०६॥
पर्पटी वर्णदा शीता कफपित्तास्रकुष्ठजित् ॥१०७॥

अथ पद्मिनीकैरविणीनामगुणाः।

पद्मिनी बिसिनी ज्ञेया नलिनी सूर्यवल्लभा ॥१०८॥
कुमुद्वती कैरविणी कुमुदिन्युडुपप्रिया ॥१०९॥
पद्मिनी शीतला गुर्वी पित्तघ्नी विषयासृजित्।
रूक्षा विष्टम्भिनी स्वादुस्तद्वत् कुमुदिनी मता ॥११०॥

अथ पद्मचारिणीनामगुणाः।

पद्मचारिण्यतिचरा पद्माह्वा चारटी मता ॥१११॥
पद्माऽनुष्णा कटुस्तिक्ता कषाया कफवातजित्।
मूत्रकृच्छ्राश्मशूलघ्नी श्वासकासविषापहा ॥११२॥

अथ श्वेतकमलनामानि।

कमलं श्वेतमम्भोजं सारसं सरसीरुहम्।
सहस्रपत्रं श्रीगेहं शतपत्रं कुशेशयम् ॥११३॥
पङ्केरुहं तामरसं राजीवं पुष्कराह्वयम्।
अब्जमम्भोरुहं पद्मं पुण्डरीकं च पङ्कजम्।
नलं सरोजं नलिनमरविन्दं महोत्पलम् ॥११४॥

अथ रक्तोत्पलनामानि।

रक्तोत्पलं कोकनदं हल्लकं रक्तसन्ध्यकम् ॥११५॥

अथ नीलोत्पलनामानि।

नीलोत्पलं कुवलयं भद्रमिन्दीवरं मतम् ॥ ११६ ॥

अथ कुमुदनामानि।

श्वेतं कुवलयं प्रोक्तं कुमुदं कैरवं कुमुत् ॥११७॥

अथ कमलादिगुणाः ।

कमलं शीतलं वर्ण्यं मधुरं कफपित्तजित् ।
तृष्णादाहास्रविस्फोटविषवीसर्पनाशनम् ॥११८॥
तस्मादल्पगुणं किञ्चिदन्यद्रक्तोत्पलादिकम् ॥११९॥

अथ कह्लारनामगुणाः ।

कह्लारं ऋक्षपायीजं सौम्यं सौगन्धिकं मतम् ॥१२०॥
कह्लारं ग्राहि विटभि रूचं गुरु सुशीतलम् ॥१२१॥

अथ किञ्जल्कनामगुणाः ।

किञ्जल्कः केशरं गौरमापीतं काञ्चनाह्वयम् ॥१२२॥
किञ्जल्कः शीतलो ग्राही रक्तार्शःकफपित्तजित् ॥१२३॥

अथ पद्मवीजनामगुणाः ।

पद्मवीजं तु गालोड्यं पद्माक्षं पद्मकर्कटी ॥१२४॥
पद्मवीजं हिमं स्वादु गर्भसंस्थापकं गुरु ।
कफवातकरं बल्यं ग्राहि पित्तासृदाहजित् ॥१२५॥

अथ मृणालशालूकनामगुणाः ।

मृणालं विसमम्भोज नालञ्च नलिनीरुहम् ॥१२६॥
पद्मादिमूलं शालूकं शालीनं करहाटकम् ॥१२७॥
मृणालं शीतलं वृष्यं पित्तदाहासृजिद् गुरु ।
संग्राहि मधुरं रूचं शालूकमपि तद्गुणम् ॥१२८॥

अथ जातीद्वयनामगुणाः ।

जाती प्रियवदा राज्ञी मालती सुमना मता ।
पीता जात्यऽपरा पीतपुष्पा काञ्चनपुष्पिका ॥१२९॥
जाती लघूष्णा मूर्द्धाचिदन्तार्त्तिव्रणरक्तजित् ॥१३०॥

अथ मल्लिकानामगुणाः ।

मल्लिका मोदिनी मुक्तबन्धना मोदयन्तिका ॥१३१॥
मल्लिकोष्णा लघुर्वृष्या वातपित्तास्ररोगजित् ॥१३२॥

अथ यूथिकाद्वयनामगुणाः ।

यूथिका हरिणी बाला पुष्पगन्धा शिखण्डिनी ।
स्वर्णयूथ्याऽपरा पीता गणिका स्वर्णपुष्पिका ॥१३३॥
यूथी हिमास्रमूर्द्धाक्षिरोगजित् कफवातकृत् ॥१३४॥

अथ कुब्जकाद्वयनामगुणाः ।

कुब्जका भद्रतरुणी बृहत्पुष्पा महासहा ।
शतपत्री तरुण्युक्ता कर्णिका चारुकेशरा ॥१३५॥
रक्ताऽपरा रक्तपुष्पा लाक्षापुष्पाऽतिमञ्जुला ॥१३६॥
शतपत्री हिमा हृद्या ग्राहिणी शुक्रला लघुः ।
दोषत्रयासृजिद्वर्ण्यमपरोऽपि च तद्गुणः ॥१३७॥

अथ केतकीद्वयनामगुणाः ।

केतकी सूचिकापुष्पी जम्बूकः क्रकचच्छदः ॥१३८॥
सुवर्णकेतकी चान्या लघुपुष्पा सुगन्धिनी ॥१३९॥
केतकी कटुका स्वादुर्लघुस्तिक्ता कफापहा ॥१४०॥

अथ वासन्तीनामगुणाः ।

वासन्ती सारणी कुन्दा प्रहसन्ती वसन्तजा ॥ १४१॥
वासन्ती शीतला लघ्वी तिक्ता दोषत्रयापनुत् ॥१४२॥

अथ नैपालीद्वयनामगुणा ।

नैपाली ग्रैष्मिका लूता लापिनी वनमल्लिका ॥१४३॥
वार्षिकी त्रिपुटा त्वन्या शीवल्ली षट्पदप्रिया ॥१४४॥
नेपाली शीतला तिक्ता लघ्वी दोषत्रयापहा ।
कर्णाक्षिमुखरोगघ्नी तद्गुणा वार्षिकी मता ॥१४५॥

अथ माधवीनामगुणाः ।

माधवी मण्डपः कामी पुष्पेन्द्रोऽभीष्टगन्धकः ॥१४६॥
माधवी मधुरा शीता लघ्वी दोषत्रयापहा ॥१४७॥

अथ चम्पकनामगुणाः।

चम्पकः काचरो रम्यश्चाम्पेयः सुरभिस्थलः ॥१४८॥

चम्पकः शीतलः क्षुत्कफपित्तास्रवातजित् ॥१४९॥

अथ पुन्नागनामगुणाः।

पुन्नागः पाटलीपुष्पः केशरः षट्पदालयः ॥१५०॥

पुन्नागो मधुरः शीतो रक्तपित्तकफापहः ॥१५१॥

अथ वकुलनामगुणाः।

वकुलः केशरी मद्यगन्धः सिंही विशारदः ॥१५२॥

वकुलः शीतलः श्लेषपित्तदन्तगदापहः ॥१५३॥

तत्फलं वातलं ग्राहि कफपित्तहरं हिमम् ॥१५४॥

अथ वुकनामगुणाः।

वुकः स्तुकः स्थूलपुष्पो वसुकः शिवशेखरः ॥१५५॥

वुकः शीतो विषश्लेषपित्तक्षत्कासदाहहृत् ॥१५६॥

अथ कुन्दनामगुणाः।

कुन्दः शुक्लः सदापुष्पो भृङ्गबन्धुर्मनोरमः ॥१५७॥

कुन्दः शीतो लघु श्लेषशिरोरुग्विषपित्तजित् ॥१५८॥

अथ मुचुकुन्दनामगुणाः।

मुचुकुन्दः चेत्रवृक्षश्चिवुकः प्रतिविष्णुकः ॥१५९॥

मुचुकुन्दः शिरःपीडापित्तास्रविषनाशनः ॥१६०॥

अथ विचच्छिन्ननामगुणाः।

भूमण्डली विचच्छिन्नो द्विपदाष्टपदी तथा ॥१६१॥

शीतो लघुर्विचच्छिन्नः कफपित्तविषापहः ॥१६२॥

अथ तिलकनामगुणाः।

तिलकः क्षुरकः श्रीमान् विविक्तो मुखमण्डनः ॥१६३॥

तिलकः कफनुत् कुष्ठहरोऽल्पपुष्पो रसायनः ॥१६४॥

अथ गणेरुकनामगुणाः ।
गणेरुकः कर्णिकारः कर्णय गणिकारिका ॥१६५॥
गणेरुः शोधनः शोफश्लेष्मास्रव्रणकुष्ठनुत् ॥१६६॥

अथ बन्धूकनामगुणाः ।
बन्धुजीवः शरत्पुष्पो बन्धुः बन्धूकः रक्तकः ॥१६७॥
बन्धुकः कफकृद् ग्राही रक्तपित्तहरो लघुः ॥१६८॥

अथ जपात्रिसन्ध्यापुष्पनामगुणाः ।
जपाख्येतं जपारक्तं त्रिसन्ध्या सारुणा सिता ॥१६९॥
जपा संग्राहिणी केश्या त्रिसन्ध्या कफपित्तजित् ॥१७०॥

अथ सिन्दूरीनामगुणाः ।
सिन्दुरो रक्तबीजा स्याद्रक्तपुष्पा सुकोमला ॥१७१॥
सिन्दूरो कफपित्तास्रतृष्णावान्तिहरा हिमा ॥१७२॥

अथ तुलसीनामगुणाः ।
तुलसी सुरसा गौरी भूतघ्नी बहुमञ्जरी ॥१७३॥
तुलसी कटुका तिक्ता हृद्योष्णा दाहपित्तकृत् ।
दीपनी कुष्ठकृच्छ्रास्रपार्श्वरुक् कफवातजित् ॥१७४॥

अथ मरुबकनामगुणाः ।
मरुर्मरुबकस्तीव्रः खरपुष्पः फणिज्झकः ॥१७५॥
मरुरग्निप्रदो हृद्यस्तीक्ष्णोष्णः पित्तलो लघुः ।
वृश्चिकादिविषश्लेष्मवातकुष्ठकृमीन् जयेत् ॥१७६॥

अथ दमननामगुणाः ।
दमनो मदनो दान्तो दमो मुनिसुतो मुनिः ।
गन्धोत्कटो दमनको विनीतः कुलपत्रकः ॥१७७॥
दमनोऽग्निमकुष्ठास्रभेदकण्डूत्रिदोषजित् ॥१७८॥

अथ वर्वरीश्वयनामगुणाः ।
वर्वरी अर्जकः कुण्ठो वैकुण्ठः स्यात् कुठेरकः ॥१७९॥

कपित्थार्जक इत्यन्यो वटपत्रः कठिञ्जरः ॥१८०॥
कृष्णार्जकः कालमालः करालः कृष्णमल्लिका ॥१८१॥
बर्वरी वितयं रूचं शीतं कटु विदाहि च।
पित्तलं कफवातासृग्दद्रुक्रिमिविषापहम् ॥१८२॥

यो राज्ञां मुखतिलकः कटारमल्ल-
स्तेन श्रीमदननृपेण निर्मितेऽत्र।
ग्रन्थेऽभूत् मदनविनोदनाम्नि पूर्णः
कर्पूरप्रभृतिसुगन्धिद्रव्यवर्गः ॥१८३॥

इति कर्पूरादि तृतीयवर्गः।

—०—

अथ सुवर्णादिवर्गः।

यद्दाज्ञया विश्वकृतोऽपि देवा
ब्रह्मादयो यान्ति मुहुर्भवन्ति।
अचिन्त्यकृत्यं पुरुषं पुराणं
गोपत्वमाप्तं तमुपाश्रयामि ॥ १ ॥

अथ सुवर्णनामगुणाः।

सुवर्णं काञ्चनं हेम हाटकं तप्तकाञ्चनम्।
चामीकरं शातकुम्भं तपनीयं च रुक्मकम्।
जाम्बूनदं हिरण्यं च कनकं जातरूपकम् ॥ २ ॥
सुवर्णं शीतलं हृद्यं वृष्यं गुरु रसायनम्।
कान्तिकरं विषोन्मादत्रिदोषज्वरशोषजित्।
कषायं तिक्तमधुरं सुवर्णं गुरु लेखनम् ॥ ३ ॥

अथ रूप्यकनामगुणाः।

रूप्यकं रजतं रूप्यं तारं श्वेतं यशुत्तमम् ॥ ४ ॥

रूप्यं शीतं सरं वातपित्तहारि रसायनम्।
लेखनञ्च कषायाम्लं स्वादुपाकरसं शुभम्।
वयसः स्थापनं स्निग्धं धातूनां हितमुच्यते ॥५॥

अथ ताम्रनामगुणाः।

ताम्रं म्लेच्छमुखं शुल्वं नेपालं रविनामकम्।
उदुम्बरं सूर्य्यप्रियं रक्ताजं रक्तधातुकम् ॥ ६ ॥
ताम्रं सरं लघु स्वादु शीतं पित्तकफापहम्।
रोपणं पाण्डुकुष्ठार्शःश्वयथुश्वासकासजित् ॥ ७ ॥

अथ कांस्यनामगुणाः।

कांस्यं दीप्तं लोहं घोषं वह्निलोहं प्रकाशकम् ॥ ८ ॥
कांस्यं गुरूष्णं चक्षुष्यं कफपित्तहरं सरम् ॥ ९ ॥

अथ पीतलोहनामगुणाः।

पीतलोहं सिंहलकं कपिलं सौकुमारकम्।
वर्त्तलोहं त्रिलोहञ्च राजरीतिर्महेश्वरी ॥१०॥
पीतलोहं हिमं रूक्षं कटूष्णं कफपित्तनुत् ॥११॥

अथ रङ्गनामगुणाः।

रङ्गक तीरकं वङ्गं चपु स्यात् करटी घनम् ॥१२॥
रङ्गं लघु सरं रूक्षमुष्णं मेहकफक्रमीन्।
निहन्ति पाण्डुं सश्वासं चक्षुष्यमीषत् तु पित्तलम् ॥१३॥

अथ यशदनामगुणाः।

यशदं रङ्गसदृशं रीतिहेतुश्च तन्मतम् ॥१४॥
यशदं तुवरं तिक्तं शीतलं कफपित्तहृत्।
चक्षुष्य परमं मेहान् पाण्डुं श्वासञ्च नाशयेत् ॥१५॥

अथ सीसनामगुणाः।

सीसं धातुमलं नागपुरग परिपिष्टकम्।
यवनेष्टं च भुजगो योगेष्टं स्वर्पकं विदुः ॥१६॥

सीसं रङ्गगुणं ज्ञेय विशेषान्मेहनाशनम् ॥१७॥

अथ लोहतत्किट्टनामगुणाः ।

लोहं शस्त्रायसं कुष्टं व्यङ्गं पारावतं घनम् ।
कृष्णायस्तन्मलं किट्टं मण्डूरी लोहज रजः ॥१८॥
लोहं सरं गुरु स्वादु कषायं कफपित्तनुत् ।
शीतं नेत्रहितं रूक्षं बलद वातलं सरम् ।
शोफकुष्ठप्रमेहार्शोगरपाण्डुक्रिमीन् जयेत् ॥१९॥
तत्किट्टं तद्गुणं ज्ञेय विशेषात् पाण्डुनाशनम् ॥२०॥

अथ पारदनामगुणाः ।

पारदश्चपलो हेमनिधिः सूतो रसोत्तमः ।
शिवेबी रोपणः स्वामी हरबीजं रसः प्रभुः ।
रसेन्द्रश्च इति ख्यातो रसलोहं महारसः ॥२१॥
पारदः क्रिमिकुष्ठघ्नश्चक्षुष्योष्णो रसायनः ॥२२॥

अथ अभ्रकनामगुणाः ।

अभ्रकं स्वच्छमाकाश पटलं घनपोतकम् ॥२३॥
अभ्रं गुरु हिमं बल्य कुष्ठमेहत्रिदोषनुत् ॥२४॥

अपरञ्च ।

गगनं क्रमिकुष्ठमेहहा विशदं शुक्रकरञ्च दीपनम् ।
कथितं मुनिभिश्च पूर्वजैर्बलकृत् शुक्रकरञ्च सेवितम् ॥२५॥

अथ गन्धकनामगुणाः ।

गन्धः सौगन्धिको लेखो गन्धाश्मा गन्धपीतकः ।
लेलीनको बलियसा वेगन्धो गन्धको बलिः ॥२६॥
गन्धकः कटुकः पाकी वीर्य्योष्णः पित्तलः सरः ।
हन्ति कुष्ठक्षयप्लीहकफवातान् रसायनः ॥२७॥

अथ सुवर्णमाक्षिकनामगुणाः ।

माक्षिकं धातुमाक्षीकं ताप्यं तापोजमुच्यते ॥२८॥

माक्षिकं तुवरं हृद्यं स्वर्यं लघु रसायनम् ।
चक्षुष्यं कुष्ठशोफार्शोमेहवस्त्यर्त्तिपाण्डुताः ।
व्यपायि कटुकं हन्ति कुष्ठोदरविषक्षयान् ॥२९॥

अथ मनःशिलानामगुणाः ।

मनःशिला शिला गोला नेपाली कुनटी कुला ।
दिव्यौषधिर्नागमाता मनोगुप्ता मनोऽह्विका ॥३०॥
मनःशिला कफहरा सरोष्णा लेखनी कटुः ।
तिक्ता स्निग्धा विषश्वासकासभूतकफास्रजित् ॥३१॥

अथ हरितालनामगुणाः ।

हरितालमलं तालं गोदन्तं नटभूषणम् ॥३२॥
हरितालं कटु स्निग्धं कषायोष्णं विषं जयेत् ।
कण्डूकुष्ठास्यरोगास्रकफपित्तकचग्रहान् ॥३३॥

अथ गैरिकनामगुणाः ।

गैरिकं रक्तपाषाणं गिरिजञ्च गवेधुकम् ॥३४॥
स्वर्णवर्णं तथा स्वर्णमण्डलं स्वर्णगैरिकम् ॥३५॥
गैरिकं दाहपित्तास्रकफहिक्काविषापहम् ।
चक्षुष्यमन्यत् तद्वच्च विशेषाद्दाहनाशकम् ॥३६॥

अथ तुत्थद्वयनामगुणाः ।

तुत्थखर्परिका तुत्थममृतासङ्गमुच्यते ॥३७॥
मयूरग्रीवकं चान्यत् शिखिकण्ठं च तुत्थकम् ॥३८॥
तुत्थकं लेखनं भेदि कण्डूकुष्ठविषापहम् ।
कफक्रिमिहरं तद्वदन्यत् चक्षुष्यमुत्तमम् ॥३९॥

अथ कासीसद्वयनामगुणाः ।

कासीसं धातुकासीसं खेचरं तमलोमगम् ॥४०॥
अपरं पुष्पकासीसं तुवरं वधारागृधम् ॥४१॥
कासीसद्वयमम्लोष्णं तिक्तं केश्यं दृशो हितम् ।

हन्ति कण्डूविषश्लेष्ममूत्रकृच्छ्रकफानिलान् ॥४२॥

अथ हिङ्गुलनामगुणाः।

हिङ्गुलं दरदं म्लेच्छं सैकतं चूर्णपारदम् ॥४३॥
हिङ्गुलं पित्तकफनुत् चक्षुष्यं विषकुष्ठहृत् ॥४४॥

अथ सिन्दूरनामगुणाः।

सिन्दूरं नागजं रक्तं शोणं शृङ्गारभूषणम्।
यसन्तमण्डनं नागरक्तं रक्तरजस्तथा ॥४५॥
सिन्दूरमुष्णं वीसर्पकुष्ठकण्डूविषापहम्।
भग्नसन्धानजननं व्रणशोधनरोपणम् ॥४६॥

अथ सौवीरस्रोतोऽञ्जननामगुणाः।

सौवीरमञ्जनं कृष्णं कालनीलं सुवीरजम् ॥४७॥
स्रोतोऽञ्जनं तु स्रोतोजं नदीजं यामुनं वरम् ॥४८॥
सौवीरं ग्राहि मधुरं चक्षुष्यं कफवातजित्।
सिध्मक्षयास्रनुत् शीतं स्रोतोऽञ्जनमपीदृशम् ॥४९॥

अथ रसाञ्जननामगुणाः।

रसाञ्जनं रसोद्भूतं तार्क्ष्यशैलञ्च तार्क्ष्यजम्।
रसाग्रं कृत्रिमं तार्क्ष्यं दार्व्यं दार्वीरसोद्भवम् ॥५०॥
रसाञ्जनं कटु श्लेष्ममुखनेत्रविकारजित्।
उष्णं रसायनं तिक्तं छेदनं व्रणदोषजित् ॥५१॥

अथ पुष्पाञ्जननामगुणाः।

पुष्पाञ्जनं पुष्पकेतु. रीतिकं कुसुमाञ्जनम् ॥५२॥
पुष्पाञ्जनं हिमं प्रोक्तं कासाक्षिपटलापहम् ॥५३॥

अथ शिलाजतुनामगुणाः।

शिलाजत्वश्मजं शैलनिर्यासो गिरिजाह्वयम्।
शिलाह्वं गिरिजं शैलं शैलेयं गिरिजत्वपि ॥५४॥
शिलाजतूष्णं कटुकं योगग्राहि रसायनम्।

छर्दिप्रमेहवातार्शः कुष्ठमेदाश्मशर्कराः ।
हन्ति श्वासक्षयोन्मादरक्तशोफकफक्रिमीन् ॥५५॥

अथ वोलद्वयनामगुणाः ।

वोलं गन्धरसं वोरं निर्लोहं वर्वरं रसम् ।
सुगन्धि सौरभं पिण्डं रसगन्धश्च तद्द्विधा ॥५६॥
वोलं रक्तहरं शीतं मेध्यं दीपनपाचनम् ।
ज्वरापस्मारकुष्ठघ्नं गर्भाशयविशोधनम् ॥५७॥

अथ स्फटिकादिनामगुणाः ।

स्फटिकाख्याऽमृता मृत्स्ना काङ्क्षी सौराष्ट्रसम्भवा ॥५८॥
आढ़की तुवरी त्वन्या मृत्तिका सुरमृत्तिका ॥५९॥
स्फटिकाख्या कषायोष्णा कफपित्तविषव्रणान् ।
निहन्ति श्वित्रवीसर्पान् तुवरी तद्गुणा मता ॥६०॥

अथ समुद्रफेननामगुणाः ।

समुद्रफेनो डिण्डीरः फेनो वारिकफो द्विजः ॥६१॥
समुद्रफेनश्चक्षुष्यो लेखनः शमनः सरः ॥६२॥

अथ प्रवालनामगुणाः ।

प्रवालं विद्रुमं सिन्धुं लताग्रं रक्तवर्णकम् ॥६३॥
पुष्टिकान्तिबलकरं वर्द्धनं बलशुक्रयोः ॥६४॥

अथ मौक्तिकनामगुणाः ।

मौक्तिकं तौतिला मुक्ताफलं मुक्ता च शुक्तिजम् ॥६५॥
मौक्तिकं मधुरं शीतं रोगघ्नं विषनाशनम् ।
हृद्यं नेत्रहितं वल्यं राजयक्ष्मगदापहम् ॥६६॥

अथ माणिक्यनामानि ।

माणिक्यं पद्मरागं स्यात् वसु रत्नं सुरत्नकम् ॥६७॥

अथ सूर्य्यकान्तनामानि ।

सूर्य्यकान्तः सूर्य्यमणिः सूर्य्याश्मो दहनोपलः ॥६८॥

अथ चन्द्रकान्तनामानि ।

चन्द्रकान्तश्चन्द्रमणि स्फटिक स्फटिकोपल ॥६९॥

अथ गोमेदनामानि ।

गोमेद सुन्दर पीत रत्न तृणचर तथा ॥७०॥

अथ हीरकनामानि ।

हीरक भिदुर वज्र सूचीवक्त्र वरारकम् ॥७१॥

अथ नील वैदूर्य्ययो नामानि ।

नीलरत्न नीलमणि वैदूर्य्य बालवायजम ॥७२॥

अथ मरकतमणिनामानि ।

गारुत्मत मरकतमश्मगर्भो हरिन्मणि ॥७३॥

अथ मुक्तास्फोटनामगुणा ।

मुक्तास्फोटोऽब्धिमण्डूकी शुक्तिर्मौक्तिकमन्दिरम ॥७४॥
शुक्तिकान्तिकरी स्निग्धा रुच्या श्वासशूलासृङ्हृत् ॥७५॥

अथ प्रवालादिनामगुणा ।

प्रवालमुक्तिमाणिक्यसूर्य्यशीतकरोपला ।
गोमेदवज्रवैदूर्य्यनीलगारुत्मतादय ॥७६॥
चक्षुष्या लेखनो शीता कषाया मधुरा सरा ।
माङ्गल्या धारणाद्ग्रह दुष्टग्रहविपापहा ॥७७॥

अथ शङ्खनामगुणा ।

शङ्खकम्बुर्जलचरो वारिजो दीर्घनि स्वन ॥७८॥
शङ्खो हि कटुक पाके कषायो मधुरो लघु ।
चक्षुष्यो लेखन पङ्क्तिशूलश्वासकफास्त्रजित् ॥७९॥

अथ लघुशङ्खकपर्दक नामगुणा ।

शङ्खो लघु शङ्खनख शम्बूका वारिशुक्तय ।
कपर्दा शुक्तिका श्रेयारराचरा वराटका ॥८०॥

लघु शङ्खादयः शीता नेत्ररुक्स्फोटनाशनाः ॥८१॥

अथ खटीद्वयनामगुणाः ।

खटिका कठिनी चापि लेखनी श्वेतधातुकः ॥८२॥
तद्भेदो गौरपाषाणः घोरोनाम्ना उदाहृतः ॥८३॥
खटी दाहास्रनुत् शीता गौरग्रावापि तद्गुणः ॥८४॥

अथ पङ्कवालुकयोः नामगुणाः ।

पङ्कः कर्दमको ज्ञेयो वालुकाः सिकतास्तथा ॥८५॥
पङ्को दाहास्रपित्तार्त्तिशोथघ्नः शीतलः सरः ।
वालुका लेखनी शीता व्रणोरःक्षतनाशिनी ॥८६॥

अथ चुम्बकपाषाणनामगुणाः ।

चुम्बकः कान्तपाषाणोऽयस्कान्तो लोहकर्षकः ॥८७॥
चुम्बको लेखनः शीतो मेदोविषगरापहः ॥८८॥

अथ काचनामगुणाः ।

काचः सनिमरत्नं स्यात् विगुणः काचभाजनम् ॥८९॥
काचो विदारणो स्वच्छश्चक्षुष्यो लेखनो लघुः ॥९०॥

यो राज्ञां मुकुटतिलकः कटारमल्ल-
स्तेन श्रीमदननृपेण निर्मितेऽत्र ।
ग्रन्थेऽभूत् मदनविनोदनाम्नि पूर्ण-
स्तुर्योऽयं ललितपदैः सुवर्णवर्गः ॥९१॥

इति सुवर्णादि चतुर्थवर्गः ।

— —

अथ वटादिवर्गः ।

करेण संगृह्य कुचौ स्त्रियाः पयः पिबन्तं पुरुषं पुराणम् ।
त्रिविक्रमोग्रं परिपूर्णमौनं समाप्तमौनं निगमाश्रयामि ॥१॥

अथ वटनामगुणा ।

वटो रक्तफला चीरी बहुपादो वनस्पति ।
यक्षावास पदारोही न्यग्रोध स्कन्धजो ध्रुव ॥२॥
वट शीतो गुरुर्ग्राही कफपित्तव्रणापह ॥३॥

अथ पिप्पलनामगुणा ।

पिप्पल श्यामलोऽश्वत्थ चीरवृक्षो गजाशन ।
हरिवासश्चलदलो मङ्गल्यो बोधिपादप ॥४॥
पिप्पलो दुर्जर शीत पित्तश्लेष्मव्रणास्रजित् ॥५॥

अथ पारिशोऽश्वत्थनामगुणा ।

पारिशोऽन्य फलीश स्यात् कपिचूत कपीतम ॥६॥
पारिशोऽश्वत्थको वृष्य स्निग्ध श्लेष्मकृमिप्रद ॥७॥

अथ उदुम्बरनामगुणा ।

उदुम्बर चीरवृक्षो जन्तुवृक्ष सदाफल ।
हेमदुग्ध कृमिफलो यज्ञाङ्ग शीतवल्कल ॥८॥
उदुम्बरो हिमो वर्ण्यो कफपित्तास्रजिद् गुरु ॥९॥

अथ काकोदुम्बरिकानामगुणा ।

काकोदुम्बरिका फल्गुर्मलपूश्चित्रभेषजम् ॥१०॥
काकोदुम्बरिका तद्वत् विशेषात् श्वित्रनाशिनी ॥११॥

अथ प्लक्षनामगुणा ।

प्लक्ष प्लवश्चारुवृक्ष सुपार्श्वो गर्दभाण्डक ।
वटी कमण्डलुर्यूप पिप्परिश्चारुदर्शन ॥१२॥
प्लक्ष शीतो व्रणश्लेष्मपित्तशोथविसर्पजित् ॥१३॥

अथ पञ्चक्षीरवृक्षनामगुणा ।

न्यग्रोधोदुम्बरोऽश्वत्थपारीशप्लक्षपादपा ।
पञ्चैते क्षीरिण प्रोक्तास्तेषा त्वक् पञ्चवल्कला ॥१४॥
त्वक्पञ्चक हिम ग्राहि व्रणशोथविसर्पजित् ॥१५॥

केचित् तु पारीशस्थाने शिरीषं वेतसं परे ॥१६॥
चोरत्वचा हिमा वर्ण्या योनिदोषव्रणापहा: ।
शोफपित्तकफासृग्घ्नाः स्तन्या भग्नास्थियोगदा: ॥१७॥
तेषां पत्रं हिमं ग्राहि कफवातासृगुत् लघु: ॥१८॥
फलं विटम्भि संग्राहि रक्तपित्तकफापहम् ॥१९॥

अथ नन्दीवृक्षनामगुणाः ।

नन्दीवृक्षोऽश्वत्थभेदः प्ररोही गजपादपः ॥२०॥
नन्दीवृक्षोऽश्वत्थगुणो लघूष्णो गरनुत् पुनः ॥२१॥

अथ कदम्बद्वयनामगुणाः ।

कदम्बो गन्धमत्पुष्पः प्रावृषेण्यो मनोहृतिः ॥२२॥
अन्यो धूलिकदम्बः स्यात् नीपो राजकदम्बकः ॥२३॥
कदम्बः शीतलः श्लेष्मपित्तरक्तगदापहः ॥२४॥

अथ ककुभनामगुणाः ।

ककुभोऽर्जुननामा स्यात् नदीसर्जः शठद्रुमः ॥२५॥
ककुभः शीतलो भग्नक्षतक्षयविषासृजित् ॥२६॥

अथ शिरीषनामगुणाः ।

शिरीषः प्लवगो विप्र शुकावृक्षः कपीतनः ।
मृदुपुष्पः श्यामवर्णो भण्डीरः शङ्खिनीफलः ॥२७॥
शिरीषः शीतलो वर्ण्यो विषवीसर्पशोथजित् ॥२८॥

अथ आर्त्तगलनामगुणाः ।

अगेटः स्यादार्त्तगलो बहुकण्टः मधर्पणः ॥२९॥
अगेटस्तुवरः शीतो व्रणशोधनरोपणः ॥३०॥

अथ वेतसद्वयनामानि ।

वेतसो वञ्जुलो नम्रो वानीरो दीर्घपत्रकः ॥३१॥
नादेयो मध्यपुष्पोऽन्यस्तोयवासो निकुञ्जकः ।

अथ जलवेतसनामानि।

जलौका सम्भृतोऽम्भोजो निचुलो जलवेतसः ॥३२॥

अथ इज्जलनामानि।

इज्जलो हिज्जलो गुच्छफला स्यात् कच्छपीलिका ॥३३॥

अथ वेतसादिगुणानि।

वेतस शीतलो दाहशोफार्शोयोनिरुग्व्रणान्।
हन्ति वीसर्पकृच्छ्रास्रपित्ताश्मरीकफानिलान् ॥३४॥
जलजो वेतसः शीतः संग्राही वातकोपनः ॥३५॥
इज्जलस्तद्गुणः प्रोक्तो विशेषाद्विषनाशनः ॥३६॥

अथ श्लेष्मान्तकनामगुणाः।

श्लेष्मान्तकः कर्वुदारः पिच्छलो भूतवाद्यपः।
शेलुः शैलुश शैलूक शेलिको द्विजकुत्सितः ॥३७॥
श्लेष्मान्तको विषस्फोटव्रणवीसर्पकुष्ठजित्।
केश्योष्णस्तत्फलं ह्यथ वातपित्तक्षयासृजित् ॥३८॥

अथ पिलुनामगुणा.।

पीलुः शीतः सहस्रांशी तीव्रस्तु खरभप्रियः।
सहस्राङ्गी गुड़फलस्तत्फल पीलु पीलुजम् ॥३९॥
पीलूष्णं दीपनं भेदि रक्तपित्तकरं लघु।
गुल्मार्शःप्लीहवाताश्मकफहारि रसायनम् ॥४०॥

अथ शाक (शेगुण) नामगुणा.।

शाकः खरच्छदो भूमिसह्वो दीर्घच्छदो मतः ॥४१॥
शाक' श्लेष्मानिलाम्नघ्नो गर्भसन्धानदो हिम' ॥४२॥

अथ सालनामगुणा'।

सालः सर्जरसः सर्जः श्योणकणारिव पत्रकः ॥४३॥
सालो ग्राही व्रणश्लेष्मदग्धरुक् विषनुत् हिमः ॥४४॥

अथ तमालनामगुणाः ।

तमाल उक्तस्तापिच्छः कालस्कन्धोऽमितद्रुमः ॥४५॥
तमालस्तद्गुणः शोथदाहविस्फोटहृत् पुनः ॥४६॥

अथ खदिरद्वयनामगुणाः ।

खदिरो रक्तसारः स्यात् गायत्री बालपत्रकः ।
खदिरः श्वेतसारोऽन्यः कार्मुकः कुञ्जकण्टकः ॥४७॥
खदिरः शीतलो दन्त्यः कृमिमेहज्वरव्रणान् ।
श्वित्रशोथामपित्तास्रपाण्डुकुष्ठकफान् जयेत् ॥४८॥
निर्यासस्तस्य मधुरो वल्यः शुक्रविवर्द्धनः ॥४९॥
सारस्तु विशदो बल्यो मुखरोगकफास्रजित् ॥५०॥

अथ इरिमेदनामगुणाः ।

इरिमेदो विट्खदिरो गोधास्कन्धोऽरिमेदकः ॥५१॥
इरिमेदः कषायोष्णो मुखदन्तगदास्रनुत् ।
हन्ति कण्डू विषश्लेष्मक्रिमिकुष्ठव्रणान् जयेत् ॥५२॥

अथ वब्बूरनामगुणाः ।

वब्बूरः किङ्कराल: स्यात् पीतकः पीतपुष्पकः ॥५३॥
वब्बूरः कफनुट् ग्राही कुष्ठक्रिमिविषापहः ।
रक्तपित्तं कषायेण निहन्ति दिनसप्तकात् ॥५४॥

अथ बीजक (पियाल) नामगुणाः ।

बीजकोऽसनकः सौरी प्रियः काम्योऽलकप्रियः ॥५५॥
बीजकः कुष्ठवीसर्पश्वित्रमेहज्वरक्रिमीन् ।
हन्ति श्लेष्मास्रपित्तानि त्वच्यः केश्यो रसायनः ॥५६॥

अथ तिनिशनामगुणाः ।

तिनिशः स्यन्दनो नेमी सर्वसारोऽश्मगर्भकः ॥५७॥
तिनिशः श्लेष्मपित्तास्रमेदःकुष्ठप्रमेहनुत् ॥५८॥

अथ भूर्जपत्रनामगुणाः ।

भूर्जो भुजो बहुपुटो मृदुत्वक् लेख्यपत्रकः ॥५९॥
भूर्जो भूतघ्नहस्रकर्णरुक् रक्तपित्तजित् ॥६०॥

अथ पलाशनामगुणाः ।

पलाशः किंशुकः क्रिमी याज्ञिको ब्रह्मपादपः ।
क्षारश्रेष्ठो रक्तपुष्पः त्रिपर्णो समिदुत्तमः ॥६१॥
पलाशो दीपनो वृष्यः सरोष्णो व्रणगुल्मजित् ।
भग्नसन्धानकृत् दुष्टग्रहण्यर्शःक्रिमीन् हरेत् ॥६२॥
तत्पुष्पं कफपित्तास्रकृच्छ्रजिद् ग्राहि शीतलम् ॥६३॥
फलं लघूष्णं मेहार्शःक्रिमिदुष्टकफापहम् ॥६४॥

अथ धवनामगुणाः ।

धवो नन्दितरुर्गौरः शकटाख्यो धुरन्धरः ॥६५॥
धवः शीतप्रमेहार्शःपाण्डुपित्तकफापहः ॥६६॥

अथ धन्वननामगुणाः ।

धन्वनो गोत्रविटपो धर्मणो गोत्रपुष्पकः ॥६७॥
धन्वनः कफपित्तास्रकासजित् तुवरो लघुः ॥६८॥

अथ सर्जनामगुणाः ।

सर्जोऽजकर्णः स्वेदघ्नो लताह्वः कुटेहकः ॥६९॥
सर्जो घर्ष्यः कफस्वेदमलपित्तकृमीन् जयेत् ॥७०॥

अथ आखोटनामगुणाः ।

आखोटः स्यात् पीतफलश्छागो क्षीरविनाशनः ॥७१॥
आखोटो रक्तपित्तार्शोवातघ्नश्चातिसारजित् ॥७२॥

अथ वरुणनामगुणाः ।

वरुणो वरणः श्वेतः शाकवृक्षः कुमारकः ॥७३॥
वरुणः पित्तलो भेदी श्लेष्मकृच्छ्राश्ममारुतान् ।
निहन्ति गुल्मवातासृक्क्रिमिशोथांश्च दीपनः ॥७४॥

अथ जिङ्गिनीनामगुणाः।

जिङ्गिनी झिङ्गिनी झिङ्गी सुनिर्य्यासा प्रमोदिनी ॥७५॥
जिङ्गिनी व्रणहृद्रोगवातातिसारजित् कटुः।
तमालशालवत् वेद्यो दाहविस्फोटहृत् पुनः ॥७६॥

अथ शल्लकीनामगुणाः।

शल्लकी ग्रल्लकी शल्ली गजभक्ष्या महेरुणा।
सम्वीरा कुन्दुरुकी सुस्रावा वनकर्णिका ॥७७॥
शल्लकी व्रणकुष्ठासृग्घ्नी सपित्तातिसारजित् ॥७८॥

अथ इङ्गुदनामगुणाः।

इङ्गुदी मल्लकी ह्यक्षः कण्टकस्तापसद्रुमः ॥७९॥
इङ्गुदः कुष्ठभूतादिग्रहव्रणविषक्रमीन्।
हन्त्युष्णः श्वित्रशूलघ्नः तत्फलं कफवातजित् ॥८०॥

अथ कटम्भरनामगुणाः।

कटम्भरयारुश्शृङ्गी कटभी व्रणशौण्डीकः ॥८१॥
कटम्भरः प्रमेहार्शोनाडीव्रणविषक्रमीन्।
हन्त्युष्णः कफकुष्ठघ्नः तत्फलं कफगुल्मनुत् ॥८२॥
निर्य्यासोऽस्य गुरुर्वृष्यो बलकृत् वातनाशनः ॥८३॥

अथ मुष्ककनामगुणाः।

मुष्कको मोक्षको घण्टापाटलिः क्षुद्रपाटला ॥८४॥
मुष्कको कफवातघ्नो ग्राही गुल्मविषक्रमीन्।
हन्त्युष्णो वस्तिरुग् काण्डूस्तत्पुष्पं कफपित्तजित् ॥८५॥
निर्य्यासोऽस्य परं हृद्यः शोषपित्तानिलापहः ॥८६॥

अथ पारिभद्रनामगुणाः।

पारिभद्रो निम्बवृक्षो रक्तपुष्पं प्रभद्रकः।
कण्टकीपारिजातः स्यात् मन्दारः कटिकिंशुकः ॥८७॥
पारिभद्रः क्रमिघ्नश्च मेदःकफानिलापहः ॥८८॥

अथ शाल्मलीनामगुणाः।

शाल्मली तूलिनी मोचा कुक्कुटी रक्तपुष्पिका।
कण्टकाढ्या स्थूलफला पिच्छिला चिरजीविनी ॥८९॥
शाल्मली शीतला हृष्या वृंहणी रक्तपित्तजित् ॥९०॥
निर्यासोऽस्य परं हृष्यः शोफपित्तानिलासृजित्।
रसायनवरा स्निग्धा तत्पुष्पं ग्राहि पित्तजित् ॥९१॥

अथ तूणिनामगुणाः।

तूणिः कुठेर आपीतस्तूनिको नन्दीपादपः॥९२॥
तूणिः ग्राही हिमो हृष्यो व्रणकुष्ठास्रपित्तहा ॥९३॥

अथ सप्तपर्णनामगुणाः।

सप्तपर्णो गुच्छपुष्पः छत्रो शाल्मलिपत्रकः ॥९४॥
सप्तपर्णो व्रणश्लेष्मवातकुष्ठहरः सरः ॥९५॥

अथ हारिद्रकनामगुणाः।

हारिद्रकः पीतवर्णः श्रीमान गौरद्रुमो वरः ॥९६॥
हारिद्रकः कफहरो व्रणशोधनरोपणः ॥९७॥

अथ करञ्जपूतिकरञ्जनामगुणाः।

करञ्जो नक्तमालः स्यात् नक्ताह्वो घृतपर्णकः ॥९८॥
पूतीकोऽन्यः पूतिपर्णः प्रकीर्य्यश्चिरविल्वकः ॥९९॥
करञ्जः कटुकस्तीक्ष्णो वीर्य्योष्णो योनिदोषजित्।
कुष्ठोदावर्त्तगुल्मार्शोव्रणकृमिकफापहः ॥१००॥
तत्फलं कफवातघ्नं मेहार्शः कृमिकुष्ठजित् ॥१०१॥
तत्पत्रं कफवातार्शःकृमिशोथहरं परम् ॥१०२॥

अथ अङ्गारवल्लरी (करञ्जभेदः) नामगुणाः।

करञ्जी काकतिक्ता च वदन्त्यङ्गारवल्लरी ॥१०३॥
करञ्जिकोप्यथवातार्शःकृमिकुष्ठप्रमेहनुत् ॥१०४॥

अथ महाकरञ्जनामगुणाः।

तिरिगिच्छिर्गलकरञ्जः करञ्जी चौरिणो द्विपः ॥१०५॥
तिरिगिच्छिर्बलासार्शःकृमिकुष्ठप्रमेहहृत् ॥१०६॥

अथ शमीद्वयनामगुणाः।

शमी तुङ्गा शक्तुफला पवित्रा केशहृत्फला।
लक्ष्मीः शिवाऽन्या मङ्गल्या भूशमी शङ्कराह्वया ॥१०७॥
शमी शीता लघुः श्वासकुष्ठार्शःकफहृत् सरा ॥१०८॥
तत्फलं पित्तलं रूक्षं मेध्यं केशविनाशनम् ॥१०९॥

अथ टिण्टिनिकानामगुणाः।

शिरीषिका टिण्टिनिका दुर्बलाम्लुशिरीषिका ॥११०॥
टिण्टिनी कफकुष्ठार्शःसन्निपातविषापहा ॥१११॥

अथ अरिष्टक (रीठाकरञ्जः) नामगुणाः।

अरिष्टको गर्भपाती कुम्भबीजश्च फेनिलः।
कृष्णबीजो रक्तबीजः पीतफेनोऽर्थसाधनः ॥११२॥
अरिष्टकस्त्रिदोषघ्न उष्णो गर्भप्रदापहः ॥११३॥

अथ शिंशपाद्वयनामगुणाः।

शिंशपा कपिला कृष्णसारा मण्डलपत्रिका ॥११४॥
अन्या कुशिंशपा भस्म पिङ्गला स्यात् वसादनी ॥११५॥
शिंशपोष्णा हरेन्मेहान् कुष्ठश्वित्रवमिक्रमीन्।
वस्तिरुग्व्रणदाहास्रमूढगर्भनिपातनी ॥११६॥

अथ अगस्त्य (वकपुष्प) नामगुणाः।

अगस्त्यो वङ्गसेनाह्वः मधुशिग्रुर्मुनिद्रुमः ॥११७॥
अगस्त्यः पित्तकफजित् निदाघशमनो हिमः ॥११८॥
तत्पुष्पं पीनसघ्नं पित्तनक्तान्ध्यनाशनः ॥११९॥

यो राज्ञां नृपतिलकः कटारमल्ल-
स्तेन श्रीमदनृपेण निर्मितेऽत्र।

धन्येऽभूमदनविनोदनाम्नि पूर्ण-
श्चिचोऽयं ललितपदैर्वटादिवर्गः ॥१२०॥
इति वटादि पञ्चमवर्गः।

अथ द्राक्षादिफलवर्गः।

भ्रमोच्छलद्दर्दरिकाग्रपिष्टं मन्दस्मितं वेणुनिनादरक्तम्।
गोपालिकानां करतालिकाभिर्नृत्यन्महस्तत्परमं स्मरामि ॥१॥

अथ द्राक्षानामगुणाः (तद्भेदाश्च)।

द्राक्षा मधुफला स्वाद्वी हारहूरा फलोत्तमा।
मृद्वीका मधुयोनिश्च रसाला गोस्तनी गुडा ॥ २ ॥
द्राक्षा पक्वा सरा शीता चक्षुष्या बृंहणी गुरुः।
हन्ति तृष्णाज्वरश्वासवान्तिवातास्रकामलाः।
कृच्छ्रास्रपित्तसम्मोहदाहशोषमदात्ययान् ॥ ३ ॥
आमा स्वल्पगुणा गुर्वी सैवाम्ला रक्तपित्तकृत् ॥ ४ ॥
निर्वीर्य्याऽन्या लघुद्राक्षा गोस्तनी सदृशी गुणैः।
द्राक्षा पर्वतजा लघ्वी साम्ला श्लेष्मास्रपित्तकृत् ॥ ५ ॥

अथ पक्वापक्वशुष्काम्रनामगुणाः।

आम्रश्चूतो रसालश्च सहकारोऽतिसौरभः।
माकन्दः पिकबन्धुः स्यात् कामाङ्गो कामवल्लभः ॥ ६ ॥
आम्रो बालो प्रमेहास्रकफपित्तव्रणान् जयेत्।
ततफलं बालमत्यम्लं रूक्षं दोषत्रयास्रजित् ॥ ७ ॥
पक्वन्तु मधुरं हृद्यं स्निग्धं हृद्यं बलप्रदम्।
गुरु वातहरं रुच्यं वर्ण्यं शीतमपित्तलम् ॥ ८ ॥
रसस्तस्य सरः स्निग्धो रोचनो बलवर्णकृत् ॥ ९ ॥
सहकारश्च वातघ्नं पित्तघ्नं चविनाशनम्।

कर्कन्धु क्षुद्रबदरं बदरञ्च धुकन्धुकम् ॥४३॥
पच्यमानं सुमधुरं सौवीरं बदरं महत् ॥४४॥
बदरं लघु संग्राहि रुच्यमुष्णं समीरजित् ।
कफपित्तकरं तद्वत् कोलं गुरु सरं स्मृतम् ॥४५॥
सौवीरं बदरं शीतं भेदनं गुरु शुक्रलम् ।
बृंहणं पित्तदाहासृक्क्षतक्षयानिलापहम् ॥४६॥
शुष्कं भेद्यग्निकृत् सर्वं लघु तृष्णाक्लमासृजित् ॥४७॥
कर्कन्धूः मधुरा स्निग्धा गुर्वी पित्तानिलापहा ।
मरुत्पित्तहरो मज्जा हृद्या वीर्यबलप्रदा ॥४८॥

अथ क्षीरीनामगुणाः ।

क्षीरी चपिय राजाह्वा राजादनफला तथा ।
राजन्या स्कन्धफलोऽन्यामपिशुको मृषिलिन्दकः ॥४९॥
क्षीरीवृक्षफलं शीतं स्निग्धं गुरु बलप्रदम् ।
तृष्णामूर्च्छामदभ्रान्तिक्षयदोषत्रयास्रजित् ॥५०॥

अथ चारनामगुणाः ।

चारो धनुष्पटः सारः प्रियालो मुनिवल्लभः ॥५१॥
चारः पित्तकफास्रघ्नस्तत्फलं मधुरं गुरु ।
स्निग्धं सरं मरुत्पित्तदाहज्वरतृषापहम् ॥५२॥
तन्मज्जा मधुरो वृष्यः गुरुः पित्तवातजित् ॥५३॥

अथ परूषकनामगुणाः ।

परूषको मृदुफलः परूषो नीलपर्णोऽपरः ॥५४॥
परूषकं कषायाम्लमामं पित्तकरं लघु ॥५५॥
परूषकं मधुरं पाके शीतं विष्टम्भि बृंहणम् ।
हृद्यं पित्तदाहास्रज्वरक्षयसमीरनुत् ॥५६॥

अथ तिन्दुकफलनामगुणाः ।

तिन्दुकः स्फन्दनः स्फूर्जः कालस्कन्धश्च रावण ।

काकपीलुः कुपीलुः स्यादपरो विषतिन्दुकः ॥५७॥
तिन्दुकी व्रणवातघ्नस्तत्सारः पित्तरोगजित् ॥५८॥
आममस्य फलं ग्राहि वातलं शीतलं लघु ॥५९॥
पक्वं पित्तप्रमेहास्रश्लेष्मघ्नं विशदं गुरु ॥६०॥
विषतिन्दुकमप्येवं विशेषाद् ग्राहि शीतलम् ॥६१॥

अथ किङ्किणीनामगुणाः ।

किङ्किणी व्याघ्रपादः स्यात् देवदारुः चरः क्वचित् ॥६२॥
किङ्किणी तुवरा तिक्ता पित्तश्लेष्महरा हिमा ॥६३॥
तत्फलं वातलं त्वामं पक्वं स्वादु त्रिदोषजित् ॥६४॥

अथ आरुकनामगुणाः ।

आरुकं वीरसेन तज्जातिभेदाच्चतुर्विधम् ॥६५॥
आरुकं जारकं वातमेहार्शःकफनाशनम् ॥६६॥

अथ मधूकद्वयनामगुणाः ।

मधूको मधुकस्तोऽण्णसारश्च गुडपुष्पकः ।
गोलाफलो मधुष्ठीलो मधुकाष्ठो मधुद्रुमः ॥६७॥
मधूकान्यो ह्रस्वफलो मधुरो दीर्घपत्रकः ॥६८॥
मधुकः कफवातघ्नः कषायो व्रणरोपणः ॥६९॥
तत्पुष्पं मधुरं बल्यं शीतलं गुरु बृंहणम् ॥७०॥
फलं शीतं गुरु स्वादु शुक्रलं वातपित्तजित् ।
अहृद्यं हन्ति तृष्णासृग्दाहश्वासक्षतक्षयान् ॥७१॥

अथ पनसनामगुणाः ।

पनसः कण्टकिफलः श्वासहा गर्भकण्टकः ॥७२॥
पनसं शीतलं पक्वं स्निग्धं पित्तानिलापहम् ।
बल्यं शुक्रप्रदं हन्ति रक्तपित्तक्षतक्षयान् ॥७३॥
आमं तदेव विष्टम्भि वातलं तुवरं गुरु ॥७४॥

कषायं मधुरं हृद्यं गुरुस्निग्धं विशेषतः ॥ १० ॥
पक्वाम्रं जनयेदायुर्मांसशुक्रबलप्रदम् ।
शुष्काम्रन्तु कषायाम्लं भेदनं कफवातजित् ॥ ११ ॥

अथ जम्बूद्वयनामगुणाः ।

महाजम्बू राजजम्बूर्महास्कन्धा बृहत्फला ॥ १२ ॥
क्षुद्रजम्बूर्वीरपत्रा मेघाभा काकवल्लभा ॥ १३ ॥
नादेयी स्यात् क्षुद्रफला तत्फलं जम्बु जाम्बवम् ॥ १४ ॥
जम्बूः संग्राहिणी रूक्षा कफपित्तव्रणास्रजित् ॥ १५ ॥
राजजम्बूफलं स्वादु विष्टम्भि गुरु रोचनम् ॥ १६ ॥
क्षुद्रजम्बूफलं तद्वत् विशेषाद्दाहनाशनम् ॥ १७ ॥

अथ नारिकेलनामगुणाः ।

नारिकेलो दृढफलो महावृक्षो महाफलः ।
तृणराजस्तृणफलस्तृणाढ्यो दृढबीजकः ॥ १८ ॥
नारिकेलफलं शीतं दुर्जरं वस्तिशोधनम् ।
विष्टम्भि बृंहणं हृद्यं वातपित्तास्रदाहजित् ॥ १९ ॥
तस्याम्भः शीतलं हृद्यं दीपनं शुक्रलं लघु ॥ २० ॥
तत्पादपशिरोमज्जा शुक्रलो वातपित्तजित् ॥ २१ ॥

अथ खर्जूरिकानामगुणाः (तद्भेदाश्च) ।

श्रेणी खर्जूरिकावृक्षः श्रीफला द्वीपसम्भवा ।
पिण्डखर्जूरिका खर्जूर्दुःप्रधर्षा सुकण्टका ॥ २२ ॥
अन्या स्कन्धफला स्वाद्वी दुरारोहा मृदुच्छदा ।
भूमिखर्जूरिका काककर्कटी स्वादुमस्तका ॥ २३ ॥
खर्जूरिकाफलं शीतं स्वादु स्निग्धं क्षतासृजित् ।
बल्यं हन्ति मरुत्पित्तं मदमूर्च्छामदात्ययान् ॥ २४ ॥
तस्मादल्पगुणं ज्ञेयमन्यत् खर्जूरिकाफलम् ॥ २५ ॥
तन्मज्जा मूर्द्धजः शीतो हृद्यः पित्तास्रदाहजित् ॥ २६ ॥

अथ सुलेमानीनामगुणाः ।

सुलेमानोऽपरा लोके मृदुला तुवरीफला ॥ २७ ॥

सुलेमानो श्रमभ्रान्तिदाहमूर्च्छास्रपित्तनुत् ॥ २८ ॥

अथ कदलीनामगुणाः ।

कदली ग्रन्थिनो मोचा रम्भा वीरायतच्छदा ।

रोचकी वारणवुषाऽम्बुसारांशुमतीफला ॥ २९ ॥

कदली योनिदोषास्त्ररक्तपित्तहरा हिमा ॥ ३० ॥

तत्कन्दः शीतलो बल्यः केश्यः पित्तकफास्रजित् ॥३१॥

तत्फलं मधुरं शीतं विष्टम्भि कफकृद् गुरु ।

स्निग्धं पित्तास्रतृड्दाहक्षतक्षयसमीरजित् ॥ ३२ ॥

अथ दाड़िमीत्रयनामगुणाः ।

दाड़िमो रक्तकुसुमा दन्तबीजा शुकप्रिया ॥३३॥

दाड़िमं दीपनं हृद्यं रोचनं नातिपित्तलम् ।

कषायानुरसं ग्राहि स्निग्धं मेदोबलावहम् ॥३४॥

तयोः स्वादु त्रिदोषघ्नमम्लं वातकफापहम् ॥३५॥

स्वाद्वम्लं दीपनं रुच्यं किंचित् पित्तकरं लघु ॥ ३६ ॥

अथ कतक (निर्मलीफल) नामगुणाः ।

कतकोऽम्बुप्रसादश्च कतस्तिक्तफलस्तथा ॥३७॥

कतकस्य फलं नेत्र्यं जलनिर्मलताकरम् ।

वातश्लेष्महरं शीतं मधुरं तुवरं गुरु ॥३८॥

अथ बदरीनामगुणाः तद्भेदाश्च ।

बदरी कर्कटी मोघा कोरण्टो युग्मकण्टका ॥३९॥

अन्या स्निग्धच्छदा कोशफला सौवीरिकाऽपरा ॥४०॥

हस्तिकोलिःपरा त्वन्या लघ्वी कर्कन्धुः कोलिका ॥४१॥

बदरी शीतला तिक्ता रूक्षा पित्तकफापहा ॥४२॥

बदरस्त्वपरं लोके फेनिलं कुवलं कुहम् ।

कषायं मधुरं हृद्यं गुरुस्निग्धं विशेषतः ॥ १० ॥
पक्काम्रं जनयेदायुर्मांसशुक्रबलप्रदम् ।
शुष्काम्रन्तु कषायाम्लं भेदनं कफवातजित् ॥ ११ ॥

अथ जम्बूचयनामगुणाः ।

महाजम्बू राजजम्बू र्महास्कन्धा बृहत्फला ॥ १२ ॥
क्षुद्रजम्बूर्वीरपत्रा मेघाभा काकवल्लभा ॥ १३ ॥
नादेयी स्यात् क्षुद्रफला तत्फलं जम्बु जाम्बवम् ॥ १४ ॥
जम्बूः सङ्ग्राहिणी रूक्षा कफपित्तव्रणास्रजित् ॥ १५ ॥
राजजम्बूफलं स्वादु विष्टम्भि गुरु रोचनम् ॥ १६ ॥
क्षुद्रजम्बूफलं तद्वत् विशेषाद्दाहनाशनम् ॥ १७ ॥

अथ नारिकेलनामगुणाः ।

नारिकेलो दृढफलो महावृचो महाफलः ।
तृणराजस्तृणफलस्तृणाढ्यो दृढवीजकः ॥ १८ ॥
नारिकेलफलं शीतं दुर्जरं वस्तिशोधनम् ।
विष्टम्भि बृंहणं हृद्यं वातपित्तास्रदाहजित् ॥ १९ ॥
तस्याम्भः शीतलं हृद्य दीपनं शुक्रलं लघु ॥ २० ॥
तत्पादपशिरोमज्जा शुक्रलो वातपित्तजित् ॥ २१ ॥

अथ खर्जूरिकानामगुणाः (तद्भेदाश्च) ।

श्रेणी खर्जूरिकावृचः श्रीफला द्वीपसम्भवा ।
पिण्डखर्जूरिका खर्जूर्दुःप्रधर्षा सुकण्टका ॥ २२ ॥
अन्या स्कन्धफला स्वाद्वी दुरारोहा मृदुच्छदा ।
भूमिखर्जूरिका काककर्कटी स्वादुमस्तका ॥ २३ ॥
खर्जूरिकाफलं शीतं स्वादु स्निग्धं चतामृजित् ।
वल्यं हन्ति मरुत्पित्त मदमूर्च्छामदात्ययान् ॥ २४ ॥
तस्मादल्पगुणं ज्ञेयमन्यत् खर्जूरिकाफलम् ॥ २५ ॥
तन्मज्जा मूर्द्धजः शीतो हृद्यः पित्तास्रदाहजित् ॥ २६ ॥

अथ सुलेमानीनामगुणाः ।

सुलेमानोऽपरा लोके मृदुला तुवरीफला ॥ २७ ॥
सुलेमानो श्रमभ्रान्तिदाहमूर्च्छास्रपित्तनुत् ॥ २८ ॥

अथ कदलीनामगुणाः ।

कदली ग्रन्थिनो मोचा रम्भा वीरायतच्छदा ।
रोचको वारणवुषाऽम्बुसारांशुमतीफला ॥ २९ ॥
कदली योनिदोषास्ररक्तपित्तहरा हिमा ॥ ३० ॥
तत्कन्दः शीतलो बल्यः केश्यः पित्तकफास्रजित् ॥३१॥
तत्फलं मधुरं शीतं विष्टम्भि कफकृद् गुरु ।
स्निग्धं पित्तास्रतृड्दाहक्षतक्षयसमीरजित् ॥ ३२ ॥

अथ दाडिमीत्रयनामगुणाः ।

दाडिमी रक्तकुसुमा दन्तबीजा शुकप्रिया ॥३३॥
दाड़िम दीपनं हृद्यं रोचनं नातिपित्तलम् ।
कषायानुरसं ग्राहि स्निग्धं मेदोबलावहम् ॥३४॥
तयोः स्वादु त्रिदोषघ्नमम्लं वातकफापहम् ॥३५॥
स्वाद्वम्लं दीपनं रुच्यं किञ्चित् पित्तकरं लघु ॥ ३६ ॥

अथ कतक (निर्मलीफल) नामगुणाः ।

कतकोऽम्बुप्रसादश्च कतस्तिक्तफलस्तथा ॥३७॥
कतकस्य फलं नेत्र्यं जलनिर्मलताकरम् ।
वातश्लेष्महरं शीतं मधुरं तुवरं गुरु ॥३८॥

अथ बदरीनामगुणाः तद्भेदाश्च ।

बदरी कर्कटी मोघा कोरण्टो युग्मकण्टका ॥३९॥
अन्या स्निग्धच्छदा कोशफला सौवीरिकाऽपरा ॥४०॥
हस्तिकोलिःपरा त्वन्या लघ्वी कर्कन्धूः कोलिका ॥४१॥
बदरी शीतला तिक्ता रूक्षा पित्तकफापहा ॥४२॥
बदरस्त्वपरं लोके फेनिलं कुवलं कुहम् ।

अथ पालेवतद्वयनामगुणाः।

पालेवतं सितं पुष्पे स्निग्धकञ्च फलं स्मृतम् ॥१०४॥
अन्यत् मानवकं ज्ञेयं महापालेवतं तथा ॥१०५॥
पालेवतं हिमं स्वादु गुरूष्णं वह्निवातजित्।
तद्वन्मानवकं हृद्यं तृष्णाघ्नं मिष्टमस्तकम् ॥१०६॥

अथ तूतनामगुणाः।

तूतं तूदं ब्रह्मकोषं ब्राह्मण्यं ब्रह्मदारु च ॥१०७॥
तूतं पक्वं गुरु हिमं स्वादु पित्तानिलापहम् ॥१०८॥

अथ गङ्गेरुनामगुणाः।

गङ्गेरुकं कार्कटकं कारकं मृगलिण्डकम्।
तौदनं क्रन्दनञ्चान्यत् मृगविट्सदृशं तथा ॥१०९॥
गङ्गेरु रेचनं पक्वं गुरु वातास्रजित् मतम्।
तौदमं ग्राहि मधुरं वातपित्तहरं लघु ॥११०॥

अथ तुम्बरुनामगुणाः।

तुम्बरं टिविकं साङ्गसुष्णमामन्तु पित्तलम् ॥१११॥
कालायनफलैः पत्रैः केशराभैः समुद्गजैः।
वृक्षस्तुम्बरको ज्ञेयो भल्लातकसमो गुणैः॥ ११२॥
तुम्बरं कफजित् पाके कटूष्णं व्रणमेहहृत् ॥११३॥

अथ बीजपूरनामगुणाः।

बीजपूरो मातुलुङ्गः केशरी फलपूरकः ॥११४॥
बीजपूरफलं रुच्यं रसाम्लं दीपनं लघु।
रक्तपित्तहरं कण्ठजिह्वाहृच्छोधनं परम् ॥११५॥
तन्मांसं बृंहणं शीतं गुरु पित्तसमीरजित् ॥११६॥
केशरं लघु सग्राहि शूलगुल्मोदरापहम्।
बीजसुक्ष्मं कृमिघ्नं पवातजिद्गर्भदं गुरु ॥११७॥
तत्पुष्पं वातलं ग्राहि रक्तपित्तहरं लघु ॥११८॥

शूलाजीर्णविबन्धेषु मन्दाग्नौ कफमारुते।
अरुचौ श्वासकासेषु रसस्तस्य प्रशस्यते ॥११९॥

अथ मधुकर्कटीनामगुणाः।

मधुकर्कटिका स्वादुलुङ्गी घण्टालिका घटा ॥१२०॥
मधुकर्कटिका शीता रक्तपित्तहरा गुरुः ॥१२१॥
तन्मूलन्तु विसूचीघ्नं कर्णशोथविनाशनम् ॥१२२॥

अथ नारङ्गद्वयनामगुणाः।

नारङ्गी नागरङ्गः स्याद्गौरची योगसारकः ॥१२३॥
नारङ्गमम्लमत्युष्णं पित्तवातहरं सरम् ॥१२४॥
स्वाद्वम्लमपरं हृद्यं दुर्जरं वातनाशनम् ॥१२५॥

अथ जम्बीरनामगुणाः।

जम्बीरको दन्तशठो जम्भीरो जम्भलो मतः ॥१२६॥
जम्बीरमम्लं शूलघ्नं गुरूष्णं कफवातजित्।
आस्यवैरस्यहृत्पीडावह्निमान्द्यक्रमीन् जयेत् ॥१२७॥

अथ अम्लवेतसनामगुणाः।

आम्लोऽम्लवेतसयुक्तो वेतसः शरवेधकः ॥१२८॥
अम्लवेतसमत्युष्णं भेदनं लघु दीपनम्।
हृद्रोगशूलगुल्मघ्नं पित्तदृट्कफदूषणम् ॥१२९॥

अथ साराम्ल(निम्बु भेद.)नामगुणाः।

साराम्लकः सारफलो रसालः सारपादपः ॥१३०॥
साराम्लममृवातघ्नं गुरु पित्तकफप्रदम् ॥१३१॥

अथ निम्बूनामगुणाः।

निम्बूकं निम्बुकं राजनिम्बूकमपरं स्मृतम् ॥१३२॥
निम्बूकमम्लं वातघ्नं पाचनं दीपनं लघु ॥१३३॥
राजनिम्बूफलं स्वादु गुरु पित्तसमीरजित् ॥१३४॥

अथ कर्मरङ्गनामगुणाः ।

कर्मरङ्गं नागफलं भव्यं पिच्छिलवीजकम् ॥१३५॥
कर्मरङ्गं हिमं ग्राहि स्वादम्लं कफपित्तजित् ॥१३६॥

अथ अम्लिकानामगुणाः ।

अम्लिका चुक्रिका चिञ्चा तिन्तिड़ी शुक्तिचन्द्रिका ।
अम्लिकाऽऽमा गुरुर्वातहरा पित्तकफास्रजित् ॥१३७॥
पक्वा तद्वत्सरा रुच्या वह्निवस्तिविशुद्धिकृत् ॥१३८॥
शुष्का हृद्या श्रमभ्रान्तितृष्णाक्लमहरा लघुः ॥१४०॥

अथ तिन्तिडीनामगुणाः ।

तिन्तिडीकन्तु चुक्रञ्च वृक्षाम्लमम्लशाकोऽम्लपादपः ॥१४१॥
तिन्तिडीकं समीरघ्नमामम्लं परं गुरु ॥१४२॥
तत्पक्वं लघु संग्राहि ग्रहणीकफवातजित् ॥१४३॥

अथ करमर्दीनामगुणाः ।

करमर्दी सुषेणा स्यात्कृष्णा कृष्णफला मता ॥१४४॥
करमर्दी गुरूष्णाम्लं रक्तपित्तकफप्रदम् ॥१४५॥
तत्पक्वं मधुरं रुच्यं लघु पित्तसमीरजित् ॥१४६॥

अथ कपित्थनामगुणाः ।

कपित्थको दधिफलः कपित्थः सुरभिच्छदः ॥१४७॥
कपित्थमामं संग्राहि लघु दोषत्रयापहम् ॥१४८॥
पक्वं गुरु तृषाहिक्काशमनं वातपित्तजित् ॥१४९॥
स्वाद्वम्लं तुवरं कण्ठशोधनं ग्राहि दुर्जरम् ॥१५०॥

अथ कपित्थपर्णीनामगुणाः ।

कपित्थपर्णी फणिका सुरसा जीवपत्रिका ॥१५१॥
कपित्थपर्णी तीक्ष्णोष्णा कफमेहविषापहा ॥१५२॥

अथ आम्रातकनामगुणाः ।

आम्रातकस्त्वाम्रवटः फली मोदफलः कपिः ॥१५३॥

आम्रातमामवातघ्नं गुरूष्णं रुचिकृत् सरम् ॥१५४॥
पक्वं स्वादु हिमं हृद्यं मरुत्पित्तक्षयास्रजित् ॥१५५॥

अथ राजाम्रनामगुणाः ।

राजाम्राह्वं कामनामा कामाङ्गो राजपुत्रकः ॥१५६॥
राजाम्रं मधुरं शीतं ग्राहि पित्तकफापहम् ॥१५७॥

अथ पञ्चाम्लनामगुणाः ।

वृक्षाम्लं दाडिमी चिञ्चा कपित्थं चतुरम्लकम् ।
अम्लवेतसवृक्षाम्लदाडिमीबदरैः क्वचित् ॥१५८॥
बीजपूरयुतैरेतैः पञ्चाम्लमुदितं बुधैः ॥१५९॥

अथ कोशाम्रनामगुणाः ।

कोशाम्रको घनस्कन्धो जन्तुवृक्षश्च कोशकः ॥१६०॥
कोशाम्रः कुष्ठशोथास्रपित्तव्रणकफापहः ॥१६१॥
तत्फलं ग्राहि वातघ्नमम्लोष्णं गुरु पित्तलम् ॥१६२॥
पक्वं तत् दीपनं रुच्यं लघूष्णं कफवातजित् ॥१६३॥
मज्जा पित्तशमोरघ्नः स्वादुर्बल्योऽग्निदीपनः ॥१६४॥

अथ पूगीफलनामगुणाः ।

क्रमूकं क्रमुकं पूगं पूगीफलमुदाहृतम् ॥१६५॥
पूगं गुरु हिमं रूक्षं कषायं कफपित्तजित् ।
मोहनं दीपनं रुच्यमास्यवैरस्यनाशनम् ॥१६६॥
आर्द्रं तद् गुर्वभिष्यन्दि वह्निदृष्टिहरं परम् ।
स्निग्धं त्रिदोषहृत्सर्वं पक्वं शुष्कन्तु वातलम् ॥१६७॥
पूगं स्याद हृद्मध्येष्टं तद्धि नानाविधं हिमम् ।
पाकदेशादिभेदेन सिक्कणं सर्वदोषनुत् ॥१६८॥
क्रमिकृत् पूगपुष्पन्तु कषायं मधुरं गुरु ।
स्निग्धं त्रिदोषहृद् वर्ण्यं तद्भेदांस्तद्वदादिशेत् ॥१६९॥

अथ ताम्बूलनामगुणाः ।

ताम्बूलवल्ली ताम्बूली नागिनी नागवल्लरी ॥१७०॥
ताम्बूलं विशदं रुच्यं तीक्ष्णोष्णं तुवरं सरम् ॥१७१॥
तिक्तं चारं हन्ति कासं रक्तपित्तकरं लघु ।
वश्यं श्लेष्मास्यदौर्गन्ध्यमलवातश्रमापहम् ॥१७२॥

अथ ताम्बूल प्रशंसा ।

ताम्बूलं स्वर्णवर्णं क्रमुकफलयुतं सूक्ष्मसूक्ष्मीकृतं यत् ।
कर्पूरैणाण्डजाभ्यां क्षतखदिरवटीसौरभेणापि पूर्णम् ॥
चूर्णं मुक्तानुजातं शिशिरकिरणवत् प्रोज्ज्वलं तेन साकम् ।
दत्त्वा विप्राय पूर्वं तदनु नरपतिर्भक्षयेदात्मदत्तम् ॥१७३॥

अथ संयोगतःचूर्णखदिरगुणाः ।

चूर्णं कफानिलहरं खदिरं कफपित्तजित् ।
संयोगतो दोषहरं सौमनस्यं करोति च ।
मुखवैरस्यदौर्गन्ध्यकान्तिशोभाकरं परम् ॥१७४॥

अथ लवलीनामगुणाः ।

सुगन्धमूला लवली पाण्डुः कोमलवल्कल ॥१७५॥
लवल्याः फलमुद्दिष्टं श्यामं ज्योत्स्नाफलं तथा ॥१७६॥
लवलीफलमर्शोघ्नं वातपित्तहरं गुरु ।
विशदं रोचनं रुच्यं स्यादम्लं तुवरं रसे ॥१७७॥

तत्र परिभाषा ।

फलं तुल्यगुणं सर्वं मज्जानमपि निर्दिशेत् ॥१७८॥
फलं हिमाग्निदुर्वातव्यालकीटादिदूषितम् ।
अकालजातं नाश्नीयात् पाकातीतं कुभूमिजम् ॥१७९॥
आमं दोषकरं प्रायः फलं विल्वं विनाखिलम् ॥१८०॥
यस्य यस्य फलस्येह यो यो भवति यादृशम् ।
तस्य तस्यैव वीर्यं च मज्जानमपि निर्दिशेत् ॥१८१॥

व्याधितं कृमिसंजुष्टं पाकातीतमकालजम् ।
वर्जनीयात् प्रयत्नेन तथा पर्युषितं च यत् ॥१८२॥

इति द्राक्षादिफलवर्गः षष्ठः समाप्तः ।

—•—

अथ कुष्माण्डादिशाकवर्गः ।

राधापदाब्जे निपतन् विनोदी
मानायतुल्ये जगदेकवन्द्यः ।
केनापि कामेन स गोपरूपी
पायादपायात् पुरुषः पुराणः ॥ १ ॥

अथ शाकनिरूपणम् ।

शाकं चतुर्धा तत्पुष्पच्छदकन्दफलैः स्मृतम् ॥ २ ॥
सर्वशाकेषु जीवन्तो श्रेष्ठा निन्द्यस्तु सर्षपः ॥ ३ ॥

अथ कुष्माण्डनामगुणाः ।

कुष्माण्डको पुष्पफलो पचनालियतुर्विधः ।
कर्कारुरफलाकन्दो स्यादारूराजकर्कटी ॥ ४ ॥
कुष्माण्डं बृंहणं शीतं गुरु पित्तास्रवातजित् ॥ ५ ॥
बालं पित्तापहं शीतं मध्यमं कफकारकम् ॥ ६ ॥
पक्वं नातिहिमं स्वादु सक्षारं दीपनं लघु ।
वस्तिशुद्धिकरं चेतोरोगदोषचयापहम् ॥ ७ ॥
कुष्माण्डं नातिमधुरं वाताम्लरिकफापहम् ।
तच्चाज्ञा पित्तनुद् हृद्यो मधुरो वस्तिशोधनः ॥ ८ ॥

अथ कर्कटी(काँकुड़)नामगुणाः ।

कर्कटी लोमशो व्यालपत्रैर्वारुस्तु ह्रस्वफला ॥ ९ ॥
कर्कटी शीतला रूक्षा ग्राहिणी मधुरा गुरुः ।
रुच्या पित्तहरा आमा पक्वोष्णा पित्तवर्द्धिनम् ॥ १० ॥
कर्कटं शीतलं ग्राहि रक्तपित्तहरं गुरु ।

पक्वं पित्ताग्निजननं सक्षारं श्लेष्मवातजित् ॥ ११ ॥

अथ कालिङ्ग(तरमुज)नामगुणाः ।

कालिङ्गं कृष्णबीजं स्यात् कालिङ्गं फलवर्त्तुलम् ॥ १२ ॥
कालिङ्गं ग्राहि दृक्पित्तशुक्रघ्नं शीतलं गुरु ।
पक्वन्तु सोष्णं सक्षारं पित्तलं कफवातजित् ॥ १३ ॥

अथ मिष्टतुम्बो(लाउ)नामगुणाः ।

तुम्बीमिष्टा महातुम्बी राजालाबुरलाबुनी ॥ १४ ॥
मिष्टतुम्बीफलं हृद्यं कफपित्तहरं गुरु ॥ १५ ॥

अथ कटुतुम्बीनामगुणाः ।

कटुतुम्बी पिण्डफला राजपुत्री च तुम्बिनी ॥ १६ ॥
कटुतुम्बी हिमा हृद्या पित्तकासविषापहा ॥ १७ ॥

अथ त्रपुष(शसा)नामगुणाः ।

त्रपुषं कण्टकिलता सुधावासोऽपरं कटुः ।
छर्दिपर्णी मूत्रफला पित्तकं हस्तिपर्णिनी ॥१८॥
त्रपुषं मूत्रलं शीतं रूक्ष पित्तास्रकृच्छ्रनुत् ।
तत्पक्वमुष्णमम्लं स्यात् पित्तलं कफवातजित् ॥१९॥

अथ चिर्भट(गोमुक्)नामगुणाः ।

चिर्भटं धेनुदुग्धं स्यात् ज्ञेयं गोरक्षकर्कटी ॥२०॥
चिर्भटं मधुरं रूक्षं गुरु पित्तकफापहम् ।
शीत विष्टम्भि संग्राहि पक्वमुष्णञ्च पित्तकृत् ॥२१॥

अथ वालुक(फूटी)नामगुणाः ।

वालुकं काण्डकं वालु तच्छीतं मधुरं गुरु ।
रक्तपित्तहरं भेदि लघूष्णं पक्वमग्निकृत् ॥२२॥

अथ शीर्णवृन्तनामगुणाः ।

शीर्णवृन्तं चित्रफलं विचित्रं पीतवर्णकम् ॥२३॥
शीर्णवृन्तं लघु स्वादु भेद्युष्णं वह्निपित्तकृत् ॥२४॥

अथ कोशातकी(झिञा)नामगुणाः ।
कोशातकी क्षतच्छिद्रा जालिनी क्षतवेधना ।
मृदङ्गफलिनी क्ष्वेड़ा घण्टाली कर्कशच्छदा ॥२५॥
कोशातकी लघुस्त्रिग्धा रूक्षामाशयशोधनी ।
शोफपाण्डूदरश्लीहकुष्ठार्शःकफपित्तजित् ।
तत्फलं भेदनं शीतं लघु मेहत्रिदोषजित् ॥२६॥

अथ राजकोशातकीनामगुणाः ।
राजकोशातकी मिष्टा महाजालिः सपीतका ॥२७॥
राजकोशातकी शीता ज्वरघ्नी कफवातला ॥२८॥

अथ महाकोषातकी(धुन्दुल)नामगुणाः ।
महाकोशातकी त्वन्या हस्तिघोषा महाफला ॥२९॥
महाकोशातकी स्निग्धा मिष्टा पित्तानिलापहा ॥३०॥

अथ वृन्ताकी(बेगुण)नामगुणाः ।
वृन्ताकी वार्त्ताकी वार्त्ता भण्टाकी भण्टिका मता ॥३१॥
वृन्ताकं स्वादु तीक्ष्णोष्णं कटुपाकञ्च पित्तलम् ।
कफवातहरं हृद्यं दीपनं शुक्रलं लघु ।
ज्वरारोचककासघ्नं पक्वं तत् पित्तलं गुरु ॥३२॥

अथ श्वेतवार्त्ताकुनामगुणाः ।
अपरः श्वेतवार्त्ताकुः कुक्कुटाण्डफलोपमः ।
तस्मात्हीनगुणः किञ्चिदर्शसाञ्च हितः स्मृतः ॥३३॥

अथ बिम्बी(तेलाकुचा)नामगुणाः ।
बिम्बी रक्तफला शोना तुण्डी दन्तच्छदोपमा ॥३४॥
बिम्बी वान्तिप्रदा हन्ति रक्तपित्तास्रकामलाः ।
तत्फलं शीतलं स्वादु गुरु पित्तास्रदाहजित् ।
स्तम्भनं लेखनं रूच्यं विबन्धाध्मानकारकम् ॥३५॥

अथ कारवेल्ल(करला)नामगुणाः ।

कारवेल्लं कटिल्लं स्यादुग्रकाण्डं सुकाण्डकम् ।
कारवल्ली वारिवल्ली तद्वदल्पपरा स्मृता ॥३६॥
कारवेल्लं हिमं भेदि लघु तिक्तमवातलम् ।
पित्तास्रकामलापाण्डुकफमेहक्रमीन् जयेत् ॥३७॥

अथ कर्कोटकीनामगुणाः ।

कर्कोटकी पीतपुष्पा महाजाली निरूच्यते ॥३८॥
तद्वत् कर्कोटकं पुष्पं हृल्लासारुचिनाशनम् ॥३९॥

अथ बन्ध्याकर्कोटकी(तिरकाँकरोल)नामगुणाः ।

बन्ध्याकर्कोटकी देवी नागारिर्विषकण्टका ॥४०॥
वन्ध्याकर्कोटकी तीक्ष्णा विषविसर्पकासजित् ॥४१॥

अथ डोडिकानामगुणाः ।

डोडिका विषमुष्टिः स्याद् विषयष्टिः सुमुष्टिका ॥४२॥
डोडिका कफपित्तार्शः क्रमिगुल्मविषापहा ॥४३॥

अथ डिण्डिश(ढ्याँडस)नामगुणाः ।

डिण्डिशो रोमशफलो टिण्डिशो मुनिनिर्मितः ॥४४॥
डिण्डिशो वातलो रूक्षो मूत्रलोऽश्मरिभेदकः ॥४५॥

अथ कोलशिम्बी(कटरासिम)नामगुणाः ।

कोलशिम्बी कृष्णफला खड्गा शूकरपादिका ॥४६॥
कोलशिम्बी समीरघ्नी गुर्वामकफपित्तकृत् ॥४७॥

अथ शिम्बीनामगुणाः ।

शिम्बी कुशिम्बी कुक्कुटशिम्बी पुस्तकशिम्बिका ॥४८॥
शिम्बी शीता गुरुर्बल्या रूक्षपक्वा वातपित्तजित् ॥४९॥

अथ वास्तुक(बिलीशाक)नामगुणाः ।

वास्तुकः शाकपत्रः स्यात् कम्बीरव प्रसादकः ॥५०॥
वास्तुकः पाचनो रुच्यो लघुः शुक्रबलप्रदः ।

सरः श्लोष्मासपित्तार्शः क्रमिदोषत्रयापहः ॥५१॥

अथ जीवन्तनामगुणाः।

जीवन्तकः शाकवीरो रक्तनालः प्रनालकः ॥५२॥
जीवन्ती वातहृत् चारः स्वादुपाका त्रिदोषनुत् ॥५३॥

अथ चिल्लीनामगुणाः।

चिल्ली सरा लघुः शीता रुच्या मेध्याग्निदीपनी।
बल्या रूक्षा हरेत् श्लीहरक्तदोषत्रयक्रमीन् ॥५४॥

अथ कालचञ्चुशाकनामगुणाः।

कालशाकं कालिका स्यात् चुञ्चुका चुञ्चुकोऽपरः ॥५५॥
कालशाकं सरं रुच्यं वातलं कफशोफजित् ॥५६॥
रुच्यं पवित्रमायुष्यं नातिपित्तप्रकोपणम् ॥५७॥
चुञ्चुः शीता सरा रुच्या स्वाद्वी दोषत्रयापहा ॥५८॥

अथ तण्डुलीयद्वय(नटे)नामगुणाः।

तण्डुलीयो मेघनादः भण्डीरस्तण्डुलीयकः ॥५९॥
विषघ्नः कचटोऽन्यः स्यात् मारीषो मार्षिकस्तथा ॥६०॥
तण्डुलीयो लघुः शीतो रूक्षः पित्तकफास्रजित्।
सृष्टमूत्रमलो रुच्यो दीपनो रक्तपित्तहा ॥६१॥
मारिषो रेचनः शीतो गुरुर्मदस्त्रिदोषजित् ॥६२॥

अथ फोगनामगुणाः।

फोगो मरूद्भवः शृङ्गी सूक्ष्मपुष्पः शशादनः ॥६३॥
फोग संग्राहकः शीतो रक्तपित्तकफापहः ॥६४॥

अथ पटोलनामगुणाः।

पटोलः पाण्डुको राजी कुलकः कर्कशच्छदः।
राजिफलः पाण्डुफलो राजिमानमृताफलम् ॥६५॥
तिक्तोत्तमा बीजगर्भाऽपरा राजपटोलिका।
ज्योत्स्नी पटोलिका जाली नादेयी भूमिजम्बुका ॥६६॥

पटोलं पाचनं हृद्यं हृष्यं लघ्वग्निदीपनम्।
स्निग्धोष्णं हन्ति कासास्रज्वरदोषत्रयक्रमीन् ॥६७॥
पत्रं पित्तहरं शीतं तस्य वल्ली कफापहा।
मूलं विरेचनं प्रोक्तं फलं दोषत्रयापहम् ॥६८॥

अथ चञ्चुद्वयनामगुणाः।

चञ्चुडी चैभकूलोऽन्यः श्वेतराजी वृहत्फला ॥६९॥
किञ्चिन्न्यूनगुणस्तस्मात् विशेषात् शोषणे हितः ॥७०॥

अथ पालक्या(पालङ्)नामगुणाः।

पालक्या वास्तुकाकारा क्षुरिका चीरितच्छदा ॥७१॥
पालक्या वातला शीता भेदिनी श्लेष्मला गुरुः।
विष्टम्भिनी मदश्वासरक्तपित्तकफापहा ॥७२॥

अथ पोतकीनामगुणाः।

पोतस्तुपोदिका मोक्ता मत्स्यकाली सुरङ्गिका ॥७३॥
पोतकी शीतला स्निग्धा श्लेष्मला वातपित्तजित्।
अकण्ठ्या पिच्छिला निद्राशुक्रदा रक्तपित्तनुत्।
बलदा रुचिकृत् पथ्या बृंहणी तृप्तिकारिणी ॥७४॥

अथ लोणी-कुटेरनामगुणाः।

लोणिकोक्ता बृहच्छोटी कुटिरम् कुटिञ्जरः।
दुन्दुरः स्यात् गुडोरीकः पिण्डी पिण्डीतकस्तथा ॥७५॥
लोणी रूक्षा गुरुः शीता सरा विष्टम्भिनी पटुः।
दीपना मधुरा पाके तद्वत् कुटेरकद्गुरु ॥७६॥
लोणिका वातला श्वासकासप्रमेहविषापहा ॥७७॥

अथ सुनिषण्ण तिलपर्णीनामगुणाः।

सुनिषण्णः स्वस्तिकः स्यात् यत्तदस्तिलपर्णिका ॥७८॥
सुनिषण्णो हिमो ग्राही मोहदोषत्रयापहा ॥७९॥
तिलपर्णी हिमा रूक्षा ग्राहिणी कफपित्तजित् ॥८०॥

अथ सूक्ष्मपत्रनामगुणाः।

सूक्ष्मपत्रस्तीक्ष्णशाको धनुःपुष्पः सुबोधकः ॥८१॥
चौरकः कफवातघ्नः सुतीक्ष्णो नातिपित्तलः ॥८२॥

अथ टुटुकनामगुणाः।

टुटुको विटपी रूक्षः स्वरपत्रस्त्वरण्डजः ॥८३॥
टुटुको वातलो रूक्षो विष्टम्भी कफनाशनः ॥८४॥

अथ वस्तिजनामगुणाः।

घनागमभवा वल्ली प्रसिद्धो नाम वस्तिजः ॥८५॥
घनागमे त्रिदोषघ्नस्तत्पुष्पं मधुरं सरम् ॥८६॥
फलं तस्य सरं हृद्यमामं मिष्टन्तु वातलम् ॥८७॥

अथ शीतवार नाडीनामगुणाः।

शीतवारः कुरण्डी स्यान्नाडी तु नलिकाऽपरा ॥८८॥
शीतवारः सरो हृद्य. शोथघ्नो वातपित्तलः ॥८९॥
नाडी सरा लघु. शीता पित्तनुत् कफवातला ॥९०॥

अथ सार्षप-कौसुम्भनामगुणा ।

सार्षपं सर्षपोद्भूत कौसुम्भ कुङ्कुमोद्भवम् ॥९१॥
सार्षप बद्धविण्मूत्रं गुरूष्णं च त्रिदोषकृत् ॥९२॥
कौसुम्भं स्वादु रूक्षोष्णं कफजित् पित्तल लघु ॥९३॥

अथ चणकनामगुणा ।

चणकं शाकमुद्दिष्ट दुर्जर कफवातकृत् ॥९४॥

अथ कलायनामगुणा ।

कलायशाकं भेदि स्यात् लघु पित्तकफापहम् ॥९५॥

अथ चाङ्गेरी(आमरूल)नामगुणा. ।

चाङ्गेरी त्वाम्लिका चुक्रा क्षुद्राम्लिका चतुश्छदा ॥९६॥
चाङ्गेरी दीपनी रुच्या लघूष्णा कफवातजित्।
सपित्तला ग्रहण्यर्शःकुष्ठातीसारनाशिनी ॥९७॥

अथ कासमर्द-गृञ्जननामगुणाः।

कासमर्दः कर्कशः स्याद् गृञ्जनो गर्जरस्तथा ॥९८॥
कासमर्दो लघुः कण्ठ्यः कासदोषविपासजित् ॥९९॥
गृञ्जनः कटुकस्तीक्ष्णस्तिक्तोष्णो दीपनो लघुः ॥१००॥
संग्राही रक्तपित्तार्शोग्रहणीकफवातजित् ॥ १०१॥

अथ मूलकनामगुणाः।

मूलकं हस्तिदन्तश्च बालमूलं कफान्तकम् ॥ १०२॥
मूलकं वातलं रुच्य सर्व्योष्णं पाचनं लघु,।
हन्ति त्रिदोषजं श्वासगदाक्षिगलपीनसम् ॥१०३॥
स्नेहसिद्धं तदेव स्यात् दोषत्रयविनाशनम् ॥१०४॥
शुष्कं तत् हि विशोथघ्नं लघु दोषत्रयापहम् ॥१०५॥
तत्पुष्पं श्लेष्मपित्तघ्नं फलं वातकफापहम् ॥१०६॥

अथ करीरनामगुणाः।

करीरको गूढपत्रः क्रकचो ग्रन्थिलो मतः ॥१०७॥
करीरः कटुको भेदी तीक्ष्णोष्णः कफवातजित्।
व्रणशोथविषार्शोघ्नः तत्पुष्पं कफपित्तजित् ॥१०८॥
फलं ग्राहि कषायोष्णं मधुरं श्लेष्मपित्तकृत् ॥१०९॥

अथ शोभाञ्जनद्वयनामगुणाः

शिग्रुः शोभाञ्जनः कृष्णगन्धः स्याद् बहुलच्छदः ॥११०॥
रक्तोऽन्यो मधुशिग्रुस्तु श्वेतोऽन्यो हरितच्छदः ॥१११॥
तद्बीजं श्वेतमरिचं तीक्ष्णोष्णं चक्षुषे हितम् ॥११२॥
शिग्रुस्तीक्ष्णो लघुर्ग्राही वह्निदः कफवातजित्।
कटूष्णो विद्रधिप्लीहव्रणघ्नो रक्तपित्तकृत् ॥११३॥
मधुशिग्रुर्गुणैस्तद्वद्विशेषाद् दीपनः सरः ॥११४॥
तत्पुष्पं लघु, संग्राहि वातलं कफशोथजित् ॥११५॥

फलं ग्राहि कषायोष्णं मधुरं स्वे अपित्तहृत् ॥११६॥

अथ लशुनद्वयनामगुणाः ।

लशुनः स्वादुगन्धो यवनेष्टो रसोनकः ॥११७॥
गृञ्जनोऽन्यो महाकन्दो जर्जरो दीर्घपत्रकः ॥११८॥
लशुनो बृंहणो वृष्यः स्निग्धोष्णः पाचनः सरः ।
भग्नसन्धानकृत् केश्यो गुरुः पित्तास्रवृद्धिदः ॥११९॥
रसायनं कफश्वासकासगुल्मज्वरारुचीः ।
हन्ति शोथप्रमेहार्शःकुष्ठशूलानिलक्रमीन् ॥१२०॥
तत्पत्रं मधुरं चारं नाली मधुरपित्तला ॥१२१॥
गृञ्जनः पित्तलो ग्राही तीक्ष्णोऽर्शोरोगनाशनः ॥१२२॥
गन्धाकृतिरसैस्तुल्यः सूक्ष्मनालः पलाण्डुवत् ॥१२३॥

अथ पलाण्डुनामगुणाः ।

पलाण्डुर्यवनाख्यश्च दुर्गन्धो मुखदूषकः ॥१२४॥
पलाण्डुस्तद्गुणैस्तुल्यः कफकृत् नातिपित्तलः ।
हरते केवलं वातं स्वादु पाके रसान् जयेत् ॥१२५॥

अथ शूरणत्रयनामगुणाः ।

शूरणः कन्दलः कन्दो गुदामयहरोऽपरः ॥१२६॥
वज्रकन्दः सुरेन्द्रः स्यात् वन्योऽन्यश्चिवकन्दकः ॥१२७॥
शूरणो दीपनो रूक्षः कषायः कण्डूकृत् कटुः ।
विष्टम्भी विशदो रुच्यः कफार्शःकृन्तनो लघुः ॥१२८॥
नालं शूरणकं रुच्यं कफवातहरं लघु ।
अर्शसां तु विशेषेण हितं कामाग्निदीपनम् ॥१२९॥
तद्वत् वन्यो वज्रकन्दः कफघ्नः पित्तरक्तकृत् ॥१३०॥

अथ अस्थिशृङ्खलिकानामगुणाः ।

अस्थिशृङ्खलिका वज्री ग्रन्थिमानस्थिसंहृतिः ॥१३१॥
अस्थिशृङ्खलिका हृद्या स्वे अम्ला मधुरा हिमा ।

अस्थिसन्धानकृद् बल्या पित्तरक्तानिलापहा ॥१३२॥

अथ वाराही(शकरकन्द)नामगुणाः।

वाराही माधवी गृष्टिश्चालकन्दः शौकरो किटिः ॥१३३॥
वाराही पित्तला बल्या स्वादी तिक्ता रसायनी।
आयुःशुक्राग्निकृत् मेहकफकुष्ठानिलापहा ॥१३४॥

अथ मुसलीनामगुणाः।

मुसली तालपत्री स्यात् खलिनी तालमूलिका ॥१३५॥
मुसली बृंहणी बल्या वीर्य्याग्न्यार्शोऽनिलापहा ॥१३६॥

अथ कचुकनामगुणाः।

कचुका पीलुनी घोलुः फेलुका दलशालिनी ॥१०७॥
कचुकं वातलं ग्राहि दीपनं कफपित्तनुत् ॥१३८॥

अथ भूच्छत्रनामगुणाः।

भूच्छत्रं पृथिवीकन्दः शिलीन्ध्रं चनक मतम् ॥१३९॥
भूच्छत्रं शीतलं वन्यं गुरु भेदि त्रिदोषजित् ॥१४०॥

अथ स्थूलकन्द(कचु)-मानकन्दनामगुणाः।

स्थूलकन्दो याम्यकन्दो मानकन्दो महच्छदः ॥१४१॥
स्थूलकन्दो गुरुः श्लेष्मवातलः पित्तशोथजित्।
मानकः शीतलः स्वादुः पित्तरक्तहरो गुरुः ॥१४२॥

अथ कसेरुद्वय-शृङ्गाटनामगुणाः।

कसेरुकं स्वल्पकन्दं बृहद्राजकसेरुकम् ॥१४३॥
शृङ्गाटो जलकन्दः स्यात् त्रिकोणस्त्रिकटः खुरः ॥१४४॥
कसेरुकं हिमं स्वादु गुरु पित्तास्रदाहजित्।
ग्राहि पित्तास्रमर्द्दं श्रमदं शृङ्गाटकं तथा ॥१४५॥

अथ पिण्ड मध्य शङ्ख-काष्ठ-हस्त-रक्तालुनामगुणाः।

पिण्डालुकं हयगन्धः माध्वालु स्यात् तु रोमशम्।
महालुर्विषशङ्खाख्यं काष्ठालुः स्वल्पकाष्ठकम् ॥१४६॥

हस्त्यालुकं महत्काष्ठं रक्तकन्दं महत्फलम् ॥१४७॥
आलुकं शीतलं सर्वं विष्टम्भि मधुरं गुरु।
सृष्टमूत्रमलं रूक्षं दुर्जरं रक्तपित्तजित्।
कफानिलकरं बल्यं हृद्यं स्तन्यविवर्द्धनम् ॥१४८॥
पिण्डालुकमभिष्यन्दि तिक्तोष्णं दीपनं गुरु ॥१४९॥
मध्वालुकं पित्तकरं कटु पाके कफापहम् ॥१५०॥

। अथ केयूरनामगुणाः।

केयूरं स्वल्पविटपं कन्दलः स्वादुकन्दलः ॥१५१॥
केयूरं शीतलं ग्राहि पित्तलं कफवातजित् ॥१५२॥

अत्र परिभाषा।

अतिजीर्णमकालोत्थं रूक्षं स्निग्धमभूमिजम्।
शुष्कं शाकञ्च सकलं नाश्नीयात् मूलकैर्विना ॥१५३॥

यो राज्ञां मुखतिलकः कटारमल्ल-
स्तेन श्रीमदननृपेण निर्मितेऽत्र।
ग्रन्थेऽभूत् मदनविनोदनाम्नि पूर्णः
कुष्माण्डप्रभृतिरयञ्च शाकवर्गः ॥१५४॥

इति कुष्माण्डादिशाकवर्गः सप्तमवर्गः।

—०—

अथ पानीयादिवर्गः।

करेण संगृह्य कुचौ कपोले मावाङ्गुलीभिर्द्रुताद्यमानम्।
मुक्ताम्बराजानुयलेन पान्तं नमामि कृष्णं नवनीतचौरम् ॥ १ ॥

अथ पानीयनामगुणाः।

पानीयं जीवनं नीरं कीलालममृतं जलम्।
आपोऽम्भस्तोयमुदकं पाथोऽम्बु सलिलं पयः ॥ २ ॥

पानीयं शीतलं हृद्यं हन्ति पित्तविषभ्रमम्।
दाहाजीर्णश्रमच्छर्दिमदमूर्च्छामदात्ययान् ॥ ३ ॥
शीतलं स्तिमिते कोष्ठे गलरोगे नवज्वरे।
ग्रहणीपीनसाध्मानहिक्कागुल्मेषु विद्रधौ ॥ ४ ॥
कासमेहारुचिश्वासपाण्डुवातामयेषु च।
पार्श्वशूले स्नेहपीते सदाः शुद्धौ न शस्यते ॥ ५ ॥
दिव्यं तुषारजं धारं करि हैममिति स्मृतम्।
चतुर्विधं वरं धारं लघुत्वात् तत् पुनर्द्विधा ॥ ६ ॥
गाङ्गं सामुद्रजञ्चेति गाङ्गं श्रेष्ठतमं स्मृतम्।
आश्विने मासि सामुद्रं गुणैर्गाङ्गवदाचरेत् ॥ ७ ॥
स्थापिते हैमजे पात्रे राजते स्फटिकेऽपि वा।
तज्जलं शीतलं श्रेयं दोषत्रयविषापहम् ॥ ८ ॥
तस्माद् सर्वदोषघ्नं पेयं सामुद्रमन्यथा।
सक्षारं लवणं मिश्रं शुक्रदृष्टिबलापहम् ॥ ९ ॥
सौम्यं रसायनं दिव्यं मोहनिद्राभिदोषजित्।
पाचनञ्च व्यथामूर्च्छातन्द्रादाहक्लमापहम् ॥ १० ॥
आश्वासजननं ह्लादि श्रमभ्रमतिबुद्धिकृत्।
तदेव भूमिपतितं भौममित्यभिधीयते ॥११॥
दिव्याभावे तु तत् तोयं प्रविचार्य्या गुणागुणाः ॥१२॥
कौपं श्लेष्महरं धारं पित्तलं दीपनं लघु ॥१३॥
ताडागं वातलं स्वादु तुवरं कटुपाकि च ॥१४॥
वाप्यं पित्तकरं क्षारं कटु वातकफापहम् ॥१५॥
नैर्झरं लेखनं हृद्यं कफघ्नं दीपनं लघु ॥१६॥
ह्रादञ्च लघु पित्तघ्नमविदाह्यतिदीपनम् ॥१७॥
चौण्ड्रमग्निप्रदं रूक्षं स्वादु श्लेष्महरं लघु ॥१८॥
नादेयं दीपनं रूक्षं वातलं लघु लेखनम् ॥१९॥

सारसं मधुरं वल्यं तृष्णाघ्नं तुवरं लघु ॥२०॥
केदारं स्वादभिष्यन्दि विपाके गुरु दोषलम् ॥२१॥
पाल्वल तद्वदुद्दिष्टं विशेषात् सर्वदोषकृत् ।
तौषारं वातलं शीतं रूक्षं पित्तकफापहम् ॥२२॥
धारं भूमावपतितं दिव्यं तत् सर्वदोषनुत् ॥२३॥
नैर्झरं गुरु वै शीतं विषदं कफवातनुत् ॥२४॥
हैमं गुरुतरं शीत पित्तनुद् वातवर्द्धनम् ॥२५॥
चन्द्रकान्तजलं रूक्ष लघु पित्तविषास्रनुत् ॥२६॥
दिवा रविकरैर्जुष्टं निशि शीतकरांशुभिः ।
ज्ञेयं हंसोदकन्नाम स्निग्धं दोषत्रयापहम् ॥२७॥
अनभिष्यन्दि निर्दोषमन्तरिक्षजलोपमम् ।
वल्यं रसायनं मेध्यं शीतं लघु सुधोपमम् ॥२८॥
वर्षासु दिव्यं पानीयमौद्भिद वा प्रशस्यते ।
शरत्प्रसन्नमुदकमगस्त्योदयनिर्विषम् ॥२९॥
हेमन्ते सारसं तोय ताडाग वा गुणावहम् ।
वसन्तग्रीष्मयो. कौप्य वाप्यं नैर्झरमेव च ॥३०॥
प्रावृषि प्रवरश्चौञ्चं मलविष्टम्भिकारि च ॥३१॥
नद्यः शीघ्रवहाः लघ्व्. सर्वा याश्चामलोदकाः ।
मन्दगाः कलुषा गुर्व्यो याश्च शैवालसेविता. ।
हिमवत्प्रभवा पथ्या नद्योऽश्माहतपायसः ॥३२॥
गङ्गाशतद्रुसरयुयमुनाद्या गुणोत्तमा ।
ईषत्पित्तकराः स्वच्छाः पुण्या वातकफापहाः ॥३३॥
मलयाचलजा नद्यो लघ्वः शीघ्रवहा हिता. ॥३४॥
कृतमाला ताम्रपर्णीप्रमुखा विमलोदकाः ॥३५॥
स्थिरापश्च प्रभावा ये कुर्वन्ति श्लीपदापचौ. ।
शोथपादशिरःकण्ठगलरोगार्बुदक्रमीन् ॥३६॥

सद्यः शैलभवा नद्यो वेणीगोदावरीमुखाः ।
कुर्वन्ति प्रायशः कुष्ठमीपद्वातकफापहाः ॥३७॥
विन्ध्याचले भवाः शिप्रारेवाद्याः पाण्डुकुष्ठदाः ॥३८॥
पारियात्रोद्भवाः प्रोक्ता द्विधा चर्मण्वतीमुखाः ॥३९॥
पथ्यास्तड़ागजास्तत्र त्रिदोषघ्नी बलापहाः ॥४०॥
दरीजाः कुष्ठकं वह्निश्लेष्मश्लीपदरोगदाः ॥४१॥
प्राच्यावन्त्यपराः पश्चात् गुदजानि प्रकुर्वते ॥४२॥
मरुजा मधुरा बल्या लघवोऽग्निप्रदाः परम् ॥४३॥
पश्चिमाम्भोधिपतिताः गोमतीनर्मदादयः ।
पथ्या वातास्रपित्तघ्नी बल्याः कण्डूकफापहाः ॥४४॥
दक्षिणाब्धिगता बल्याः पित्तघ्नाः कफवातदाः ॥४५॥
पूर्वाम्भोधिवहा नद्यो मन्दगा गुरवो घनाः ॥४६॥
भौमानामम्भसां प्रातः सर्वेषां ग्रहणं वरम् ।
नैर्मल्यं तत्र शैत्यं तत्तेषां स च परो गुणः ॥४७॥
भुक्तादौ सलिलं पीतं कार्श्यं मन्दाग्निदोषकृत् ।
मध्येऽग्निदीपनं श्रेष्ठमन्ते स्थौल्यकफप्रदम् ॥४८॥
जीवन्ति जीवनात् जीवा जगत् सर्वन्तु तन्मयम् ।
अतोऽत्यन्ततया सुप्तैर्न क्वचिद्वारि वार्य्यते ॥४९॥
पानीयं प्राणिनां प्राणा विश्वमेव हि तन्मयम् ।
अतोऽत्यन्तनिषेधेऽपि न क्वचिद् वारि वार्य्यते ॥५०॥
अजीर्णे क्वथितं चामे पक्वे जीर्णे च तज्ज्वरैः ॥५१॥
तृषितस्तु विदग्धेऽन्ने यः पिबेत् शीतलं जलम् ।
विदाहः प्रथमं याति शेषमन्नञ्च जीर्य्यते ॥५२॥
आकूपं दोषकृद्वारि प्रायोऽभिष्यन्दि निन्दितम् ॥५३॥
जाङ्गलं हन्ति सकलं दोषमग्निप्रदीपनम् ॥५४॥
साधारणं हिमं स्वादु तृष्णाघ्नं हर्षदं लघु ॥५५॥

वर्षासु योऽवगाहेत पिबेदथ नवं पयः।
पर्णादिदुष्टं लभते स वाह्याभ्यन्तरामयान् ॥५६॥
कलुषं छन्नमम्भोजपर्णनीलीतृणादिभिः।
दुष्टगन्धाद्यसंसृष्टं सूर्याचन्द्रमसांशुभिः ॥५७॥
व्यापन्नमिति जानीयात् सर्वदोषप्रकोपकृत्।
तोयं तद्वर्जयेत् सर्वं यथामर्तुंसमुद्भवम् ॥५८॥
व्यापन्नमिति पानीयं कथितं सूर्यतापितम्।
तप्तायः सूर्यसिकताग्रावादिष्वथ धारितम् ॥५९॥
कर्पूरयूथिकापुन्नागपाटलादिसुवासितम्।
स्वच्छं कनकमुक्ताद्यैः शीतं दोषाय न क्वचित् ॥६०॥
तत् क्वाथ्यमानं निष्फेनं निर्वेगं निर्मलं जलम्।
तत् सर्वदोषशमनं दीपनं पाचनं लघु ॥६१॥
उष्णं तदग्निजननं लघु तदग्निशोधनम्।
पार्श्वरुक्पीनसाध्मानहिक्कानिलकफापहम् ॥६२॥
तत् पादहीनं वातघ्नमर्द्धहीनञ्च पित्तजित्।
त्रिपादहीनं श्लेष्मघ्नं संग्राह्यग्निप्रदं लघु ॥६३॥
निहन्ति श्लेष्मसङ्घातं मारुतञ्चापि कर्षति।
अजीर्णं जरयत्याशु पीतमुष्णोदकं निशि।
पादावशेषं सलिलं ग्रीष्मे शरदि शस्यते ॥६४॥
हेमन्ते शिशिरे वर्षास्वर्द्धहीनमथापि च।
शृतशीतं सदा पथ्यं लघु नीरं त्रिदोषनुत्।
तच्च पर्युषितं निघ्नमम्लीभूतं त्रिदोषकृत् ॥६५॥
दिवा शृतं पयो रात्रौ गुरुतामधिगच्छति।
रात्रौ शृतं दिवा पीतं तथा दोषकरं परम् ॥६६॥

अथ साधारण दुग्धनाम गुणाः।

दुग्धं प्रस्रवणं क्षीरं सौम्यं सञ्जीवनं पयः ॥६७॥

दुग्धं बलकरं शीतं मधुरं वातपित्तजित्।
स्निग्धं रसायनं मेध्यं जीवनं धातुवर्द्धनम्।
चेतोरक्तगदश्वासक्षयार्शोभ्रमतृड् गुरु ॥६८॥
बालवृद्धक्षताद्यानां स्त्रीसक्तानां प्रशस्यते।
प्रायः प्राणभृतां सात्म्यं विशेषादोजसे हितम् ॥६८॥

अथ गोदुग्धनामगुणाः।

गोक्षीरं मधुरं शीतं गुरु स्निग्धं रसायनम्।
हृंदयं स्तन्यशुक्रवर्ण्यं जीवनं वातपित्तनुत् ॥७०॥
कृष्णगवां वरं क्षीरं श्वेतानां श्लेष्मलं गुरु।
बालवत्सविवत्सानां गवाक्षीरं त्रिदोषहृत् ॥७१॥
पिण्याकाद्यशनाज्जातं क्षीरं गुरु कफापहम् ॥७२॥

अथ अजादुग्धनामगुणाः।

आजं गव्यगुणं ग्राहि विशेषाद्दीपनं लघु।
हन्ति क्षयार्शोऽतीसारप्रदरासभ्रमज्वरान् ॥७३॥
अजानामल्पकायत्वात् कटुतिक्तादिभक्षणात्।
स्तोकाम्बुपानाद् व्यायामात् पयः सर्वगदापहम् ॥७४॥

अथ आविकदुग्धनामगुणाः।

आविकं मधुरं केश्यं स्निग्धं वातकफापहम्।
गुरु कासेऽनिलोद्भूते केवले चानिले वरम् ॥७५॥

अथ महिषीदुग्धननामगुणाः।

माहिषं मधुरं गव्यात् स्निग्धं गुरु बलप्रदम्।
निद्राशुक्रकरं शीतं मलाभिष्यन्दि वह्निनुत् ॥७६॥

अथ नारीदुग्धनामगुणाः।

नार्य्या लघु पयः शीतं दीपनं वातपित्तजित्।
चक्षुःशूलाभिघातघ्नं नस्याश्चोतनयोर्वरम् ॥७७॥

अथ हस्तिनीदुग्धनामगुणाः।

हस्तिन्याः स्वादु बलकृत् चक्षुष्यं शीतलं गुरु ॥७८॥

BHARATIYA VIDYA ... 28445

अथ औष्ट्रदुग्धनामगुणाः।

औष्ट्रं स्वादुरसं रूक्षं लवणं लघु दीपनम्।
क्रिमिकुष्ठकफानाहशोथोदरहरं सरम् ॥७८॥

अथ आश्वदुग्धनामगुणाः।

आश्वमुष्णं पयो रूक्ष बल्यं वातकफापहम्।
लवणाम्लं लघु स्वादु सर्वमेकशफं तथा ॥८०॥

अथ दुग्धसामान्यनामगुणाः।

धारोष्णं दीपनं बल्यं लघु शीतं त्रिदोषनुत् ॥८१॥
मुहूर्त्तत्रितयादूर्द्ध्वं पयो भवति विक्रियम्।
तदेव द्विगुणे काले विषवद्धन्ति मानवम् ॥८२॥
तस्मात् शीतगुणं तस्मात् पयस्तात्कालिकं पिबेत्।
सुधासमं तदेव स्यात् धाराशीत त्रिदोषकृत् ॥८३॥
धारोष्ण शस्यते गव्यं धाराशीतन्तु माहिषम्।
शृतोष्णमाविकं पथ्यं शृतशीतमजापयः ॥८४॥
शृतशीतं जयेत् पित्तं शृतोष्णं कफमारुतौ।
अतिपक्वं गुरु स्निग्धं हृद्य बलविवर्द्धनम् ॥८५॥
आममामप्रद चीरमभिष्यन्दिकरं गुरु ॥८६॥
आममेव स्त्रियाः चीरं पथ्य पक्वन्तु दोषकृत् ॥८७॥
प्राभातिकं पयः प्रायो विष्टम्भि गुरु बृंहणम् ॥८८॥
रात्रौ चन्द्रगुणाधिक्याद् व्यायामपरिवर्जनात् ॥८९॥
प्रदोषपयमतुद बल्यं चक्षुष्य वातपित्तहृत् ॥९०॥
दिवाकरकराघाताद् व्यायामानिलसेवनात् ॥९१॥
विवर्णमम्लदुर्गन्धि लवणं ग्रन्थित पयः ॥९२॥
वर्जयेदम्ललवणयोगात् कुष्ठादिदोषकृत् ॥९३॥
सन्तानिकं पर रूक्ष शृतदुग्धोपरि स्मृतम्।
सन्तानिका गुरुः शीता हृद्या पित्तास्रवातनुत् ॥९४॥

सप्तरात्रात्परं क्षीरमसमग्रन्तु मोरटम् ।
नष्टदुग्धं भवेत्तत्तु मोरटं भेज्जटोऽब्रवीत् ॥९५॥
क्षीरं तत्कालसूताया: पीयूषचनमुच्यते ॥९६॥
पक्वं दध्ना समं क्षीरं विज्ञेया दधिकूर्चिका॥९७॥
तक्रेण तक्रकूर्चिका तयो: पिण्ड: किलाटक: ।
पाकं विना स एव स्यात् क्षीरयुक्तसितान्वित: ॥९८॥
मोरटस्तु सपीयूष: कूर्चिका दधितक्रयो: ।
किलाटक्षीरशाकाभ्यामेते निद्रामपुष्टिदा: ॥९९॥
गुरव: श्लेष्मला हृष्या हृद्या वाताग्निनाशिनी ।
वातला दुर्जरा रूक्षा ग्राहिणी तक्रकूर्चिका ॥१००॥

अथ दधिनामगुणा: ।

दधि स्यान पय: सम्यक् स्यानमीषत् तु मन्दकम् ।
तत्स्निष्टमक्लमत्यम्लं मधुराम्लमिति स्मृतम् ॥१०१॥
दध्युष्णं दीपनं स्निग्धं कषायानुरसं गुरु ।
पाकेऽम्लं ग्राहि पित्तास्रशोफमेद:कफप्रदम् ॥१०२॥
मूत्रकृच्छ्रे प्रतिश्याये शीतके विषमज्वरे ।
अतीसारेऽरुचौ कार्श्ये शस्यते बलवर्द्धनम् ॥१०३॥
मन्दं त्रिदोषजननं मधुरं वातपित्तजित् ।
अम्लं पित्तास्रकफकृदत्यम्लं रक्तपित्तदम् ॥१०४॥
मधुराम्लं गुणैर्मिश्रैर्दधि पूर्ववदादिशेत् ॥१०५॥
गव्यं दध्युत्तमं बल्यं पाके स्वादु रुचिप्रदम् ।
पवित्रं दीपनं स्निग्धं पुष्टिकृत्पवनापहम् ॥१०६॥
आजं दध्युत्तमं ग्राहि लघु दोषात्रयापहम् ।
शस्यते श्वासकासार्श:क्षयकार्श्येषु दीपनम् ॥१०७॥
आविकं दधि पुन्नामकफवातप्रकोपणम् ।
अभिष्यन्दिरसपाके स्वादु प्रायेण दोषलम् ॥१०८॥

माहिषं दधि सुस्निग्धं श्लेष्मलं वातपित्तनुत्।
वृष्यं विपाके मधुरं गुरु रक्तप्रदूषणम् ॥१०८॥
नार्या दधि त्रिदोषघ्नं चक्षुष्यं तर्पणं गुरु।
बल्यं विपाके मधुरं स्निग्धं वह्निकरं परम् ॥११०॥
हस्तिन्या दधि वीर्य्योष्णं कटु पाकेऽग्निनाशनम्।
कषायानुरसं वर्चोवर्द्धनं कफवातजित् ॥१११॥
श्रोष्ट्रं विपाके कटुकं भेदि चाराम्लकं दधि।
निहन्त्यु,दरकुष्ठार्श,शूलवह्नानिलक्रिमीन् ॥११२॥
अश्वाद्येकशफं रूक्षं दध्यभिष्यन्दि दीपनम्।
दीपनं स्वादु चक्षुष्यं वातहृत्कफमूत्रनुत् ॥११३॥
सर्वेषु दधिषु श्रेष्ठं गव्यमेव गुणावहम्।
गालितं दधि सुस्निग्धं वातघ्नं श्लेष्मलं गुरु ॥११४॥
बलपुष्टिकरं रुच्यं मधुरं नातिपित्तकृत्।
शृतचीरभवं रुच्यं दधि स्निग्धं गुणोत्तमम् ॥११५॥
पित्तानिलापहं सर्वधात्वग्निबलवर्द्धनम्।
असारं दधि सग्राहि कषायं वातलं लघु।
विष्टम्भि दीपनं रुच्यं ग्रहणीरोगनाशनम् ॥११६॥
सशर्करं दधि श्रेष्ठं तृष्णापित्तास्रदाहनुत्।
सगुडं वातनुद् वृष्यं वृंहणं तर्पणं गुरु ॥११७॥
वसन्ते शरदि ग्रीष्मे दधि प्रायेण निन्दितम्।
हेमन्ते शिशिरे शस्तं वर्षासु च गुणावहम् ॥११८॥
शस्यते दधि नो रात्रौ शस्तं चाम्बु,घृतान्वितम् ॥११९॥
दध्यु,त्तरो दधिस्नेहो दध्यु,ग्र. कटुक. सर. ॥१२०॥
दध्न. सरो गुरुर्वृष्यो वातवह्निप्रणाशन·।
बस्ते विशोधनश्चाम्लः पित्तश्लेष्मविवर्द्धन. ॥१२१॥
मस्तु क्लमहरं बल्यं लघु भक्ताभिलाषकृत्।

स्रोतोविशोधन ह्लादि कफलवणानिलार्पहम् ।
अहृष्य शोषण शीत्र भिनत्ति मलसचयहम् ॥१२२॥

अथ तक्रवर्गनामगुणा ।

दण्डाहत कालसेय गोरसाञ्च विलोडितम् ।
सरस निर्जल घोल मथित रसवर्जितम् ॥१२३॥
समोदक श्वेतमय मुदश्विच्चर्द्धवारिकम् ।
पादोदक भवेत्तक्रमर्द्धाभोऽन्ये ऽवभाषिरे ॥१२४॥
तक्र ग्राहि कषायाम्ल मधुर दीपन लघु ।
वीर्य्योष्ण बलद रूक्ष प्रीणन वातनाशनम् ।
हन्ति शोथगरच्छर्दिप्रसेकविषमज्वरान् ॥१२५॥
पाण्डु मेदोग्रहण्यर्शोमूत्रग्रहभगन्दरान् ।
मेह गुल्ममतीसार शूलप्लीहकफक्रमीन् ।
श्वित्रकोष्ठगतव्याधिकुष्ठव्रणोदरापची ॥१२६॥
तक्र निदाघे शरदि दौर्बल्ये भ्रममूर्च्छयो ।
पित्तास्रमदशोषपु कदाचिन्न प्रशस्यते ॥१२७॥
शीतकाले ग्रहण्यर्शे कफवातामयेषु च ।
स्रोतोनिरोधे मन्दाग्नौ तक्रमेवामृतोपमम् ॥१२८॥
तक्रन्तु मधुर सर्व श्लेष्मल वातपित्तनुत् ॥१२९॥
अम्ल वातहर तक्र रक्तपित्तप्रकोपणम् ॥१३०॥
वातेऽम्ल सैन्धवोपेत स्वादु पित्ते सशर्करम् ॥१३१॥
पिबेत् तक्र कफे रूक्ष व्योषक्षारसमन्वितम् ।
समुद्धृतघृत तक्र पथ्य लघु विशेषत ॥१३२॥
स्तोकोद्धृतघृत तस्माद्‌दृष्य गुरु कफावहम् ।
अनुद्धृतघृत शीत गुरु पुष्टिकफप्रदम् ॥१३३॥
यान्यन्यानि दधीन्यष्टौ तद्‌गुण तक्रमादिशेत् ।
सरस निर्मल घोल मथित रसवर्जितम् ॥१३४॥

दधिवद्घोलमथितं किञ्चित् तु लघु नीरतः ।
मण्डतक्रा लघुतक्रा कूर्चिका दधिसम्भवा ॥१३५॥

अथ नवनीतवर्गनामगुणाः ।

हैयङ्गवीन सरजं नवनीतन्तु मन्थनम् ।
नवनीतं लघु ग्राहि सद्यस्कं स्वादु शीतलम् ॥१३६॥
मध्यमीषत्कषायाम्लं हृद्यं पित्तानिलापहम् ।
अविदाह्यग्निकृच्चैव ग्रहण्यर्शोव्रणकासजित् ॥१३७॥
नवनीतं चिरोद्धृतं गुरु मेद:कफप्रदम् ।
शोथघ्नं बलकृद् हृद्यं विशेषाद्दधतो शिशोः ॥१३८॥
क्षीरोत्थं तदतिस्निग्धं चक्षुष्यं रक्तपित्तजित् ।
हृद्यं बलकरं ग्राहि मधुरं शीतलं परम् ॥१३९॥

अथ घृतनामगुणाः ।

घृतमाज्यं हविः सर्पिराधारमसृताह्वयम् ॥१४०॥
घृतं रसायनं स्वादु चक्षुष्यं गुरु दीपनम् ।
शीतवीर्य्यं विषालक्ष्मीपापपित्तानिलापहम् ॥१४१॥
अल्पाभिष्यन्दि कान्त्योजस्तेजोलावण्यबुद्धिकृत् ।
उदावर्त्तज्वरोन्मादशूलानाहव्रणान् जयेत् ॥१४२॥
स्निग्धं कफप्रदं रूक्षं क्षयवीसर्परक्तजित् ।
सर्वं घ्नतहरं प्राय: शस्यते वान्तहृदयो ॥१४३॥
घृतं क्षीरभवं ग्राहि शीतलं नेत्ररोगजित् ।
निहन्ति पित्तदाहास्रमदमूर्च्छाभ्रमानिलान् ॥१४४॥
पुराणं कटुकं पाके सर्पिर्दोषत्रयापहम् ।
ओघनेत्रशिर शूलकुष्ठापस्मारशोथजित् ॥१४५॥
योनिरोगज्वरश्वासकुष्ठार्शोगुल्मपीनसान् ।
निहन्ति दीपनं वस्तिनस्यपूतिः प्रशस्यते ॥१४६॥
घृतमण्डोऽपि घृतवद् गुणैस्तीक्ष्णो लघुः सरः ॥१४७॥

द्दग्धवर्षात्परं सर्पिः कौम्भमित्यभिधीयते ।
रक्षोघ्नं लघु तस्मात् तु गुणैः श्रेष्ठं महाघृतम् ॥१४८॥
घृतस्य गुणदोषौ तु क्षीरतुल्यौ समादिशेत् ।
सर्वेषु गुणकृत् गव्यमाविकं निन्दितं पुनः ॥१४९॥

अथ तिलतैलनामगुणाः ।

तिलतैलं गुरु स्थैर्य्यं बलवर्णकरं सरम् ।
वृष्यं विकाशि विशदं मधुरं रसपाकयोः ॥१५०॥
सोष्णं कषायानुरसं तिक्तं श्लेष्मानिलापहम् ।
विपाके मधुरं तीक्ष्णं हृद्यं रक्तपित्तजित् ॥१५१॥
श्लेष्मलं कटु विण्मूत्रत्वक्गर्भाशयशोधनम् ।
दीपनं मतिदं केश्यं व्यवायि व्रणमेहनुत् ॥१५२॥
श्रोत्रयोनिशिरःशूलनेत्ररोगविनाशनम् ॥१५३॥
मथिताच्युतविच्छिन्नभग्नव्यालविषादिषु ।
क्षतेऽग्निदग्धे तत्पथ्यं पानाभ्यङ्गादिभिः सदा ॥१५४॥
घृतमब्दात्परं पक्वं हीनवीर्य्यं प्रजायते ॥१५५॥
तैलं पक्वमपक्वं वा चिरस्थायि गुणाधिकम् ॥१५६॥

अथ एरण्डतैलनामगुणाः ।

एरण्डतैलं मधुरमुष्णं दीपनशोधनम् ।
हृद्यं त्वच्यं वयःस्थापि मेधाकान्तिबलप्रदम् ।
कषायानुरसं सूक्ष्मं योनिशुक्रविशोधनम् ॥१५७॥
हन्ति वातोदरानाहगुल्माष्ठीलाकटिग्रहान् ।
वातशोणितशूलादिव्रणशोथामविद्रधीन् ॥१५८॥

अथ कटुतैलनामगुणाः ।

इष्वीकामूलजीमूतादन्तीकथशिग्रुजम् ।
निम्बातसीकरञ्जार्कहस्तिकर्णेन्द्रदोभयम् ॥१५९॥
शङ्खिनीनिम्बकं तैलं तैलं ज्योतिष्मतीकृतम् ।

कुसुम्भसर्षपोद्भूतं तैलं सौवर्चलन्तथा ॥१६०॥
विपाके कटुकं तीक्ष्णमुष्णं तिक्तं सरं लघु।
हन्ति कुष्ठामयं श्लेष्मप्रमेहमूर्च्छामयक्रमीन् ॥१६१॥

अथ निम्बतैलनामगुणाः।

निम्बतैलं जयेत् कुष्ठं व्रणश्लेष्मज्वरक्रमीन् ॥१६२॥

अथ अतसीतैलनामगुणाः।

अतसी तैलमाग्नेय स्निग्धोष्णं कफपित्तकृत्।
कटुपाकमचक्षुष्य बल्यं वातहरं गुरु ॥१६३॥

अथ सार्षपतैलनामगुणाः।

सार्षपं क्रमिनुत् तैलं कुष्ठकण्डूहरं लघु।
पित्तासदूषणं हन्ति मेहकर्णशिरोगदान् ॥१६४॥

अथ कुसुम्भतैलनामगुणाः।

कौसुम्भं कटुकं तैलमचक्षुष्यं बलप्रदम्।
केवलानिलनुत्तीक्ष्णं विदाह्युष्णं त्रिदोषकृत् ॥१६५॥

अथ ज्योतिष्मतीतैलनामगुणाः।

ज्योतिष्मतीभवं तैलं पित्तलं स्मृतिबुद्धिदम् ॥१६६॥

अथ नारिकेलतैलनामगुणाः।

अक्षोटिकाक्षिमुक्ताद्यनारिकेलभवं हरेत्।
तैलं पित्तानिलं केश्यं गुरु श्लेष्मकरं हिमम् ॥१६७॥

अथ शिंशपातैलनामगुणाः।

शिंशपागुरुगण्डीरसालामरदारुजम्।
तैलं कषायं कटुकं तिक्तं दुष्टव्रणापहम्।
वातरक्तविषश्लेष्मकण्डूकुष्ठानिलान् जयेत् ॥१६८॥

अथ भल्लातकतैलनामगुणाः।

भल्लातकं तीव्रकं वीर्य्योष्णं स्वादु तिक्तकम्।
कुष्ठोर्शोध्नक्षिदोषास्रमेदोमेहक्रमीन् हरेत् ॥१६९॥

अथ पालाश्रमाधूकपाटलतैलनामगुणाः ।

तैलं पालाश्रमाधूकपाटलाफलसम्भवम् ।
कषायं मधुरं दाहपित्तश्लेष्मगदान् हरेत् ॥१००॥

अथ त्रपुषादितैलनामगुणाः ।

कुष्माण्डत्रपुषैर्वारुतुम्बीकालिङ्गतिक्तकैः ।
कृतं प्रियालजीवन्तीश्लेष्मान्तकभवं तथा ॥१०१॥
तैलं गुरु स्वादुपाकं शीतं मूत्रप्रवर्त्तकम् ।
अदीपनमभिष्यन्दि कफदं वातपित्तजित् ॥१०२॥

अथ ऐङ्गुदितैलनामगुणाः ।

ऐङ्गुदिज हिम तैलं पित्तघ्नं श्लेष्मवातकृत् ॥१०३॥

अथ यवतिक्तोद्भवतैलनामगुणाः ।

यवतिक्तोद्भवं तैलमीषत् तिक्तं रसायनम् ।
दीपन लेखन मेध्य पथ्यं दोषत्रयापहम् ॥१०४॥

अथ आम्रतैलनामगुणाः ।

आम्रतैलमनातिक्तं मधुरं नातिपित्तकृत् ।
कफवातहरं रूक्षं सुगन्धि विशद परम् ॥१०५॥

अथ स्नेहवर्गनामगुणाः

स्थावरा वातशमनाः स्नेहाः प्रोक्तास्तु तैलवत् ।
शीघ्रमेतेषु तैलत्व बलवर्णकरं पुनः ॥१०६॥
मेदोमज्जावसा ज्ञेया ग्राम्यानूपौदकोद्भवाः ।
गुरवो मधुरायोष्णाः समीरणविनाशनाः ॥१०७॥
जाङ्गलैकशफादीनां मक्रव्यादां कषायकाः ।
लघवः शीतला ज्ञेया रक्तपित्तनिबर्हणाः ॥१०८॥
प्रतुदा विष्किरादीनां प्रातव्याः कफकृन्तनाः ॥१०९॥
घृतमेतत्सर्गावशेषमज्जानो वातनाशनाः ।
यथोत्तरं परिज्ञेया विपाके स्वादवः परम् ॥११०॥

अथ मद्यनामगुणाः ।

मद्यं हाला सुरा शुण्डा मदिरा वरुणात्मजा ।
सुरा गन्धोत्तमा कल्या देवसृष्टा च वारुणी ॥१८१॥
मद्यं पित्तकरं प्रायं सरं रोचनदीपनम् ।
विदाहि सृष्टविण्मूत्रं तीक्ष्णं वातकफापहम् ॥१८२॥
विधिनाक्षयुतं पीतं तस्मादमृतसन्निभम् ।
अन्यथा कुरुते रोगानतिपीतं विषोपमम् ॥१८३॥
द्राक्षोत्थमविदाहित्वाद्रक्तपित्तेषु शस्यते ।
बलपुष्टिकरं मद्यं रक्तार्शोहारि दीपनम् ॥१८४॥
माध्वी कल्पगुणा किञ्चित् खर्जूरमनिलप्रदम् ।
तदेव विशदं रुच्यं श्लेष्मघ्नं कर्षणं लघु ॥१८५॥
शालिषष्टिकपिष्टादिकृतं मद्यं सुरा मतम् ॥१८६॥
सुरा गुर्वी बलस्तन्यपुष्टिमेदः कफप्रदा ।
ग्राहिणी शोथगुल्मार्शोग्रहणीमूत्रकृच्छ्रनुत् ॥१८७॥
पुनर्नवाशालिपिष्टैर्विहिता वारुणी मता ॥१८८॥
सुरावत् वारुणी लघ्वी पीनसाध्मानशूलनुत् ॥१८९॥
प्रसन्ना स्यात् सुरामण्डस्तस्मात् कादम्बरी घना ॥१९०॥
जङ्गलस्तदधः प्रोक्तो जङ्गलान्मेदको घनः ।
पक्कसो जङ्गलः सारः सुराबीजन्तु किण्वकम् ॥१९१॥
प्रसन्नानाहगुल्मार्शश्छर्द्यरोचकवातजित् ।
दीपन्याध्मानहृत् कुक्षितोदशूलप्रणाशिनी ॥१९२॥
कादम्बरी गुरुर्हृष्या दीपनी वातकृत्सरा ॥१९३॥
जङ्गलः कफनुद् ग्राही शोफार्शोग्रहणीहरः ॥१९४॥
मेदकी मधुरो बल्यस्तम्भनः शीतलो गुरुः ।
पक्कसो हृतसारत्वात् विष्टम्भी वातवर्द्धनः ॥१९५॥
किण्वकं वातशमनमहृद्यं दुर्जरं गुरु ॥१९६॥

आक्षिकी सा सुरा या स्यादक्षवल्कशालितण्डुलैः ॥१९७॥
आक्षिकी पाण्डुशोफार्शः पित्तास्रकफकुष्ठनुत् ।
किञ्चिद्वातकरा रूक्षा दीपनी रेचनी लघुः ॥१९८॥
यवपिष्टकृतं मद्यं प्रोक्तं यवसुरा च सा ॥१९९॥
कापोतको हली ज्ञेया मैरेयो धान्यजासवः ॥२००॥
आसवस्य सुरायाश्च द्वयोरप्येकभाजनम् ।
साधनं तद्विजानीयात् मैरेयमुभयात्मकम् ॥२०१॥
क्वचित्तु धातकीपुष्पं गुडधान्याम्बुसाधितम् ॥२०२॥
गुर्वी यवसुरा रूक्षा स्याद्विष्टम्भि त्रिदोषकृत् ।
कापोली बृंहणी हृद्या दृष्टिमान्द्यमदा गुरुः ॥२०३॥
मैरेयं बृंहणं हृद्यं गुरु सन्तर्पणं सरम् ॥२०४॥
मद्यं सर्वरसं जातं मधूलकमुदीर्य्यते ॥२०५॥
मधूलकं गुरु स्वादु स्निग्धं शुक्रकफप्रदम् ॥२०६॥
शुक्रकरो दीपनः स्वादुः पाचनो रोचनो लघुः ।
स्त्रीविलासकरो वातशोषयक्ष्मविकारनुत् ॥२०७॥
मध्वासवो लघू रूक्षः कुष्ठमेहविषापहः ॥२०८॥
गौडोऽग्निवर्द्धनो वर्णबलकृत् तर्पणः कटुः ।
तिलको बृंहणः स्वादुः सृष्टविण्मूत्रमारुतः ॥२०९॥
इक्षोः पक्वरसैः पक्वः सीधुः पक्वरसः स्मृतः ।
आमैः स एव विहितो बुधैः शीतरसो मतः ॥२१०॥
सीधुः पक्वरसः श्रेष्ठः स्वराग्निबलवर्णकृत् ।
वातपित्तकरो सद्यः स्नेहनो रोचनो जयेत् ।
विबन्धमेदःशोफार्शःशोफोदरकफामयान् ॥२११॥
तस्मादल्पगुणः शीतरसः संलेखनः स्मृतः ॥२१२॥
जाम्बवं क्षौद्रमध्युतः अम्लरसं गुडोद्भवम् ॥२१३॥
जाम्बवो बद्धनिस्यन्दः कषायोऽनिलकोपनः ॥२१४॥

अरिष्टासव सीधूनां गुणान् कर्माणि चादिशेत् ।
बुद्धा यथा स्वसंस्कारमवेक्ष्य कुशली भिषक् ॥२१५॥
सान्द्रं विदाहि दुर्गन्धि विरसं क्रिमिसङ्कुलम् ।
अहृद्यं तरुणं रूक्षमुष्णं दुर्भोजने स्थितम् ॥२१६॥
अल्पौषधं पर्य्युषितमत्यर्थं पिच्छिलञ्च यत् ।
कफप्रकोपि तन्मद्यं दुर्जरञ्च विशेषतः ॥२१७॥
पित्तप्रकोपि बहुलं तीक्ष्णमुष्णं विदाहि च ।
अहृद्यं पेशलं पूतिक्रमिलं विरसं गुरु ॥२१८॥
तथा पर्य्युषितं चापि विन्द्यादनिलकोपनम् ।
सर्वदोषैरुपेतन्तु सर्वदोषप्रकोपनम् ॥२१९॥
चिरस्थितं जातरसं दीपनं कफवातजित् ।
रुच्यं प्रसन्नं सुरभि मेध्यं सेव्यं महाद्रवम् ॥२२०॥
तस्मादेकप्रकारस्य मद्यस्य रसवीर्य्यनात् ।
सशौच्यादौष्ण्यवातत्वा विकाशित्वात् त्वक्किनुत् ॥२२१॥
समेत्य हृदयं प्राप्य धमनीरूर्द्धमागताः ।
विक्षुभ्येन्द्रिय चेतांसि मदयत्याशु वीर्य्यतः ॥२२२॥
चिरेण श्लेष्मके पुंसि पातनो जायते मदः ।
अचिराद्वातिके हृष्टः पैत्तिके शीघ्रमेव च ॥२२३॥
नवं मद्यमभिष्यन्दि त्रिदोषजनकं सरम् ।
अहृद्यं बृंहणं दाहि दुर्गन्धं विशदं गुरु ॥२२४॥
जीर्णं तदेव रोचिष्णु क्रमिश्लेष्मानिलापहम् ।
हृद्यं सुगन्धि सुगुणं लघु स्रोतोविशोधनम् ॥२२५॥
सात्त्विके गीतहास्यादि राजसे साहसादिकम् ।
तामसे निन्द्यकर्माणि निद्रादि कुरुते तदा ॥२२६॥
शुक्तं कफघ्नं तीक्ष्णोष्णं लघु रोचनपाचनम् ।
पाण्डुक्रमिहरं रूक्षं भेदनं रक्तपित्तकृत् ॥२२७॥

गौडादिरसयुक्तानि मद्ययुक्तानि यानि च ।
यथापूर्वं गुरुतराण्यभिष्यन्दकराणि च ॥२२८॥

अथ काञ्जिकनामगुणाः ।

स्यात्काञ्जिकन्तु सौवीरमारनालं तु दोषकृत् ।
काञ्जिकं शिशिरस्पर्शं पाचनं रोचनं लघु ॥२२९॥
तुषोदकं यवैरामैः सतुषैः शकलीकृतैः ॥२३०॥
सौवीरन्तु कृतस्त्वामैः पक्वैर्वा निस्तुषैर्यवैः ॥२३१॥
सर्वैरमैरसाम्लं स्यात् सौवीरकमिति क्वचित् ॥२३२॥
तुषाम्बु दीपनं हृद्यं पाण्डुकृमिगदापहम् ॥२३३॥
सौवीरकं ग्रहण्यर्शोनाशनं भेदि दीपनम् ।
धान्याम्लं धान्ययोनित्वात् प्रीणनं लघु दीपनम् ।
स्पर्शाद्दाहहरं पानात्पाचनं श्लेष्मनाशनम् ॥२३४॥
गण्डूषान्मुखवैरस्यदौर्गन्ध्यकफकृन्तनम् ॥२३५॥

अथ मूत्रनामगुणाः ।

मूत्रं गोनागमहिषीहयाजाविखरोद्भवम् ।
नराणाञ्च भवेत्सर्वं पाचनं दीपनं लघु ॥२३६॥
लवणानुरसं तिक्तं रूक्षं स्रोतोविशोधनम् ।
पित्तलं कटुकं हृद्यं भेदि वातानुलोमतः ॥२३७॥
निहन्ति वातगुल्मार्शःशोफोदरकफक्रिमीन् ।
कुष्ठपाण्डुगदानाहविषशूलारुचीस्तथा ॥२३८॥
गोमूत्रं तेषु सर्वेषु मूत्रयोगे प्रशस्यते ॥२३९॥
हस्तिमूत्रं विषार्शोघ्नं कुष्ठगुल्मकृमीन् जयेत् ।
माहिषं शोफगुल्मार्शःपाण्डुमेहेषु योजयेत् ॥२४०॥

अथ अश्वमूत्रनामगुणाः ।

वाजं भेदि त्रिदोषघ्नं कफरक्तक्रिमीन् हरेत् ॥२४१॥

अथ आजमूत्रनामगुणाः ।

आजं गुल्मविषश्वासकामलापाण्डुदोषजित् ॥२४२॥

अथ आविकमूत्रनामगुणाः ।

आविकं शोफकुष्ठार्शोमेहवर्चोग्रहापहम् ॥२४३॥

अथ गर्दभमूत्रनामगुणाः ।

गार्दभं ग्रहणीमेहकुष्ठोन्मादक्रमीन् जयेत् ॥२४४॥

अथ उष्ट्रमूत्रनामगुणाः ।

औष्ट्रमुन्मादशोफार्शःक्रमिशूलोदरापहम् ॥२४५॥

अथ नरमूत्रनामगुणाः ।

नरमूत्रं गरं हन्ति सेवितं तद्रसायनम् ॥२४६॥

गोऽजाविमहिषीणाञ्च स्त्रीणां मूत्रं प्रशस्यते ।

खरोष्ट्रेभनराश्वानां पुंसां मूत्रं हितं मतम् ॥२४७

इति श्रीमदनपालविरचिते मदनविनोदनाम्नि निघण्टौ पानीयादिनामविशेषवर्गोऽष्टमः ।

—०—

इक्षुकादि वर्गः ।

मृद्भक्षितानीन वदेति वक्त्रे प्रसारिते वीक्ष्य ततो जगन्ति ।
सविस्मयं सादरमीक्ष्यमाणं यशोदया नन्दसुतं नमामि ॥१॥

अथ इक्षुभेदनामगुणाः ।

इक्षुर्महारसो वेणुर्निःसृतो गुडपत्रकः ।
तृणराजो मधुतृणो गण्डीरो मृतपुष्पकः ॥ २ ॥
कृष्णमूलो लोहितेक्षुः पौण्ड्रकः पौण्ड्रकोऽपरः ।
रसालः सुकुमारोऽपि कान्तारो भीरुको मतः ॥ ३ ॥
इक्षुः स्वादुर्गुरुः शीतो वृष्यः स्निग्धो बलप्रदः ।
जीवनो वातपित्तघ्नः कुर्यान्मूत्रकफक्रमीन् ॥४॥

स मूले मधुरोऽत्यर्थं मध्ये मधुर एव च।
अग्रग्रन्थिषु विज्ञेयो लवणो मूत्रलस्तथा ॥ ५ ॥
लोहितेक्षुगुरुः शीतो दाहपित्तास्रकृच्छ्रनुत् ॥ ६ ॥
पौण्ड्रकः शीतलः स्निग्धो बृंहणः कफकृत् सरः ॥ ७ ॥
कृष्णेक्षुस्तत्गुणो वंशः क्षारः किञ्चित् तु तत्समः ॥ ८ ॥
वंशवच्छतपौरोऽपि किञ्चिदुष्णः समीरजित् ॥ ९ ॥
कान्तारतापसौ तद्वत् काष्ठेक्षुर्वातलो हिमः।
कोशकी हि गुरुः शीतो रक्तपित्तक्षयापहः ॥१०॥
सूचीपत्रो नीलपौरो नेपालो दीर्घपत्रकः।
वातलः कफपित्तघ्नः सकषायोऽतिदाहकृत् ॥ ११ ॥

अथ इक्षुरसनामगुणाः।

दन्तनिष्पीडितस्तेषां रसः पित्तास्रनाशनः।
शर्करासमवीर्य्यः स्यादविदाही कफप्रदः।
गुरुर्विदाही विष्टम्भी यान्त्रिकस्तु प्रकीर्त्तितः ॥१२॥

अथ मत्स्याण्डीनामगुणाः।

सिता मत्स्याण्डिका पक्वो मत्स्याण्डी बलकस्तथा ॥१३॥
अन्या विषपलीद्रन्धा शिशुका क्षत्तिकामला ॥१४॥
खण्डमन्यत् खण्डसिता माधवी मधुशर्करा ॥१५॥
यवासशर्कराऽन्या सा यवासक्काथसम्भवा ॥१६॥
अन्या पुष्पसिता प्रोक्ता पुष्पमस्म् तशर्करा ॥१७॥
फाणित क्षुद्रगुडको गुडस्त्विक्षुरसोद्भवः ॥१८॥
मत्स्याण्डी ग्राहिणी वम्या गुरुः पित्तानिलापहा ॥१९॥

अथ सितोपलानामगुणाः

सितोपला सरा लघ्वी वातपित्तहरा हिमा ॥२०॥

अथ खण्डनामगुणाः।

खण्डस्तु मधुरं हृद्यं रुच्यं पुष्टिबलप्रदम् ॥ २१ ॥

अथ मधुशर्करानामगुणाः ।

माधवी शर्करा रूक्षा कफपित्तहरा गुरुः ॥२२॥

अथ यवासशर्करानामगुणाः ।

यवासशर्करा शीता वातला कफपित्तजित् ॥२३॥

अथ पुष्पसिताशर्करानामगुणाः ।

सिता पुष्पसिता हृद्या रक्तपित्तहरा लघुः ॥२४॥

अथ फाणितनामगुणाः ।

फाणितं गुर्वभिष्यन्दि बृंहणं मूत्रशोधनम् ॥२५॥

अथ मधूकनामगुणाः ।

मधूकं फाणितं वस्तिदूषणं वातपित्तलम् ॥२६॥

अथ गुडनामगुणाः ।

गुडः क्षारो गुरुः स्वादुर्वातपित्ताग्निकृत्सरः ।
बल्यः क्रिमिश्लेष्मकरो मूत्ररक्तविशोधनः ॥२७॥
जीर्णो हृद्यो लघुः पथ्यो नाभिष्यन्द्यग्निपुष्टिकृत् ॥२८॥
इक्षोर्विकारान् विमलान् यथा कुर्युर्गुणास्तथा ॥२९॥
तृष्णादाहमूर्च्छापित्तास्रक्षविषमदहरा हिमाः ।
गुरवो मधुरा बल्याः स्निग्धा वातहराः सराः ॥३०॥

अथ मधुनामगुणाः ।

मधु पुष्पासवं पुष्परसं माक्षिकमीरितम् ॥३१॥
माक्षिकं पौत्तिकं क्षौद्रं भ्रामरं मधुविस्तरात् ॥३२॥
माक्षिकं तैलसङ्काशं पौत्तिकं घृतसन्निभम् ।
क्षौद्रं कपिलवर्णं स्यात् भ्रामरं स्फटिकोपमम् ॥३३॥
मधु शीतं लघु स्वादु रूक्षं ग्राहि विलेखनम् ।
चक्षुष्यं दीपनं स्वर्यं व्रणशोधनरोपणम् ॥ ३४ ॥
वर्ण्यं मेधाकरं वृष्यं विशदं रोचनं जयेत् ।
कुष्ठार्शःकासपित्तास्रकफमेहक्लमक्रिमीन् ॥३५॥

मेदस्तृष्णावमिश्वासहिक्कातीसारविड्ग्रहान्।
दाहचतचयां स्तत्तु योगवाह्यल्पवातलम् ॥३६॥
माचिकं मधुषु श्रेष्ठं नेत्रामयहरं लघु ॥३७॥
पौत्तिकं मधु रूचोष्णं पित्तदाहास्रवातकृत् ॥३८॥
चौद्रं माचिकमप्येव विशेषान्मेहनाशनम् ॥३८॥
भ्रामरं रक्तपित्तघ्नं मूत्रजाड्यकरं गुरु ॥४०॥
नवीनं मध्वभिष्यन्दि स्निग्धं श्लेष्महरं सरम् ॥४१॥
पुराणं ग्राहि तद्रूचं मेदोघ्नमतिलेखनम् ॥४२॥
विषादिपुष्टपुष्पेभ्यः सविषा माचिकादयः।
मधु चिन्वन्ति तस्मात्तत् स्वभावात्सविषं स्मृतम् ॥४३॥
तस्मादग्न्यातपात्तप्तं तद्युक्तं हन्ति मानवम्।
उष्णे काले च देशे च द्रव्ये वाऽपि योजितम् ॥४४॥
निरूहे छर्दने तच्छ्रेस्तदुक्तं न निवार्यते ॥४५॥
तस्मात्पाकमनप्राप्य तयोस्तद्विनिवर्त्तते।
आमामये जने नापि तद् द्रवे न विरुध्यते ॥४६॥
मदनं मधुजं सिक्थं मधूच्छिष्टं मधूलितम् ॥४७॥
मदनं मृदु सुस्निग्धं भूतघ्नं व्रणरोपणम्।
भग्नसन्धानकृद्वातकुष्ठवीसर्परक्तजित् ॥४८॥

यो राज्ञां मुखतिलकः कटारमल्ल-
स्तेन श्रीमदनन्नृपेण निर्मितेऽत्र।
यन्थे श्रीमदनविनोदनाम्नि पूर्णो
वर्गोऽयं मधुरसभेरिक्षुकादिः ॥४८॥

इति मधुवर्गः।

—•—

धान्यादि वर्गः ।

अजन्मामृत्य बहुजन्ममृत्यु तमालभास विशदप्रकाशम् ।
मुक्तिप्रदो बन्धमुलूखलेन त्वं लोकतात शिशुमाश्रयामि ॥१

अथ शाल्यादिनामगुणा ।

शालयो रक्तशाल्याद्या व्रीहय षष्टिकादय ।
मुद्गादि वैदल शैल कङ्ग्वादि तृणधान्यकम् ॥२॥
क्षुद्रधान्य कुधान्यन्तु शूकधान्य यवादिकम् ।
रक्तशालिर्लोहित स्याद् गरुड शकुनाहृत ॥३॥
सुगन्धिको महाशालि कलमस्तु कलामक ।
रक्तशालिर्दीर्घशूक पुण्ड्रो महिषमस्तक ॥४॥
पूर्णचन्द्रो महाशालि पुण्डरीक प्रमादक ।
पुष्पाण्डक शीतभीरु काञ्चन शकुनाहृत ॥५॥
पाण्डुगौर शारिवाख्यो रोध्रपुष्प सुगन्धक ।
हायनी दीर्घलातश्च महादूषकदूषकौ ॥ ६ ॥
शालयो मधुरा स्निग्धा बल्या बद्धाल्पवर्चस ।
पित्तघ्नाल्पानिलकफा मूत्रला लघवो हिमा ॥७॥
रक्तशालिर्वरस्तेषा बल्यो वर्ण्य स्त्रिदोषजित् ।
चक्षुष्यो मूत्रल स्वर्य शुक्रलस्तृट्ज्वरापह ।
विषव्रणघ्न किञ्चित्तस्मादल्पगुणा पर ॥८॥
महाशालिर्वृष्यो बल्यो रक्तशालिगुणै सम ॥९॥
कार्मुक पीत आमोदो लघु र्हृष्यो मुकुन्दक ।
महाषष्टिककेदार पुष्पाङ्कुरयकादय ॥१०॥
षष्टिका मधुरा शीता लघवो बद्धवर्चस ।
वातपित्तप्रशमना शालीना सदृशा गुणै ॥११॥
षष्टिक प्रवरस्तेषां लघु स्निग्ध स्त्रिदोषजित् ।

पाके स्वादुर्म्रं दुग्राही स्थैर्य्यकारी बलप्रदः ॥१२॥
रक्तशालिगुणैस्तुल्यास्तस्मादल्पगुणाः परे ॥१३॥
कृष्णव्रीहिस्तुरितकः कुक्कुटाण्डकपाटलः।
शलायुध राजीवाचो नन्दी जतुमुखादयः ॥१४॥
व्रीहयो मधुराः शीताः षष्टिकानां गुणैः समाः ॥१५॥
कृष्णव्रीहिर्वरस्तेषां तस्मादल्पगुणाः परे ॥१६॥
शालयो दग्धमृज्जाता लघु रूक्षाः कफापहाः।
स्थलजाः स्वादवः पित्तकफघ्ना वातवह्निदाः ॥१७॥
केदारा वातपित्तघ्ना गुरवः कफशुक्रलाः ॥१८॥
रोप्यातिरोप्या लघवो मूललास्ते गुणोत्तराः ॥१९॥
छिन्नरूढ़ा हिमा रूक्षाः पित्तघ्ना लघुपाकिनः ॥२०॥
पुनर्विशोषितं सम्यग्धर्मे रूक्षं लघु स्मृतम् ॥२१॥
दीपनं पाचनं मेध्यं वातघ्नं श्रमहरं परम्।
व्रीहित्वं षष्टिकस्यापि भिन्नत्वं शीघ्रपाकतः ॥२२॥

अथ गोधूमनामगुणाः।

गोधूमः सुमनः क्षुद्रो मधूलो रूपशीतला ॥२३॥
नन्दीमुखोऽल्पगोधूमो लोकेशी पामिकोच्यते ॥२४॥
गोधूमो मधुरः शीतो वातपित्तहरो गुरुः।
कफशुक्रप्रदो बल्यः स्निग्धः सन्धानकृत् सरः।
जीवनो बृंहणो वर्ण्यः स्यन्दी रुच्यो स्थिरत्वकृत् ॥२५॥
मधूली शीतला स्निग्धा पित्तघ्नी मधुरा लघुः।
शुक्रला बृंहणी पथ्या तद्वन्नन्दीमुखी मता ॥२६॥
एतस्मात् स्थूलगोधूमात् क्षुद्रो हीनतरो गुणैः ॥२७॥

अथ यवनामगुणाः।

यवः शुचिस्तीक्ष्णशूको निःशूकोऽतियवोऽपरः ॥२८॥
यवः कषायो मधुरः शीतः पित्तकफास्रजित् ॥२९॥

व्रणेषु तिलवत्पथ्यो रूक्षो मेधाग्निवर्द्धनः।
लेखनो बद्धनिस्यन्दः स्वर्यो मेहहरापहः ॥३०॥
बहुवातमलः स्थैर्यवर्णकारी च पिच्छिलः।
भस्मादतियवः किञ्चिद् गुणैर्न्यूनतरः स्मृतः ॥३१॥

अथ शिम्बीनामगुणाः तद्भेदाश्च।

शिम्बी मुद्गयवौ माषः सतीनः सकलायकः।
मसूरचक्रमङ्गल्यौ मकुष्ठत्रिपुटादयः ॥३२॥
वैदला मधुरा रूक्षाः कषायाः कटुपाकिनः।
वातला कफपित्तघ्ना बद्धमूत्रमलाः हिमाः ॥३३॥
ऋते मुद्गमसूराभ्यामन्ये त्वाध्मानकारकाः।
शिम्बी विष्टम्भिनी मेहदृष्टिघ्ना वातपित्तला: ॥३४॥
विशदा गुरवो हृद्या रूक्षाः कटुविपाकिनः ॥३५॥
सितासितादिभेदेन बहुधास्ते प्रकीर्त्तिताः ॥३६॥

अथ मुद्गनामगुणाः तद्भेदाश्च।

मुद्गो बलाढ्यो मङ्गल्यो हरितः शारदोऽपरः।
पीतः प्रचेतो वलाको माधवः परिकीर्त्तितः ॥३७॥
वनमुद्गस्तुवरको राजमुद्गस्तु खण्डकः ॥३८॥
मुद्गो रूक्षो लघुर्ग्राही कफपित्तहरो हिमः।
स्वादुरल्पानिलो नेत्र्यो वर्णोऽप्येतद्गुणः स्मृतः ॥३८॥
हरितः प्रवरस्तेषां तच्छाकं तिक्तमुत्तमम् ॥४०॥

अथ माषनामगुणाः।

माषो जीर्णकरो धारो धवलो राजमाषकः ॥४१॥
माषो गुरुः स्वादुपाकः स्निग्धो वृष्योऽनिलापहः।
स्रंसनस्तर्पणो बल्यः शुक्रलो हृ हृणः परः ॥४२॥
भिन्नमूत्रमलःस्तन्यः मेदपित्तकफप्रदः।
गुदकीलार्दितश्वासपङ्क्तिशूलानि नाशयेत् ॥४३॥

अथ राजमाषनामगुणा ।

राजमाष स्वादुरूक्ष कषायस्तर्पणो लघु ।
ग्राही वातकफस्तन्यबहुवर्चोरुचिप्रद ॥४४॥

अथ मकुष्ठनामगुणा ।

मकुष्ठो वनमुद्ग स्यात् मकुष्ठकमुकुष्ठकौ ॥४५॥
मकुष्ठो वातलो ग्राही कफपित्तहरो लघु ।
वान्तिजिन्मधुर पाके क्रमिकृज्ज्वरनाशन ॥४६॥

अथ निष्पावनामगुणा ।

निष्पावोऽनिलपित्तास्रमूत्रस्तन्यकर सर ।
विदाह्युष्णो गुरु श्लेष्मशोफहृत् शुक्रनाशन ॥४७॥

अथ सतीननामगुणा ।

वर्त्तुलस्तु सतीन स्यात् हरेणु स्वल्पवर्त्तुल ॥४८॥
वर्त्तुल शीतलो ग्राही कफपित्तहरो लघु ।
विपाके मधुरो रूक्षो हरेणुस्तद्गुण स्मृत ॥४९॥

अथ कलायनामगुणा ।

कलाय खण्डिक प्रोक्तस्त्रिपुट क्षुद्रखण्डिक ॥५०॥
कलाय कफपित्तघ्नो ग्राही शीतोऽतिवातल ।
त्रिपुटोऽपि गुणैरेव तच्छाक कफपित्तजित् ॥५१॥

अथ चणकनामगुणा ।

चणको हरिमन्थ स्यात् वाजिमन्थश्च जीवन ॥५२॥
चणक शीतलो रूक्षो रक्तपित्तकफापह ।
लघु कषायो विष्टम्भी वातल कुष्ठनाशन ॥५३॥

अथ मसूरिनामगुणा ।

मसूरिकारिर्मसूरिर्मङ्गल्या पाण्डुरोपल ॥५४॥
मसूरिर्मधुर पाके सग्राही शीतलो लघु ।
कफपित्तास्रजिद् बल्य तच्छाक लघु तिक्तकम् ॥५५॥

अथ कुलत्थनामगुणाः ।

कुलत्थयक्ककथक्र: कुलाली वनजोऽपरः ॥५६॥
अपरा दृक्‌प्रसादा च चक्षुष्या च कुलत्थिका ॥५७॥
कुलाली लोचनहिता कुम्भकारी मलापहा ॥५८॥
कुलत्थ: कटुकः पाके कषायो रक्तपित्तकृत् ।
लघुर्विदाही वीर्य्योष्णः श्वासकासकफानिलान् ।
हन्ति हिक्काश्मरीशुक्रदाहानाहान् सपीनसान् ॥५९॥
स्वेदसंग्राहको गुल्ममेदःकृमिहरः परः ॥६०॥
वन्यो विशेषतः शोतो नेत्रामयविषापहः ॥६१॥

अथ तिलनामगुणाः ।

तिलपुष्पस्तैलफलस्तिलपिञ्जोऽपरः मितः ।
जातिलो वनजातः स्यादाढको तुवरी मता ॥६२॥
तिलः कषायो मधुरस्तिक्तकः कटुको रसे ।
विपाके कटुकः स्वादुः स्निग्धोष्णः कफपित्तलः ॥६३॥
बल्यः केश्यो हिमस्पर्शस्त्वच्यः स्तन्यो व्रणे हितः ॥६४॥
वन्योऽल्पमूत्रकृद्दातनाशनोऽग्निमतिप्रदः ॥६५॥
कृष्णः श्रेष्ठतमस्तेषु शुक्लो मध्यमः मितः ।
अन्ये हीनतराः प्रोक्तास्तज्ज्ञैः रक्तादयस्तिलाः ॥६६॥

अथ तुम्बरीनामगुणाः ।

तुम्बरो ग्राहिणो शोता लघुः कफविपासजित् ॥६७॥

अथ अतसी(तिसि)नामगुणाः ।

अतसी मसृणा नीलपुष्पी चेत् सा उमा क्षुमा ॥६८।
अतसी शुक्रदृष्टिघ्नी स्निग्धा वातास्रजिद् गुरुः ॥६९॥

अथ कुसुम्भनामगुणाः ।

कुसुम्भं पावकः पीतमलक्तं वस्त्ररञ्जनम् ॥७०॥
तद्बीजं वरटी गुर्वी स्यादहृष्या चानिलापहा ॥७१॥

कुसुम्भं वातलं कृच्छ्ररक्तपित्तकफापहम्।
वराण्यातसीवद्दिष्टा विशेषाद्दिमनाशिनी ॥७२॥

अथ सर्षपनामगुणाः।

सर्षपः कटुकः स्नेहो भूतघ्नो रचिताफलः।
तन्तुभोऽन्यः स उद्दिष्टः सिद्धार्थः श्वेतसर्षपः ॥७३॥
राजिका चासुरी राजी सुतीक्ष्णः कृष्णसर्षपः ॥७४॥
सर्षपः कफवातघ्न स्तीक्ष्णोष्णो रक्तपित्तकृत्।
किञ्चिद्रुक्षोऽग्निदः कुण्डूकुष्ठकोष्ठकृमीन् हरेत् ॥७५॥
राजिकास्तद्गुणा प्रायास्तीक्ष्णास्तीव्रा विशेषतः ॥७६॥

अथ शणनामगुणाः।

शणः मोक्ली मातुलानी अन्तुतन्तुर्महाशणः ॥७७॥
शणो हिमो गुरुर्ग्राही ततपुष्पं प्रदरास्रजित् ॥७८॥

अथ क्षुद्रधान्यनामगुणाः।

कङ्गुश्यामाकनीवारवरकोद्दालनर्त्तकाः।
वरट्टिका तोदपर्णी कोद्रवश्च मधुलिका ॥७९॥
नन्दीमुखो वेणु यवा प्रियङ्गुः कोरदूषकः।
गवेधुका नलो नालो मुकुन्दं वारिकादिकम् ॥८०॥
तृणधान्यं लघु स्वादु कटुपाकि विलेखनम्।
रुक्षोष्णं बद्धनिस्यन्दं वातपित्तप्रकोपणम् ॥८१॥
पीततण्डुलिका कङ्गुः प्रियङ्गुः कर्कटो मता ॥८२॥
सितकङ्गुस्तु मुसटी रक्तकङ्गुस्तु शोधिका ॥८३॥
चीनकः काककङ्गुः स्यात् श्यामाकः शणकङ्गुकः ॥८४॥
शाल्यादयः कङ्गुभेदाः कोद्रवः कुरसः स्मृतः ॥८५॥
कोद्रवः कोरदूषः स्याद्दालो वनकोद्रवः ॥८६॥
प्रियङ्गुः पित्तजिद्द्रुष्यो भग्नसन्धानकृद् गुरुः ॥८७॥
श्यामाकः शोषणः शीतो रुक्षः पित्तकफापहः ॥८८॥

कोद्रवः वातलो ग्राही विषपित्तकफान् जयेत् ॥८८॥

अथ नीवारनामगुणाः।

नीवार ऋाँडकानाडी मुनिव्रीहिर्मुनिप्रियः ॥९०॥

नीवारः शीतलो ग्राही पित्तघ्नः कफवातकृत् ॥९१॥

अथ यवनालनामगुणाः।

यवनालो देवधान्यं जूर्णाह्वो जूनलो नलः ॥९२॥

यवनालः स्वादु शीतो वातलः कफपित्तजित् ॥९३॥

अथ गवेधुकानामगुणाः।

गवेधुका कर्षणी स्यात् गोजिह्वा कर्षिणी मता ॥९४॥

गवेधुका कटुः स्वादो कार्श्यकृत् कफनाशिनी ॥९५॥

अत्रपरिभाषा।

अपर्य्याप्तं व्याधिहतमनार्त्तवमभूमिजम्।
नवं जन्त्वादिभिर्जुष्टं न धान्यं गुणवन्मतम् ॥९६॥
धान्यं नवमभिष्यन्दि गुरु स्वादु कफप्रदम् ॥९७॥
वर्षोषितं सर्वधान्यं गौरवं परिमुञ्चति ॥९८॥
न मुञ्चति तदा वीर्य्यं क्रमात् मुञ्चत्यतः परम्।
विदाहि गुरु विष्टम्भि विरूढं दृष्टिदूषणम् ॥९९॥
एतेषु यवगोधूमतिलमाषा नवा हिताः।
रूक्षाः पुराणा विरसा न तथा गुणकारिणः ॥१००॥

इति धान्यवर्गो दशमः।

—०—

अन्नादिवर्गः।

राधा हरिं चरणयोः पतितं कराभ्यां
कोपाज्जघान तमुदीक्ष्य पुनर्हसन्तम्।
तत्पादयोः समपतच्चकिताभियाता-

मुत्थापयन् जयति कैतवगोपवेष. ॥१॥

अथ आहारनामगुणाः।

आहारो भोजनं जग्धिर्निल्यशो जोवनं तथा ॥२॥
आहारो बलकृत् सद्यःप्रीणनो देहधारकः।
ओजस्तेजःस्वरोत्साहधृतिस्मृतिमतिप्रदः ॥३॥

अथ भक्तनामगुणाः।

भक्तमन्धस्तु भिस्साऽव्हङ्करं दीदिविरोदनः ॥४॥
भक्तं वह्निकरं पथ्यं तर्पणं मूत्रलं लघु ॥५॥
सुधौतं प्रस्तुतं चोष्णं विशदं गुणवन्मतम् ॥६॥
अधौतमसुतं शीतं गुरु रुच्यं कफप्रदम् ॥७॥
भृष्टतण्डुलजं रुच्यं सुगन्धि कफजिल्लघु ॥८॥
भक्तं मांसं फलं चीरं वेदलाम्लादिसाधितम्।
स्नेहशाकैर्गुरुतरं हृद्यं बल्यं कफप्रदम् ॥९॥
रसौदनो गुरुर्हृद्यो बल्यो वातज्वरापहः ॥१०॥
घोलभक्तं ग्रहण्यर्शःश्रमघ्नं पाचनं हिमम् ॥११॥
अत्युष्णानां बलहरं शीतमुष्णाच्च दुर्जरम्।
अतिक्लिन्नं ग्लानिकरं दुर्जरं तण्डुलान्वितम् ॥१२॥
सौमनस्यं बलं पुष्टिमुत्साहं हर्षणं सुखम् ॥१३॥
स्वादु सञ्जनयेदन्नं मांसस्वादु विपर्य्ययम् ॥१४॥

अथ यवागूरादिलक्षणम्।

यवागूः षड्गुणे तोये संसिद्धा विरलद्रवा ॥१५॥
चतुर्गुणे तु संसिद्धा विलेपी घनसिक्थिका ॥१६॥
पेया सिक्थान्विता तोये चतुर्दशगुणेऽकृता ॥१७॥
मण्डश्चतुर्दशगुणे सिद्धस्तोये त्वसिक्थकः ॥१८॥

अथ यवागूगुणाः।

यवागूर्ग्राहिणी हृद्या ज्वरघ्नी वस्तिशोधनी ॥१९॥

अथ विलेपीगुणाः।

विलेपी दीपनी बल्या हृद्या संग्राहिणी लघुः।
व्रणाचिरोगिणां पथ्या तर्पणी तृड्ज्वरापहा ॥२०॥

अथ पेयागुणाः।

पेया क्षुद्विगदक्लान्तिज्वरस्तम्भातिसारजित्।
रुच्याग्निकृल्लघुर्दीपमलस्वेदानुलोमनी ॥२१॥

अथ मण्डगुणाः।

मण्डो ग्राही लघुः शीतो दीपनो धातुसाम्यकृत्।
स्रोतोमार्दवकृत् पित्तज्वरघ्नः श्रमापहः ॥२२॥

अथ याव्यमण्ड लाजमण्डनामगुणाः।

याव्यमण्डो यवैर्भृष्टैर्लाजमण्डस्तु शालिभिः ॥२३॥
याव्यमण्डो लघुर्ग्राही शूलानाहत्रिदोषजित्।
नवज्वरेऽपि पथ्योऽयं पटोलमगधान्वितः ॥२४॥
लाजमण्डो लघुर्ग्राही सद्यः पाचनदीपनः ॥१५॥

अथ अष्टगुणमण्डनामगुणाः।

तण्डुलैरर्द्धमुद्गांशैः किञ्चिद्भृष्टैस्तु पाचितैः।
हिङ्गुसिन्धूत्थधनिकापत्रत्रिकटुसंस्कृतः ॥२६॥
ज्ञेयः सोऽष्टगुणो मण्डो ज्वरदोषत्रयापहः।
रक्तः क्षुद्बोधकः प्राणदीपनः शीतलो लघुः ॥२७॥

अथ मुद्गयूषनामगुणाः।

यूषः स्मृतो वैदलानामष्टादशगुणेऽम्भसि ॥२८॥
मुद्गानामुत्तमो यूषो दीपनः शीतलो लघुः।
व्रणोर्द्ध्वजत्रुरुग्दाहकफपित्तज्वरास्रजित् ॥२९॥

अथ दाडिमामलकयूषनामगुणाः।

दाडिमामलकैर्यूषः पित्तवातहरो लघुः ॥३०॥

अथ मुद्गामलकयूषनामगुणाः ।

मुद्गामलकैर्यूषस्तु भेदनः कफपित्तजित् ।
तृड्दाहशमनः शीतो मूर्च्छाश्रममदापहः ॥३१॥

अथ कुलत्थयूषनामगुणाः

कुलत्थयूषो गुल्मार्शःकफवाताश्मशर्कराः ।
तूणीप्रतूणीमेदांसि निहन्ति त्वग्निकृत् सरः ॥३२॥

अथ मूल्यमूलकयूषनामगुणाः ।

मूल्यमूलकतो यूषो गलग्रहकफज्वरान् ।
हन्ति श्वासप्रतिश्यायकासमेदोऽरुचिक्रमोन् ॥३३॥

अथ चणकयूषनामगुणाः ।

चणकैर्विहितो यूषोऽसुष्णस्तुवरको लघुः ।
रक्तपित्तप्रतिश्यायकासपित्तकफापहः ॥३४॥

अथ मकुष्ठयूषनामगुणाः ।

मकुष्ठयूषः संग्राही पित्तश्लेष्मज्वरापहः ।
लघुः सन्तर्पणः पथ्यो हृद्यः पीनसकासजित् ॥३५॥

अथ कृताकृतयूषनामगुणाः ।

यूषः कृताख्योऽलवणः स्नेहहृद्यादिसाधितः ॥३६॥
अकृतस्तैर्विना सिद्धः क्रमाद् गुरुलघू च तौ ॥३७॥

अथ यूषसामान्यनामगुणाः ।

यूषा गोरसधान्याम्लफलाम्लादिभिरन्विताः ।
यथोत्तर गुरुतरा यासद्या रुचिकारिणः ॥३८॥
येरन्ये रोगधैर्यैव कृता मण्डादयो बुधैः ।
विचार्य्य तद्गुणानेतांस्तद्गुणानेव निर्दिशेत् ॥३८॥

अथ सूप्यनामगुणाः ।

सूप्यस्तु सूप्यको सृष्टैः शिम्बीजैर्निस्तुषैः कृतः ॥४०॥

सूप्यं विष्टम्भि रूक्षं स्यात् निरस्तन्तु विशेषतः ।
निस्तुषं भृष्टसिद्धं तल्लाघवं सुतरां व्रजेत् ॥४१॥

अथ कृशरानामगुणाः ।

कचित्समाषे क्वाप्येव कृशरा तिलतण्डुले ।
कृशरा बलकृद् ग्राह्या सिद्धा तण्डुलवैदले ॥४२॥
कृशरा शुक्रला बल्या गुरुः पित्तकफप्रदा ।
दुर्जरा वह्निविष्टम्भमलहृद्वातनाशिनी ॥४३॥

अथ चिप्रानामगुणाः ।

चिप्राऽपि तद्गुणा सेपा सुधान्यगुणकारिणी ॥४४॥

अथ चौरेयीनामगुणाः ।

चौरेयी परमान्नं स्यात् पायसं चीरतण्डुले ॥४५॥
चौरेयी दुर्जरा बल्या धातुपुष्टिप्रदा गुरुः ।
विष्टम्भिनी हरेत् पित्तरक्ततृष्णाग्निमारुतान् ॥४६॥

अथ राजखाण्डवादिनामगुणाः ।

गुडादिपक्वं क्वथितमाममाम्रफलं पुनः ।
स्नेहैलानागरैर्युक्तं ज्ञातव्यो राजखाण्डवः ॥४७॥
सिताररुचकसिन्धूत्थैः सवृचाम्लपरूपकैः ।
निम्बूफलरसैर्युक्तो रागो राजिकया कृतः ॥४८॥
खाण्डवा मधुराम्लादिरससंयोगसम्भवाः ।
दीपना हृद्गणा रुच्यास्तीक्ष्णा हृद्या श्रमापहाः ॥४९॥

अथ खण्डाम्रखण्डामलकनामगुणाः ।

आम्रामलकलेह्याद्या हृद्या बुद्धिबलप्रदाः ।
तर्पणा रोचना स्निग्धा मधुरा गुरवस्तथा ॥५०॥

अथ रसालानामगुणाः ।

ससितं दधिमथ्याज्यमरिचैलादिसंस्कृतम् ।

मथितं कान्तमानिन्या कर्पूरपरिवासितम् ॥५१॥
रसाला शिखरा प्रोक्ता मार्जिका माञ्जिका बुधैः ॥५२॥
रसाला शुक्रला बल्या रोचनी वातपित्तजित्।
स्निग्धा गुरुः प्रतिश्यायं विशेषेण विनाशयेत् ॥५३॥

अथ पाननामगुणाः।

द्राक्षाम्लिकापरूषादिजलं खण्डादिमिश्रितम्।
मरिचार्द्रककर्पूरचातुर्जातादिसंस्कृतम्।
पानकं द्विविधं तस्मादम्लानम्लविभेदतः ॥५४॥
द्राक्षाखर्जूरकाश्मर्यमधूकपरूषकैः।
पञ्चसाराभिधे पाने चन्द्रसूर्याधिवासितम् ॥५५॥
पानकं मूत्रलं हृद्यं प्रीणनन्तु श्रमापहम्।
यथा द्रव्यगुणं तत् तु गुरु लघ्वादि निर्दिशेत् ॥५६॥
पञ्चसाराभिधं पित्तं तृष्णादाहश्रमापहम् ॥५७॥
मृद्वीकं श्रमदाहार्त्तपित्तक्लमक्षयापहम्।
रुच्याणां कोमलं हृद्यं पाचनञ्च बलप्रदम् ॥५८॥
अम्लिकाया रसस्तृष्णाक्लमदाहश्रमापहः ॥५९॥

अथ सट्टकनामगुणाः।

निःस्नेहं दधि निर्मथ्य पचेत् शर्करयान्वितम्।
मध्योपदाडिमाजाजिः सट्टकोऽयमुदाहृतः ॥६०॥
सट्टको रोचनः स्वर्यः पित्तानिलहरो गुरुः।
दीपनस्तर्पणो वृष्यः श्रमक्लमक्षयापहः ॥६१॥

अथ पोलिकादिनामगुणाः।

कुर्य्यात् समितयाऽतीव तन्वी पर्पटिका मता।
स्वेदयेत् तप्तके तान्तु पोलिका तां सगुन्दुवाः।
तां खादेत् सपूपिकायुक्तां तस्या मण्डकवत् गुणाः ॥६२॥

मण्डकः सुचितः सूक्ष्म. कर्पूरादिषु पाचितः ॥६३॥
स एव किञ्चिच्छूलस्तु बुधैः पूपालिका मता ॥६४॥
अङ्गारकर्कटो सैव विज्ञेयाङ्गारयाचितः ॥६५॥
• अत्युष्णो मण्डकः पथ्यः शोतः स गुरुरुच्यते ॥६६॥
अङ्गारमण्डको ग्राह्यो लघुर्दोषत्रयापहः ॥६७॥
पोलिका कफकृद् बल्या पित्तला वातनुद् गुरुः ॥६८॥
अङ्गारकर्कटी बल्या बृंहणो शुक्रला लघुः ।
दीपनो कफहृद्रोगपीनसश्वासवातजित् ॥६९॥

अथ शालिभक्ष्यनामगुणाः ।

शालिपिष्टकृता भक्ष्या नातिबल्या विदाहिनः ।
अहृद्या गुरवः श्लेष्मकफपित्तप्रकोपणाः ॥७०॥

अथ गोधूम-वैदलाभक्ष्यनामगुणाः ।

गोधूमविहिता भक्ष्या बल्याः पित्तानिलापहाः ॥७१॥
वैदला वातला भक्ष्या गुरवस्तुवरा हिमाः ॥७२॥

अथ माषभक्ष्यादिनामगुणाः ।

माषपिष्टकृता भक्ष्या बल्याः पित्तकफप्रदाः ॥७३॥
विचार्यैवंगुणान् भक्ष्यानन्यानपि विनिर्दिशेत् ॥७४॥

अथ गुडयुक्तभक्ष्यनामगुणाः ।

गौड़िका गुरवो भक्ष्या वातघ्ना कफशुक्रलाः ॥७५॥

अथ घृतपक्वभक्ष्यनामगुणाः ।

घृतपाचितभक्ष्यास्तु बल्याः पित्तकफापहाः ॥७६॥

अथ तैलपक्वभक्ष्यनामगुणाः ।

तैलजा दृक्समीरघ्नास्तूष्णपित्तासृदूषणाः ॥७७॥

अथ दुग्धभक्ष्यनामगुणाः ।

दुग्धलोडितगोधूमशालिपिष्टादिनिर्मिताः ॥७८॥
वातपित्तहरा भक्ष्या हृद्याः शुक्रबलप्रदाः ॥७९॥

अथ घृतपूरनामगुणाः।

क्षीरेण मर्दितं चूर्णं गोधूमानां सुगालितम्।
विस्तार्य सर्पिषा युक्तं ततः श्वेतविमिश्रितम्।
घृतपूरोऽयमुद्दिष्टः कर्पूरमरिचान्वितः ॥८०॥
समितो मर्दितः क्षीरनारिकेलसितादिभिः।
अवगाढ़े घृते पक्वो घृतपूरोऽपरः स्मृतः ॥८१॥
घृतपूरो गुरुर्वृष्यो हृद्यः पित्तानिलापहः।
सद्यःप्राणप्रदो बल्यः क्षतजिद् बृंहणः परः ॥८२॥

अथ संयावनामगुणाः।

समितां सर्पिषा भृष्टां श्वेतां मरिचमिश्रिताम्।
एलालवङ्गकर्पूरचूर्णादिपरिसंस्कृताम् ॥८३॥
चिप्रान्यसमितालम्बपुटेषु सुघृते पचेत्।
ततः खण्डे न्यसेत् पक्वं सयावोऽयमुदाहृतः ॥८४॥
समिता मधुदुग्धेन मर्दयित्वा सुशोभनम्।
पचेद् घृतोत्तरे खण्डे नासेत् पक्वं नवे घटे ॥८५॥
ततो मरिचचूर्णैलाखण्डचूर्णावचूर्णितम्।
कुर्य्यात् कर्पूरसंयुक्तं संयावममृतोपमम् ॥८६॥

अथ मधुशीर्षकनामगुणाः।

मर्दयित्वा तु समितामपूपास्तनवः कृताः।
पक्वा घृतेऽसिते पाके मण्डिता मधुशीर्षिका ॥८७॥
घृतेन मर्दितान्तोयैः समितां मृदु मर्दयेत् ॥८८॥
मातुलुङ्गत्वचा खण्डिपक्वेनार्द्रकपूरितम्।
विधाय पूपकं वृत्तं गन्धाढ्यं केशरान्वितम् ॥८९॥
पक्वः सर्पिषि खण्डे च मलितो मधुशीर्षकः ॥९०॥

अथ मृदुपूपकनामगुणाः।

समितां गुडतोयेन मेलयित्वा सुगालितम्।

घृते विस्तार्य्य विपचेत् सुवृत्तान् मृदुपूपकान् ॥८१॥

अथ दधिपूपकनामगुणाः।

शालिपिष्टं युतं दध्ना मर्दयित्वा घृते पचेत्।
वेष्टयेत् पक्वखण्डेन सुवृत्तान् दधिपूपकान् ॥८२॥

अथ विस्यन्दनामगुणाः।

संयावा मधुशीर्षाद्याः पूपका दधिसम्भवाः ॥८३॥
गुरवो बृंहणा हृद्या वृष्याः पित्तानिलापहाः ॥८४॥
एते संस्कारभेदेन विविधास्तेऽपि तद्गुणाः ॥८५॥
दधिक्षीरसमे पक्वा त्वर्द्धभागावशेषिते।
आपचेद्रक्तशालीनां तण्डुलान् तिलसंयुतान् ॥८६॥
प्रियालपनसादीनां वीजमुष्टिं समापचेत्।
क्षीरतुल्यं घृतञ्चैव शर्करा चैव तत्समा ॥८७॥
सिद्धस्त्रिकटुकोपेतः कर्पूरेणाधिवासितः।
एष विस्यन्दनो नाम देवलोकेऽपि दुर्लभः ॥८८॥
यस्मात् पक्वेऽपि हि घृतं स्यन्दते सर्वतोमुखम्।
तस्मात् सूपविधानज्ञैर्विस्यन्दो विधिवत् स्मृतः ॥८९॥
विस्यन्दो बृंहणो हृद्यः पित्तानिलहरो गुरुः ॥१००॥

अथ लप्सि(मोहनभोग)नामगुणाः।

समितां भर्जयेत् तप्ते घृते श्वेतां ततो न्यसेत्।
वारिमज्जादिसंयुक्तां पयसा योजयेत् तदा ॥१०१॥
एषैलादियुता तज्ज्ञैर्लप्सिका ललिता मता ॥१०२॥
लप्सिका बृंहणी हृद्या वातपित्तहरा गुरुः ॥१०३॥

अथ फेनीनामगुणाः।

फेनिका पुष्टिनी शुभ्रा वातपित्तहरा लघुः ॥१०४॥
लक्षणं फेनिकादीनां सूपशास्त्रात् विचारयेत् ॥१०५॥

अथ मोदकनामगुणाः।

मोदका लड्डुकाः प्रोक्तास्ते चानेकविधा मताः ॥१०६॥
तेषामन्नत्वप्राप्तानां न्यमेद्‌ गोधूमगालिताम्‌ ॥१०७॥
दधि क्षीरं सुष्टिजुष्टं समिता माषपिष्टकः।
शूरणार्द्रककुष्माण्डशालूकामिषमत्स्यकाः ॥१०८॥
इत्यादिभिर्बहुविधाः कल्पास्ते सूपशास्त्रतः।
द्रव्यं विचार्य्य मतिमान्‌ तद्गुणानपि निर्द्दिशेत्‌ ॥१०९॥
मोदका दुर्जरा हृद्या बल्याः पित्तानिलापहाः ॥११०॥

अथ माषवटकनामगुणाः।

माषमुद्गादिपिष्टोत्थाः कटुकाः वटिकादयः।
तत्कारणगुणान्‌ ज्ञात्वा तद्गुणानपि निर्द्दिशेत्‌ ॥१११॥
माषाणां वटको हृद्यो बल्यो वातहरो गुरुः।
विष्टम्भी घोलवटको विदाही पवनापहः ॥११२॥

अथ शाण्डकवटकनामगुणाः।

शाण्डको वटको दृष्टिनाशनो दोषलो गुरुः ॥११३॥

अथ तुषाम्बु-इण्डलीवटकनामगुणाः।

तुषाम्बुवटको रुच्यः पित्तलः कफवातजित्‌ ॥११४॥
इण्डली शुक्रला रुच्या विष्टम्भी कफवातकृत्‌ ॥११५॥

अथ सोमालिकानामगुणाः।

सोमालिका गुरुर्वृष्या रोचनी पित्तनाशिनी ॥११६॥

अथ कुण्डलिकानामगुणाः।

द्विप्रस्थां शुद्धसमितां प्रस्थ गोधूमगालितम्‌।
विमर्द्य पयसा स्थाप्यं व्रजेदावत्तदम्लताम्‌ ॥११७॥
सच्छिद्रे नारिकेलस्य प्राप्ते निक्षिप्य निर्म्मले।
परिभ्राम्य घृते तप्ते मन्दाग्नौ तु विपाचयेत्‌ ॥११८॥
कर्पूरवासिते पश्चाद्विज्ञेया नृपवल्लभा।

सुपक्वा कङ्कणाकारा सितालेहे विनिक्षिपेत् ॥११९॥
सा तु कुण्डलिका नाम्ना पुष्टिकान्तिबलप्रदा ।
धातुवृद्धिकरी वृष्या हृद्या चेन्द्रियतर्पणी ॥१२०॥
तस्यामत्त्वमासाद्य न्यसेद्गोधूमगालिताम् ॥१२१॥

अथ कुल्माषानामगुणाः ।

गोधूमाद्यास्तु कुल्माषा अर्द्धस्विन्ना मता क्वचित् ॥१२२॥
कुल्माषा गुरवो रूक्षा वातला भिन्नवर्चसः ॥१२३॥

अथ मन्थनामगुणाः ।

शक्तवस्तु घृताऽभ्यक्ताः शीतवारिविलोडिताः ।
नातिद्रवो नातिसान्द्रो मन्थः सद्भिः प्रकीर्त्तितः ॥१२४॥
मन्थो बलकरः सद्यः परिणामे बलावहः ।
मोहतृष्णात्ययच्छर्दिकुष्ठदाहश्रमान् जयेत् ॥१२५॥
द्राक्षा सितेक्षुखर्जूरैर्मिश्रः पित्तास्रदाहजित् ॥१२६॥
द्राक्षा मधुयुता बल्या कफश्रममदापहा ॥१२७॥
वर्गत्रयसमायुक्तो दोषवर्चोऽनुलोमतः ॥१२८॥

अथ शक्तुनामगुणाः ।

नवोननिस्तुषोद्भृष्टा यवचूर्णञ्च शक्तवः ॥१२९॥
शक्तवो यवजाः शीता दीपना लघवः सराः ।
कफपित्तहरा रूक्षा लेखना पानतस्तु ते ॥१३०॥
सद्यो बलप्रदा पथ्या घर्मादिक्लान्तदेहिनः ॥१३१॥
निस्तुषैश्चणकैर्भृष्टैः तुर्य्यांशैश्च यवैः क्रृताः ।
शक्तवः शर्करासर्पिर्युक्ता ग्रीष्मेऽतिपूजिताः ॥१३२॥
पिण्डी प्रोक्ता गुरुस्तं पा द्रवत्वाल्लेहिका लघुः ॥१३३॥
न भुक्त्वा न रदैः छित्त्वा न निशायां न वा बहून् ।
न जलान्तरितान्दोषान् शक्तूनद्यात् न केवलान् ॥१३४॥

अथ लाजादिनामगुणाः।

भृष्टाशाल्यादिजा लाजा धानाः भृष्टयवोद्भवाः ॥१३५॥
लाजा लघुतराः शीता बल्याः पित्तकफच्छिदः।
छर्द्यतीसारदाहास्रमेहमेदस्तृषापहाः ॥१३६॥
धानाः विष्टम्भिनी रूक्षा कफमेदोहरा गुरुः ॥१३७॥

अथ पृथुकानामगुणाः।

पक्कार्द्रा ब्रीहयः सम्यक् पीड़िताः पृथुका मताः ॥१३८॥
पृथुका गुरवो बल्याः श्लेष्मला वातनाशनाः ॥१३९॥

अथ होलकनामगुणाः।

शमीधान्यैरर्द्धपक्वैः सुभृष्टैर्होलको मतः ॥१४०॥
होलकोऽल्पानिलो मेदःकफदोषत्रयापहः ॥१४१॥

अथ लम्बीनामगुणाः।

अपक्वभृष्टैर्गोधूमैरुलम्बीलम्बलम्बिका ॥१४२॥
लम्बी कफप्रदा बल्या लघुः पित्तानिलापहा ॥१४३॥

अथ परिशुष्कादिमांसनामगुणाः।

हिङ्गुपक्वे घृते दत्वा मांसमालोड्य भर्जितम्।
मारवयोष्णाम्बु निक्षिप्य पचेत्सम्यक् विचक्षणः ॥१४४॥
मरिचार्द्रकसयुक्तं सुगन्धिद्रव्यवासितम्।
गतद्रवं सुघातुलं परिशुष्कं तदुच्यते ॥१४५॥
घनद्रवोपलिप्तं तत् प्रदिग्धमिति कीर्त्यते ॥१४६॥
प्रदिग्धं कफजित् बल्यं गुरु शुक्रविवर्द्धनम् ॥१४७॥
रसेन युक्तं सरसं शूल्यं शूलेन संस्कृतम् ॥१४८॥
परिशुष्कं स्थिरं स्निग्धं रोचनं तर्पणं गुरु।
बलमेधाग्निमांसौजः शुक्रवृद्धिकरं परम् ॥१४९॥
तदोषोल्लिप्तपिष्टत्वात् उल्लिप्तं परिकीर्त्तितं ॥१५०॥
उल्लिप्तं गुरु पथ्यं तत् परिशुष्कसमं गुणैः ॥१५१॥
सरसं तद्गुणं ज्ञेय विशेषाल्लघु दीपनम् ॥१५२॥

प्रोतं शूलेन पिपितं सौरभाद्यम्बुना सह।
लिप्तं विधूमैरङ्गारैः पाचितं शूल्यमुच्यते ॥१५३॥
शूल्यं सर्वोत्तमं मांसं लघु पथ्योत्तमं मतम् ॥१५४॥

अथ अङ्गारप्रतप्तमांसगुणाः।

अङ्गारादिषु यत्पक्वं प्रतप्तं तदुदाहृतम् ॥ १५५ ॥

अथ पिष्टमांसगुणाः।

मांसं दाडिमसिन्धूत्थं सौरभादिसमन्वितम्।
पिष्ट्वा पूपादिसङ्कल्पा पक्वं पिष्टमिति स्मृतम् ॥१५६॥

अथ घृतादिसाधितमांसगुणाः।

भर्जितं स्याद् घृतादौ तु भृष्ट्वा यत्साधितं पुनः ॥१५७॥

अथ तन्दुपक्वमांसगुणाः।

मांसं सौरभसंलिप्तं तन्दुपक्वं मधुप्रभम् ॥१५८॥

अथ तैलपक्वमांसगुणाः।

प्रदिग्धं सरस पक्वं भर्जितं मृदुपाचितम्।
प्रतप्तं परिशुष्कञ्च शूल्य यच्चान्यदोदृशम् ॥१५९॥
मांसं तैलेन सिद्धं तद् वीर्य्योष्णं गुरु पित्तलम् ॥१६०॥

अथ घृतपक्वमांसगुणाः।

घृतपक्वं तदेव स्यात् लघु रुच्यमपित्तलम्।
अत्युष्णं वीर्य्यबलदं हृद्यं दृष्टिप्रसादनम् ॥१६१॥

अथ तक्रादिपक्वमांसगुणाः।

गोरसक्षेद्यधान्याम्लफलाम्लकटुकादिभिः।
सिद्धं मांसं भवेद् बल्यं रोचनं दीपनं गुरु ॥ १६२ ॥

अथ सुखिन्नमांसगुणाः।

मांसमतिरसं रूक्षं सुखिन्नं वातलं गुरु ॥१६३॥

अथ वेसवारगुणाः।

गतास्थि मांसं सुखिन्नं पुनर्दृषदि पेषयेत्।

व्योषादि संस्कृतं कृत्वा पचेद् भूयो घृतान्वितम्।
वेसवारोऽयमुद्दिष्टो बल्यो वातहरो गुरुः ॥१६४॥
स्निग्धमुद्गादिकल्कोऽपि वेसवारोऽपरः स्मृतः ॥१६५॥
मुद्गादिवेसवारस्तु यथा द्रव्यगुणान् वदेत् ॥१६६॥

अथ सौरभनाम।

हरिद्राव्योषसिन्धूत्थहिङ्गुधान्यकदाडिमैः।
साजाजीभिर्वेसवारः सौरभोऽयमुदाहृतः ॥१६७॥

अथ मांसरस-सौरसनाम।

पिष्टमांससमुद्भूतः स्मृतो मांसरसो रसः ॥१६८॥
सौरभः सौरसः स्यात् तु यो रसो लवणान्वितः ॥१६९॥

अथ खानिष्कनाम।

सयुक्तो वेसवारेण रसः खानिष्कमुच्यते ॥१७०॥

अथ मांसरसनामगुणाः।

रसो हृद्यः श्रमश्वासवातपित्तक्षयापहः।
प्रीणनो व्रणयुक्तानां क्षीणानामल्परेतसाम् ॥१७१॥
विश्लिष्टभग्नसन्धीनां शुद्धानां शुद्धिकाङ्क्षिणाम्।
शस्यते स्वरहीनानां दृष्टायुः श्रवणार्थिनाम् ॥१७२॥

अथ दाडिमयुक्तमांसरसनामगुणाः।

सदाडिमादिर्बलदो दोषघ्नस्तु कृतस्तु सः ॥१७३॥

अथ सौरभादिगुणाः।

सौरभः प्रीणनः शीतो मुखशोषश्रमापहः।
दीपनः क्लमवातघ्नः सर्वधातुविवर्द्धनः ॥१७४॥
खानिष्कस्तु गुरुः पथ्यो दोषाग्नीनां विशेषतः।
अल्पमांसादिसंयुक्तो लवणाम्बुविपाचितः ॥१७५॥
दर्कावणिका ज्ञेया रसाद्या लघवो मताः ॥१७६॥
तक्रादिक्वाथसम्भूताः क्वथिका कथिता बुधैः ॥१७७॥

कथिका पाचनी हृद्या रुच्या वह्निप्रदा लघुः ।
कफानिलविबन्धघ्नी किञ्चित् पित्तप्रकोपनी ॥१७८॥

अथ क्वथितनामगुणाः ।

शाकं तक्रादिभिः सम्यक् साधितं क्वथितं मतम् ॥१७९॥
क्वथितं दीपनं रुच्यं वातश्लेष्मघ्नमापहम् ॥ १८० ॥
त्यक्त्वा स्वहेतुशाकस्य गुणानेतद्गुणं भवेत् ॥१८१॥

अथ पर्पटनामगुणाः ।

पर्पटा लघवो रुच्या लघीयान् क्षारपर्पटः ॥१८२॥

अथ पिण्याकनामगुणाः ।

पिण्याकस्तिलकिट्टः स्यात् पललं तिलपिष्टकम् ॥१८३॥
पिण्याको लेखनो रूक्ष विष्टम्भी दृष्टिदूषणः ॥१८४॥

अथ पललनामगुणाः ।

पललं बृंहणं स्निग्धं कफपित्तकरं गुरु ॥१८५॥

अत्र परिभाषा ।

द्रव्यकाल क्रियायोगदेहादीनि विचार्य तु ।
अन्येषामप्यनुक्तानामिषामपि गुणान् वदेत् ॥१८६॥

इति कृताझादिवर्गः शतान्नवर्गो वा
एकादश ।

मांसवर्गः ।

मुखेन्दुपद्मप्रतिबोधलुब्धं विधुन्तुदालिभ्रममादधानम् ।
लक्ष्मीकपोलप्रतिबिम्बिताङ्गं नीलाब्जनीलं कलयामि तेजः ॥१

अथ हस्तिनामगुणाः ।

हस्ती मतङ्गजो दन्ती मातङ्गोऽनेकपः करी ।
सिन्धुरः कुञ्जरः पद्मो वारणो द्विरदो द्विपः ।
इभो दन्तावलो नागः कुम्भी स्तम्बेरमो गजः ॥२॥

हस्तिनी धेनुका प्रोक्ता करेणुः करिणी च सा ॥३॥
हस्ती कफानिलौ हन्याद्रक्तपित्तप्रकोपनः ॥४॥

अथ घोटकनामगुणाः ।

घोटकः सैन्धवो वाजी तुरङ्गस्तुरगो हयः ।
तुरङ्गमोऽश्वो गन्धर्वो वाहः सप्तिर्यजुर्जवी ॥५॥
घोटिका वडवा वामी प्रसूताश्वा च वाजिनी ॥६॥
घोटकः कटुकः पाके दीपनः कफपित्तकृत् ।
वातहृद् बृंहणो बल्यश्चक्षुष्यो मधुरो लघुः ॥७॥

अथ अश्वतरनामगुणाः ।

तज्जोघोव्यामश्वतरी शीघ्रवेगोऽङ्गपूजितः ॥८॥
बल्यमाश्वतरं मांसं बृंहणं कफपित्तलम् ॥९॥

अथ उष्ट्रनामगुणाः ।

उष्ट्रः क्रमेलको वक्रग्रीवः शाखाशनो मयः ।
शृङ्खलः करभो दीर्घजङ्घो धूम्रो मरुप्रियः ॥१०॥
उष्ट्रमांसं लघु स्वादु चक्षुष्यमनिलापहम् ।
उष्ट्रमांसं प्रशमनं मेदःपित्तकफप्रदम् ॥११॥

अथ गर्दभनामगुणाः ।

गर्दभो रासभो भारवाही दूरगमः खरः ॥१२॥
गार्दभं पित्तलं बल्यं बृंहणं कफपित्तकृत् ।
कटु पाके लघु श्रेष्ठं तस्मात् वन्योखरोद्भवम् ॥१३॥

अथ महिषनामगुणाः ।

महिषः सैरिभः शृङ्गी वाहवैरी घनाघनः ।
कामरो गवलो दंशो लुलापः कालवाहनः ॥१४॥
माहिषं मधुरं मांसं स्निग्धोष्णं वातनाशनम् ।
निद्रारेतोबलस्तन्यतनुदार्ढ्यकरं गुरु ॥१५॥
तद्वदारण्यजं विन्द्याद्विशेषाच्छोषिणे हितम् ॥१६॥

अथ भल्लूक गण्डकनामगुणाः ।

ऋचोऽच्छभल्लो भल्लूक खड्गी खड्गश्च गण्डकः ॥१७॥

ऋच स्निग्धो गुरुर्बल्य' स्वादूष्ण पवनापहः ॥१८॥

गण्डको बद्धविण्मूत्र पवित्रोऽनिलनाशनः ॥१९॥

अथ सिंहशार्दूलयोर्नामगुणाः ।

सिंह पञ्चाननो दीप्तो मृगेन्द्र' केसरी हरिः ॥२०॥

शार्दूल स्यात् पञ्चनखो मृगनाथ सकृत्प्रजः ॥२१॥

सिंहशार्दूलयोर्मांसमुष्ण वाताद्दिरोगजित् ॥२२॥

अथ व्याघ्रनाम ।

व्याघ्रो मृगारिर्गद्दा व्यालो भीमपराक्रमः ॥२३॥

अथ चित्रकनाम ।

चित्रको वेगवाचित्रो द्वीपी स्याद्दीर्घदङ्क ॥२४॥

अथ वृक तरक्ष्वादिनामगुणाः ।

ईहामृगो वृक कोकस्तरचुस्तु मृगादनः ॥२५॥

व्याघ्रचित्रतरचूणां वृकाणां पललं गुरु ।

उष्ण वातहर स्वर्थ्य हितमर्चिविकारिणाम् ॥२६॥

अथ कुक्कुरनामगुणाः ।

कुक्कुर शुनक श्वा स्यात्कौलेय सुनख शुन ।

सारमेय कृतज्ञश्च भषको मृगदंशकः ॥२७॥

अथ शूकरनामगुणाः ।

शूकरो रोमश पोत्री कोलो घोणि किरि किटि ।

दंष्ट्री क्रोष्टुस्तूर्द्ध्वरोमा भूदारश्च वराहकः ॥२८॥

शौकरं पिशितं स्वादु बल्यं वातापहं गुरु ।

स्निग्धोष्णं शुक्रलं रुच्यं निद्रास्थूलत्वदार्ढ्यकृत् ॥२९॥

अथ छागनामगुणाः ।

छागी गलस्तनी मञ्जा सर्वभक्ष्या त्वजा स्तुभा ॥३०॥

सर्वारम्भछागलम्छागो वस्तोयः कालकः पशुः ॥३१॥
छागमांस लघु स्निग्धं स्वादुपाकं त्रिदोषजित्।
अदाहि वृंहणं नातिशीतं पीनसनाशनम् ॥३२॥
देहधातु समानत्वादनभिष्यन्दि वृंहणम् ॥३३॥

अथ मेष-मेदःपुच्छनामगुणाः।

मेषो मेडो हुडी मेढ्र उरभ्र उरणोऽविकः।
ऊर्णायुरेडको वृष्णिर्मेदःपुच्छस्तु दुम्बकः ॥३४॥
मेषमांसं गुरु स्निग्धं वल्यं पित्तकफप्रदम्।
मेदःपुच्छामिषं हृष्य कफपित्तकरं गुरु ॥३५॥

अथ हरिणनाम।

हरिणस्ताम्रवर्णः स्यात् कुरङ्गश्चारुलोचनः।
सारङ्गोऽजिनयोनिश्च वातायुश्चलनो मृगः ॥३६॥

अथ एणनामगुणाः।

एणः कृष्णोऽपरः साम्यकुरङ्गः कृष्णसारकः ॥३७॥
एणमांसं हिम रुच्यं ग्राहि दोषत्रयापहम्।
पद्मम बलदं पथ्यं लघु हृद्यं ज्वरास्रजित् ॥३८॥

अथ गोकर्णशम्बरनामगुणाः।

गोकर्णो विकटश्टङ्गो विन्द्यादन्यस्तु शम्बरः ॥३९॥
गोकर्णो शम्बरौ शीतौ गुरुस्निग्धौ कफप्रदौ।
रसे पाके च मधुरौ रक्तपित्तविनाशनौ ॥४०॥

अथ गवयनामगुणाः।

ऋष्यो नीलाङ्गको नीलो गवयश्चाकदर्शनः ॥४१॥
गवयो मधुरो बल्यः स्निग्धोष्णः कफपित्तलः ॥४२॥

अथ कस्तूरीमुष्किनीमृगनामगुणाः।

कस्तूरीहरिणी गन्धी मुष्किनो मृगमातृका ॥४३॥
कस्तूरीहरिणः स्वादुर्बद्धविट् दीपनो लघुः ॥४४॥

मुण्डिनो ज्वरकासास्रक्षयश्वासापहा हिमा ॥४५॥

अथ कृतमालादिनामगुणाः।

कृतमालो वर्णचरः पृषतो बिन्दुचित्रकः।
वातप्रमीर्वातमृगः किंकरः कृष्णपुच्छकः ॥४६॥
कृतमालादिजं मांसं मधुरं ग्राहि दीपनम्।
हृद्यं शीतं लघु श्वासज्वरदोषक्षयास्रजित् ॥४७॥

अथ रुरु-न्यङ्कुनामगुणाः।

रुरुः शरस्तुक्तमृगो न्यङ्कुर्बहुविषाणकः ॥४८॥
रुरोर्मांसं गुरु स्वादु हृद्यं पित्तानिलापहम् ॥४९॥
न्यङ्कुः स्वादुर्लघुर्बल्यो हृद्यो दोषत्रयापहः ॥५०॥

अथ शशनामगुणाः।

शशः शूली लोमकर्णो लम्बकर्णो विलेशयः ॥५१॥
शशः शीतो लघुः स्वादुर्ग्राही पथ्योऽग्निदीपनः।
सन्निपातज्वरश्वासरक्तपित्तकफापहः ॥५२॥

अथ महामृगनाम।

काश्मीरदेशे शरभोऽष्टपात् स्यात्
उत्साहयुक्तश्चतुरूर्ध्वपादः।
उष्ट्रप्रमाणः समहाविषाणः
ख्यातो वनस्थः स मृगो महाख्यः ॥५३॥

अथ शल्लक (सजारु)-मेधा नामगुणाः।

शल्लकः शलाका श्वावित् मेधास्यात्सूचिनी खरा ॥५४॥
शल्लकः श्वासकासास्रशोफदोषचयापहः ॥५५॥
मेधा तथैव विज्ञेया विशेषाद् बलवर्द्धिनी ॥५६॥

अथ बिडाल नकुलनामगुणाः।

बिडालकस्तु मार्जारो विषदंशक आखुभुक् ॥५७॥
नकुलः पिङ्गलो बभ्रुः सर्पारिः सर्पभक्षकः ॥५८॥

मार्जारो मधुरः स्निग्धो वीर्य्योष्णः कफवातजित् ॥५८॥
कशताश्वासकासघ्नो नकुलोऽपि समो गुणैः ॥६०॥

अथ वानरनामगुणाः ।

वानरो मर्कटः कीशो वनौकाश्च वलीमुखः ।
हरिः शाखामृगः प्लावी प्लवङ्गः प्लवगः कपिः ॥६१॥
वानरो पवनश्वासमेदःपाण्डुक्रमीन् जयेत् ॥६२॥

अथ शृगालनामगुणाः ।

शृगालो जम्बुकः फेरुर्गोमायुः फेरवः शिवः ।
शिवेशो वञ्चकः क्रोष्टुः शृकालः स्वल्पजम्बुकः ॥६३॥
शृगालो बलदो हृद्यः सर्ववातक्षयापहः ॥६४॥

अथ मूषकनामगुणाः ।

मूषकः खनकः स्तेयो हग उन्दुरुराखुकः ॥६५॥
मूषको बहविष्मूत्रो बल्यो हृद्योऽनिलापहः ॥६६॥

[इति चतुष्पदः ।]

अथ पक्षीनामगुणाः ।

पक्षी विहङ्गमः पत्री शकुन्तर्विहगः खगः ।
अण्डजो विः पतत्रः पतत्री शकुनिर्द्विजः ॥६७॥

अथ तित्तिरिनामगुणाः ।

तित्तिरिश्चित्रपक्षः स्यात् कृष्णो गौरः कपिञ्जलः ॥६८॥
तित्तिरिर्बलदो ग्राही हिक्कादोषक्षयापहः ।
श्वासकासहरः पथ्यस्तस्माद् गौरोऽधिको गुणैः ॥६९॥

अथ वर्त्तीकनामगुणाः ।

वर्त्तीको वर्त्तिकश्चैवस्ततोऽल्पवर्त्तका: मताः ॥७०॥
वर्त्तिकोऽग्निकरः शीतो ज्वरदोषक्षयापहः ॥७१॥

अथ लावनामगुणाः ।

लावश्चित्रश्चितनुः स चतुर्द्धा मतो बुधैः ।

पांशुलो गौरकोऽन्यस्तु पौण्ड्रको दर्भरस्तथा ॥७२॥
लावाः कषाया हिमाः स्निग्धा ग्राहिणो वह्निदीपनाः ॥७३॥
पांशुलः श्लेष्मलस्तेषां वीर्य्योष्णोऽनिलनाशनः ॥७४॥
गौरकः कफवातघ्नो रूक्षो वह्निप्रदः परम् ॥७५॥
पौण्ड्रकः पित्तकृत् किञ्चिल्लघुः श्लेष्माऽनिलापहः ॥७६॥
दर्भरो रक्तपित्तघ्नो हृदामयहरो हिमः ॥७७॥

अथ चटकनामगुणाः।

चटकः कलविङ्कः स्यादन्यो ग्राम्यस्तु पुण्ड्रकः ॥७८॥
चटकः शीतलः स्निग्धः स्वादुः शुक्रकफप्रदः।
सन्निपातहरो, वेश्मचटकः शुक्रलः परम् ॥७९॥

अथ वार्त्तिकनामगुणाः।

वार्त्तीको मधुरः शीतः रूक्षश्च कफपित्तनुत् ॥८०॥

अथ पारावतादिनामगुणाः।

पारावतः कलरवो मञ्जुघोषो मदोत्कटः ॥८१॥
कपोतो घुघुकृत् पाण्डुरन्यः काणकपोतकः ॥८२॥
पारावतो गुरुः स्निग्धो रक्तपित्तानिलापहः।
सग्राही शुक्रलः शीतः कपोतोऽपि समो गुणैः ॥८३॥
किञ्चिल्लघुः परं काणकपोतः सर्वदोषकृत् ॥८४॥

अथ मयूरनामगुणाः।

मयूरश्चन्द्रकी केको मेघरावो भुजङ्गभुक्।
शिखी शिखावलो वर्ही शिखण्डी नीलकण्ठकः।
शुक्लापाङ्गः कलापी च मेघनादानुलासकः ॥८५॥
मयूरो बृंहणः श्रोत्रशिरोरुग्वातशोषजित्।
उष्णो बलायुर्मेधाग्निकेशदृक्स्वरवर्णदः ॥८६॥
सेव्यं मयूरजं मांसं हेमन्ते शिशिरे मधौ।
न शरत्ग्रीष्मयोः पथ्यं वर्षास्वप्यहिभक्षणात् ॥८७॥

अथ कुक्कुटनामगुणाः ।

कुक्कुटो विष्किरः शौण्डी कालज्ञश्चरणायुधः ।
कृकवाकुस्ताम्रचूडः स्यादन्योऽरण्यकुक्कुटः ॥८८॥
कुक्कुटो बृंहणः स्निग्धो वीर्य्योष्णोऽनिलजिद्गुरु.।
चक्षुष्यः शुक्रकफकृद्वृष्यो रूचः कषायकः ॥८९॥
पानीयकुक्कुटः स्निग्धो बृंहणः श्लेष्मलो गुरुः ॥९०॥

अथ शुकनामगुणाः ।

शुको रक्तमुखः कीरो वाग्मी सुन्दरदर्शनः ॥९१॥
सारिका रसिका दूती सुमतिः प्रियवादिनी ॥९२॥
शुक शीतो लघुर्ग्राही चतकासक्षयापहः।
रुचस्तद्वन्मता सारी स्निग्धा बुद्धिबलाग्निकृत् ॥९३॥

अथ कोकिलनामगुणाः।

कोकिल' कलकण्ठ स्यात् परपुष्टो वनप्रिय ।
पिक. परभृताह्वारो ताम्राचो मधुदूतक' ॥९४॥
कोकिलो दीपनो ग्राही चक्षुष्यः चयकासजित् ॥९५॥

अथ काक-भासनामगुणाः।

काको ध्वाङ्क्षो गूढकामी बलिपुष्टः सकृत्प्रज.।
वायसी बलिभुक् काण' करटश्चतुरो द्विक. ॥९६॥
भास शिखावान् भासन्तो गृध्राकारो रज प्रज ॥९७॥
काकभासभव मास चक्षुष्य दीपन लघु ।
आयुष्य हृद्य बल्य' चतरोगचयापहम् ॥९८॥

अथ गृध्रनामगुणा.।

गृध्र सुदृष्टिः शकुनी वक्रदृष्टिश्च दूरदृक् ॥९९॥
गृध्रस्य काकवन्मांस विशेषाच्चक्षुरोगजित् ॥१००॥

अथ हंसनामगुणा ।

हंसः श्वेतगरुत् मानसौका रक्तपदश्च स ॥१०१॥

राजहंसः स्मृतः कृष्णैर्धार्त्तराष्ट्रोऽथ मालिकः ॥१०२॥
मलिनैः कलहंसस्तु पीतैः कादम्ब उच्यते ॥१०३॥
कारण्डवः प्लवो मद्गुर्वरटा हंसयोषितः ॥१०४॥
हंसः स्निग्धो गुरुर्हृद्यो वीर्य्योष्णः स्वरवर्णकृत् ।
वातास्रपित्तशमनो बृंहणो बलवर्द्धनः ॥१०५॥

अथ चक्रवाक-कङ्कनाम ।

सारसो लक्ष्मणो रक्तमूर्द्धा स्यात् पुष्कराह्वयः ।
चक्रवाकः पत्ररथश्चक्रो सुकामुकः ।
रथाङ्गनामा कोकोऽथ कङ्कः स्याल्लोहपृष्ठकः ॥१०६॥

अथ वकनाम ।

वको वकोटो धवलो वलाका विषकण्ठिका ॥१०७॥

अथ आडिनाम ।

आडिः शरालिराटिश्च विचित्रजलचारिणी ॥१०८॥

अथ चक्रादिमांसगुणाः ।

चक्रकङ्कवकोटादिमांसं स्निग्धं हिमं गुरु ।
मधुरं सृष्टविण्मूत्रं वातपित्तास्रनाशनम् ॥१०९॥

अथ करेटुनामगुणाः ।

करेटुकः कर्करेटुः करेटुः कर्कराटुकः ॥११०॥
करेटुः बृंहणो बल्यो वातपित्तहरो लघुः ॥१११॥

अथ खञ्जरीट-चाषनाम ।

खञ्जरीटः खञ्जनकश्चाषनामा किकीदिविः ॥११२॥

अथ चातकनाम ।

चातकस्तु घनतोलः सारङ्गस्तोकको भ्रमः ॥११३॥

अथ भारद्वाजादिगुणाः ।

भारद्वाजः कर्कराटो व्याघ्राटोऽङ्किकुटिः परः ।
खञ्जरीटो भरद्वाजश्चाषः श्लेष्मानिलापहः ॥११४॥

वातलोऽनिलपित्तघ्नो भारद्वाजः कफास्रजित् ॥११५॥

अथ श्येन-चिरिंगामगुणाः।

श्येनः शशादनः पत्नी चिरिंधिल्ली चिरिंल्लिका ॥११६॥
श्येनचिरिभवं मांसं शायी दीपकरं गुरु ॥११७॥

अथ उलूकनामगुणाः।

उलूकः कौशिकः काकवैरी घूको निशाचरः ॥११८॥
उलूकपललं भ्रान्तिकरं वातप्रकोपदम् ॥११९॥

अथ चकोरनामगुणाः।

चकोरश्चन्द्रिकापायी जीवञ्जीवः सुलोचनः ॥१२०॥
चकोरी बृंहणो बल्यः स्निग्धोष्णो वातनाशनः ॥१२१॥

अथ क्रौञ्चादिनामगुणाः।

क्रौञ्चकः पेचकोऽन्यस्तु पुच्छाधोभागलोहितः।
वकोटः कुररोऽप्यान्यः कोयष्टिष्टिट्टिभस्तथा ॥१२२॥
क्रौञ्चः पित्तानिलहरः पेचकः कफवातजित्।
कुररः क्रौञ्चवत् ज्ञेयः टिट्टिभोऽस्यमरुत्करः ॥१२३॥

अथ मत्स्यनामानि।

मत्स्यो झषस्तिमिर्मीनः शल्को वैसारिणोऽण्डजः।
पृथुरोमाऽभिसारः स्याद्विसारः शकुली तथा ॥१२४॥

अथ रोहितादिमत्स्यनामगुणाः।

रक्तोदरो रक्तमुखो रोहितो मत्स्यपुङ्गवः ॥१२५॥
सहस्रदंष्ट्रः पाठीनः कृष्णवर्णो महाशिराः ॥१२६॥
शफरः क्षुद्रमत्स्यः स्यात् प्रोष्ठी तु शफरी स्मृता ॥१२७॥
नलमीनश्चिलिचिमस्तिमिः ख्यातः समुद्रजः ॥१२८॥
मत्स्या बलप्रदा वृष्या गुरवः कफपित्तलाः।
उष्णाभिष्यन्दिनः स्निग्धा बृंहणाः पवनापहाः ॥१२९॥
नादेया बृंहणा मत्स्या गुरवोऽनिलनाशनाः ॥१३०॥

कौर्म्या हृद्याः कफाष्ठीलामूत्रकृच्छ्रविबन्धदाः ॥१३१॥
ताड़ागा गुरवो हृद्याः शीतला मलमूत्रदाः ॥१३२॥
ताड़ागारण्यिप्रजाता बलायुर्मतिवृद्धकराः ॥१३३॥
सरोजा मधुराः स्निग्धा बल्या वातनिवर्हणाः ॥१३४॥
सामुद्रा गुरवो नाति पित्तलाः पवनापहाः ॥१३५॥
तत्रापि लवणाम्भोजा ग्राहिणो दृष्टिनाशनाः ॥१३६॥
ह्रदोद्भवा बलकरा न तु स्वल्पजलोद्भवाः ॥१३७॥
हेमन्ते कूपजा मत्स्याः शिशिरे सारसा हिताः ॥१३८॥
मधुग्रीष्माम्बुकालेषु नदीचौण्ड्यतड़ागजाः ॥१३९॥
शरत्सु नैर्झराः सर्वे वर्षोत्थाः सर्वदोषदाः ॥१४०॥
रोहितः प्रवरस्तेषु नातिपित्तकरो लघुः ॥१४१॥
कषायानुरसो बल्यः पाठीनः श्लेष्मलो गुरुः ॥१४२॥

अथ क्षुद्रमत्स्य-मत्स्याण्डनामगुणाः।

क्षुद्रमत्स्याः स्वादुरसा दोषत्रयनिवर्हणाः ॥१४३॥
सूक्ष्माः परं पुंस्त्वहरा रुच्याः कासानिलापहाः।
त्रिदोषकृच्चिलोचिमर्मत्स्यो बल्यः परं मतं ॥१४४॥
मत्स्यगर्भो भृशं हृद्यः स्निग्धः स्थैर्यकरो गुरुः।
कफमेदःप्रदो बल्यो ग्लानिकृन्मेहनाशनः ॥१४५॥

अथ शिशुमार मकरनामगुणाः।

शिशुमारो दृतेस्तुल्यो मकरस्तिमिदंष्ट्रकः ॥१४६॥
शिशुमारो गुरुर्वृष्यः कफकृद्वातनाशनः।
बृंहणो बलदः स्निग्धस्तद्वन्मकरमादिशेत् ॥१४७॥

अथ कच्छपनामगुणाः।

कच्छपो गूढपात् कूर्मः कमठो दृढपृष्ठकः ॥१४८॥
कच्छपो बलदः स्निग्धो वातजित् पुंस्त्वकारकः ॥१४९॥

अथ मण्डूकनामगुणाः ।
मण्डूकः प्लवगो भेको वर्षाभूर्दर्दुरो हरिः ॥१५०॥
मण्डूकः श्लेष्मलो नातिपित्तलो बलकारकः ॥१५१॥
अथ कर्कटनामगुणाः ।
कर्कटः क्षुरचिह्नः स्यात् कुलीरः षोड़शाङ्घ्रिकः ॥१५२॥
कर्कटो बृंहणो हृद्यः शीतलोऽसृग्दरापहः ॥१५३॥
अथ सर्पनामानि ।
सर्पो भुजङ्गो भुजगः फणी भोगी भुजङ्गमः ।
कुण्डली कञ्चुकी चक्री पन्नगः पवनाशनः ॥१५४॥
गूढपादुरगो नागो जिह्मगश्च सरीसृपः ।
चक्षुःश्रवा दीर्घपृष्ठो व्यालश्चाशीविषस्तथा ॥१५५॥
दर्वीकरो विषधरो दन्दशूको विलेशयः ।
कुम्भीनसः पृदाकुः स्याद् दंष्ट्री काकोदरो विषी ॥१५६॥
अथ डुण्डुभादि नाम ।
डुण्डुभो राजिलः प्रोक्तोऽजगरो वाहसः शयुः ॥१५७॥
जलसर्पो गलार्दः स्यात् तिलित्सो गोनसः स्मृतः ॥१५८॥
सर्पमांसगुणाः ।
सर्पाणां स्वेदनं मांसं चक्षुष्यं बृंहणं गुरु ।
दूषीविषक्रिमिहरं मेधाग्निबलवर्द्धनम् ॥१५९॥
अथ गोधानामगुणाः ।
गोधा घोरपदा पञ्चनखरा तनिपस्तथा ॥१६०॥
कृष्णसर्पश्च गोधेयो गोधेरः स्युर्मनागुणाः ॥१६१॥
गोधाऽग्निजननी बल्या हृद्या पित्तानिलापहा ॥१६२॥
अथ सद्योहतमांसगुणाः ।
सद्योहतं भवेन्मांसं व्याधिघाति यथाऽमृतम् ।
वयस्यं बृंहणं बलमन्यथा परिवर्जयेत् ॥१६३॥

अथ च्युतगर्भा-सगर्भागुणाः ।

वृद्धानां दोषलं मांसं बालानां बलदं लघु ॥१६४॥

च्युतगर्भा गुरुर्योषित् सगर्भाच तथा मता ॥१६५॥

अथ स्वयं मृतमांसगुणाः ।

स्वयं मृतमबल्यं स्यादतिसारकरं गुरु ॥१६६॥

अथ विषादिहतमांसगुणाः ।

विषाम्बुरुङ्मृत स्वैतम् मृत्युदोषरुजाकरम् ॥१६७॥

अत्र परिभाषा ।

विहङ्गेषु पुमान् श्रेष्ठः स्त्री चतुष्पदजातिषु ॥१६८॥

परार्द्धो लघु पुंसां स्यात् स्त्रीणां पूर्व्वार्द्धमादिशेत् ॥१६९॥

तुल्यजाति स्वल्पदेहा महादेहेषु पूजिताः ।

अल्पदेहेषु शस्यन्ते तथैव स्थूलदेहिनः ॥१७०॥

चेष्टावतां परं मांसमलसेभ्यो लघु स्मृतम् ॥१७१॥

देहमध्यं गुरु प्रायं सर्व्वेषां प्राणिनां स्मृतम् ॥१७२॥

पक्षक्षेपादिहङ्गानां तदेव लघु कथ्यते ॥१७३॥

गुरूण्यण्डानि सर्व्वेषां गुर्वीग्रीवाच पक्षिणाम् ॥१७४॥

ये मृगाविहगास्तोयदूरावासप्रचारकाः ।

ते नाभिष्यन्दिनः सर्व्वे विपरीतान्यतोऽन्यथा ॥१७५॥

जलानूपभवाः सर्व्वे जलानूपचराश्च ये ।

गुरुभक्ष्या गुरुतर तेषां मांसमुदाहृतम् ॥१७६॥

धन्वोत्पत्तिप्रचाराणां लघु स्याल्लघुभोजिनाम् ॥१७७॥

उर स्कन्धोदर कुक्षौ पादौ पाणी कटी तथा ।

पृष्ठत्वक् यकृदन्त्राणि गुरूणीह यथोत्तरम् ॥१७८॥

इति मांसवर्गो द्वादश ।

अथ मिश्रवर्गः ।

गोपालबालैः सह मङ्गलविद्याविनोददक्षं धृतकाकपक्षम् ।
उपास्महे वाङ्मनसातिदूरं महः परं नीलमचिन्त्यनीयम् ॥१॥

अथ अनुपानादिगुणाः ।

वातेऽनुपानं स्निग्धोष्णं र्क्षोष्णं श्लेष्मणि स्मृतम् ।
पित्ते स्निग्धं हितं स्नेहपाने तोयमशीतलम् ॥२॥
भल्लातकस्नेहमूर्च्छाव्यापन्नानां शीतलं जलम् ।
शालिमुद्गादिभक्ष्याणां यूषो मांसरसस्तथा ॥३॥
माषादिभोजिनामस्तु धान्याम्लं दधि वा स्मृतम् ।
मद्यं शोषिविषार्त्तानामल्पाग्नीनाञ्च शस्यते ॥४॥
क्लान्तानामुपवासाध्वभारस्त्रीसुरतादिभिः ।
पयो सुधासमं प्रोक्तं क्षीणानां रक्तपित्तिनाम् ॥५॥
मसात्मत्र दीपलं शीतमतिमात्रमथो गुरुः ।
उष्णानुपानतो भुक्तं सुखमन्नं प्रजीर्य्यति ॥६॥
तदादौ कर्षयेत् पीतं स्थापयेन्मध्यसेवितम् ।
पश्चात् पीतं बृंहयति तस्मादीक्ष्य प्रयोजयेत् ॥७॥
न पिबेच्छ्वासकासार्त्तोजन्तु,रोगघनातुरः ।
पीत्वातिभाष्याध्ययनं निद्रां न त्वरया भजेत् ॥८॥

अथ ऊषापानम् ।

सश्लेष्मानिलपित्तेषु चैकद्वित्रिपलोन्मितम् ।
वारि शस्यमूष काले दृष्टिकारि रसायनम् ॥९॥
वलीपलितवैस्वर्य्यपीनसश्वासशोफजित् ।
पानीयमम्बुतोरष्टौ यः पिबेदरुणोदये ॥१०॥

धान्येषु मांसे सकलेषु चैवं शाकेषु चानुक्रमिह प्रमादात् ।
भासादितो भूतगुणैश्च हीत्वा तदादियेद् द्रव्यमनल्पबुद्धिः ॥११

अथ स्नानवर्त्तोहितानि।

षष्टिका यवगोधूमा लोहिता याश्च शालयः।
मुद्गाढ़की मसूराश्च धान्येषु प्रवराः स्मृताः ॥१२॥
यः सदामलकैः स्नानं करोति स विनिश्चितम्।
वलीपलितनिर्मुक्तो जीवेद्वर्षशतं सुखी ॥१३॥
भुक्तोपविशतस्तुन्दि बलमुत्तानशायिनः।
आयुर्वामकटिस्थस्य मृत्युर्धावति धावतः ॥१४॥
रात्रौ जागरणं रूक्षं स्निग्धं प्रस्वपनं दिवा।
न तेषां स्वपतां दोषा जाग्रतां चोपजायते ॥१५॥
भोजनानन्तरं निद्रा वातघ्नी कफपुष्टिकृत् ॥१६॥
कफमेदोविषार्त्तानां रात्रौ जागरणं हितम्।
दिवास्वप्नश्च तृट्शूलहिक्काजीर्णातिसारिणः ॥१७॥

अथ दन्तधावनगुणाः।

दन्तधावनमुद्दिष्टमास्यवैशद्यकारणम्।
प्रसेकारुचिदौर्गन्ध्यमलपित्तकफापहम् ॥१८॥
मदातुरः क्षयः श्रान्तो दन्ततालोष्ठरोगवान्।
हिक्काच्छर्दिशिरःपीड़ामूर्च्छाशोषी न तच्चरेत् ॥१९॥

अथ मुखप्रक्षालनगुणाः।

मुखप्रक्षालनं शीतपयसा रक्तपित्तजित्।
मुखस्य पिडकाशोषनीलिकाव्यङ्गनाशनम् ॥२०॥

अथ पादप्रक्षालनगुणाः।

पादप्रक्षालनं दृष्टिकरं हृद्यं श्रमापहम् ॥२१॥
निद्रासुखकरः सुसिग्धमनेत्ररुगापहः ॥२२॥

अथ गण्डूषगुणाः।

स्नेहगण्डूषकरणं मुखशोषद्विजामयान्।
स्वरघातोष्ठपारुष्यरक्तवातान् विनाशयेत् ॥२३॥

सुखोष्णोदकगण्डूषः कफारुचिमलापहः ॥२४॥
विषमूर्च्छामदार्त्तानां शोषिणां रक्तपित्तिनाम्।
कुपिताक्षिमल-क्षीण-रूक्षाणां न प्रशस्यते ॥२५॥

अथ अञ्जनगुणाः।

अञ्जनं नेत्रनैर्मल्यं दृष्टिकारि रुजापहम् ॥२६॥
रात्रौ जागरितः श्रान्तश्छर्दितो भुक्तवां स्तथा।
ज्वरातुरः शिर स्नातः कदाचिन्न तदाचरेत् ॥२७॥

अथ व्यायामगुणाः।

व्यायामः कर्मसामर्थ्यं स्थैर्यं दोषक्षयाग्निकृत्।
स सदा गुणमाधत्ते बलिनां स्निग्धभोजिनाम् ॥२८॥
व्यायामदृढचित्तानां व्याधिर्नास्ति कदाचन ॥२९॥
विरुद्धं वा विदग्धं वा भुक्तं शीघ्रञ्च पच्यते।
भवन्ति शीघ्रं नैतस्य वलीशिथिलताजराः ॥३०॥
वसन्ते शीतसमये सुतरां स मतो हितः।
अन्यदापि स कर्त्तव्य शक्त्यर्द्धेन यथाबलम्।
तदा समीक्ष्य स्वस्वेदो कण्ठे शीवालललाटयोः॥३१॥
भुक्तवान् क्षतसम्भोग' कासी श्वासी क्षयी श्रम'।
रक्तपित्ती चती शोषी न तं कुर्य्यात् कदाचन।
अतिव्यायामत' कासी ज्वरश्छर्दिश्च जायते ॥३२॥

अथ मर्दन कर्त्तनगुणाः।

मर्दनं श्रमवातघ्नं निद्रापुष्टिबलप्रदम् ॥३३॥
केशश्मश्रुनखानाञ्च कर्त्तनं शुचिरूपकृत् ॥३४॥

अथ अभ्यङ्गगुणा'।

अभ्यङ्गो वातरोगघ्नो धातुसाम्यं बलं सुखम्।
निद्रावर्णमृदुत्वायुष्कुरुते देहपुष्टिकृत् ॥३५॥
शिरोऽभ्यङ्गः शिरस्तृप्तिकेशदार्ढ्याधिपुष्टिकृत्।

केशप्रसाधनः केश्यः रजोजन्तुमलापहः।
पादाभ्यङ्गः सदा हृद्यो बलोत्साहविवर्द्धनः ॥३६॥
उच्चैः श्रवणबाधिर्यं न च मन्याहनुग्रहान्।
कदापि कर्णरोगाणां कुरुते कर्णपूरणम् ॥३७॥
सिक्तस्याद्रिर्यथा मूले तरूणां पल्लवादय।
वर्द्धन्ते हि तथा नृणां स्नेहसिक्तस्य धातव ॥३८॥
स्नेहावगाहनं वातशमनं धातुपुष्टिदम्।
मात्राभिस्त्रिचतुःपञ्चषड्सप्ताष्टभिराचरेत्।
रसरक्तमांसमेदोमज्जाधातून् यथाक्रमम् ॥३९॥
वान्तो नवज्वरोऽजीर्णी विरिक्तः केवलामकक्।
निरूहतर्पणं यत्र स्नेहाभ्यङ्गादि वर्जयेत् ॥४०॥

अथ उद्वर्त्तनगुणाः।

उद्वर्त्तनं वातहरं भ्राजकानलदीपनम्।
गात्रस्थिरत्वसुखितात्वक्प्रसादमृदुत्वकृत् ॥४१॥

अथ स्नानगुणा।

स्नान वातशमस्वेदपामाकण्डूमलापहम्।
हृद्यं कान्तिकरं वह्निसर्वेन्द्रियविबोधनम् ॥४२॥
न तदुष्णं न शिरसो योग्यं नेत्राहितं यतः।
कफवातप्रकोपे तु भेषजार्थे तदाचरेत् ॥४३॥
तथातिसारज्वरितकर्णशूलाऽनिलार्त्तिषु।
आध्मानारोचकाजीर्णभुक्तवत्सु च गर्हितम् ॥४४॥

अथानुलेपादिधारणगुणाः।

अनुलेपश्रमामूर्च्छादौर्गन्ध्यश्रमवातजित्।
सौभाग्यतेजस्त्वग्वर्णप्रीत्योजोबलवर्द्धन. ॥४५॥
कौशेयाम्बररत्नाना धारण कान्तिकारकम्।
पापरक्षोग्रहहरं कामदं श्रीविवर्द्धनम् ॥४६॥

सुखोष्णोदकगण्डूषः कफारुचिमलापहः ॥२४॥
विषमूर्च्छामदार्त्तानां शोषिणां रक्तपित्तिनाम् ।
कुपिताक्षिमलक्षीणरूक्षाणां न प्रशस्यते ॥२५॥

अथ अञ्जनगुणाः ।

अञ्जनं नेत्रनैर्मल्यदृष्टिकारि रुजापहम् ॥२६॥
रात्रौ जागरितः श्रान्तश्छर्दितो भुक्तवांस्तथा ।
ज्वरातुरः शिरःस्नातः कदाचिन्न तदाचरेत् ॥२७॥

अथ व्यायामगुणाः ।

व्यायामः कर्मसामर्थ्यं स्थैर्यं दोषक्षयाग्निकृत् ।
स सदा गुणमाधत्ते बलिनां स्निग्धभोजिनाम् ॥२८॥
व्यायामदृढचित्तानां व्याधिर्नास्ति कदाचन ॥२९॥
विरुद्धं वा विदग्धं वा भुक्तं शीघ्रञ्च पच्यते ।
भवन्ति शीघ्रं नैतस्य वलीशिथिलताजराः ॥३०॥
वसन्ते शीतसमये सुतरां स मतो हितः ।
अन्यदापि स कर्त्तव्यः शक्त्यर्द्धेन यथाबलम् ।
तदा समीक्ष्य स्वेदो कण्ठे ग्रीवाललाटयोः ॥३१॥
भुक्तवान् कृतसम्भोगः कासी श्वासी क्षयी कृशः ।
रक्तपित्ती क्षती शोषी न तं कुर्यात् कदाचन ।
अतिव्यायामतः कासो ज्वरश्छर्दिश्च जायते ॥३२॥

अथ मर्दनकर्त्तनगुणाः ।

मर्दनं श्रमवातघ्नं निद्रापुष्टिबलप्रदम् ॥३३॥
केशश्मश्रुनखादीनां कर्त्तनं शुचिरूपकृत् ॥३४॥

अथ अभ्यङ्गगुणाः ।

अभ्यङ्गो वातरोगघ्नो धातुसाम्यं बलं सुखम् ।
निद्रावर्णमृदुत्वायुष्कुरुते देहपुष्टिकृत् ॥३५॥
शिरोऽभ्यङ्गः शिरस्तृप्तिकेशदार्ढ्यादिपुष्टिकृत् ।

केशप्रसाधनः केश्यः रजोजन्तुमलापहा।
पादाभ्यङ्गः सदा हृद्यो बलोत्साहविवर्द्धनः ॥३६॥
उच्चैः श्रवणबाधिर्य्यं न च मन्याहनुग्रहान्।
कदापि कर्णरोगाणां कुरुते कर्णपूरणम् ॥३७॥
सिक्तस्याङ्घ्रिर्यथा मूले तरूणां पल्लवादयः।
वर्द्धन्ते हि तथा नृणां स्नेहसिक्तस्य धातवः ॥३८॥
स्नेहावगाहनं वातशमनं धातुपुष्टिदम्।
मात्राभिस्त्रिचतुःपञ्चषड्सप्ताष्टभिराव्रजेत्।
रसरक्तमांसमेदोमज्जाधातून् यथाक्रमम् ॥३९॥
वान्तो नवज्वरोऽजीर्णी विरिक्तः केवलामरुक्।
निरूहतर्पणं यश्च स्नेहाभ्यङ्गादि वर्जयेत् ॥४०॥

अथ उद्वर्त्तनगुणाः।

उद्वर्त्तनं वातहरं भ्राजकानलदीपनम्।
गात्रस्थिरत्वसुखितात्वक्प्रसादमृदुत्वकृत् ॥४१॥

अथ स्नानगुणाः।

स्नानं वातश्रमस्वेदपामाकण्डूमलापहम्।
हृद्यं कान्तिकरं वह्निसर्वेन्द्रियविबोधनम् ॥४२॥
न तदुष्णं न शिरसो योज्यं नेत्राहितं यतः।
कफवातप्रकोपे तु भेषजार्थं तदाचरेत् ॥४३॥
तच्चातिसारज्वरितकर्णशूलाऽनिलार्त्तिषु।
आध्मानारोचकाजीर्णभुक्तवत्सु च गर्हितम् ॥४४॥

अथानुलेपादिधारणगुणाः।

अनुलेपश्रमामूर्च्छादौर्गन्ध्यश्रमवातजित्।
सौभाग्यतेजस्त्वग्वर्णप्रीत्योजोबलवर्द्धनः ॥४५॥
कौशेयास्वररत्नानां धारणं कान्तिकारकम्।
पापरक्षोग्रहहरं कामदं श्रीविवर्द्धनम् ॥४६॥

रोगकृद् विषजुष्टानां क्षतव्रणविलासिनाम् ॥६६॥
विदाही वातलः श्वासकफशोफवतां हितः ॥६७॥
दक्षिणः पवनः स्वादु रक्तपित्तहरो लघुः ।
अविदाहप्रदो बल्यः चक्षुष्यो न च वातलः ॥६८॥
पश्चिमः पवनो रूक्षस्तीक्ष्णः स्नेहबलापहः ।
विषदः शोषणो नृणां कफमेदोहरो लघुः ॥६९॥
उत्तरो मारुतः शीतः स्निग्धदोषप्रकोपकृत् ।
क्लेदनः प्रकृतिस्थानां बलदो मधुरो मृदुः ॥७०॥
क्षयशोषविषार्त्तानां विशेषाद् गुणकारकः ॥७१॥

अथ मधुररसगुणाः ।

रसो मधुरकः शीतो धातुस्तन्यबलप्रदः ।
चक्षुष्यो वातपित्तघ्नः कुर्य्यात् स्थौल्यकफक्रिमीन् ॥७२॥
सोऽतियुक्तो ज्वरश्वासगलगण्डार्बुदादिकृत् ॥७३॥

अथ अम्लरसगुणाः ।

रसोऽम्लः पाचनो रुच्यः पित्तश्लेष्मकरो लघुः ।
लेखनोष्णो बहिः शीतः क्लेदनः पवनापहः ॥७४॥
सोऽतियुक्तः परं देहे रक्तपित्तादिरोगकृत् ॥७५॥

अथ कटुरसगुणाः ।

कटुकः पित्तलः श्लेष्मक्रिमिकण्डूविषापहः ॥७६॥
आग्नेयो वातलस्तन्यमेदःस्थौल्यहरो गुरुः ।
सोऽतियुक्तो भ्रमक्षोभश्रमतृट्शोषातिदाहदः ॥७७॥

अथ तिक्तरसगुणाः ।

तिक्तः शीतस्तृषामूर्च्छाज्वरपित्तकफान् जयेत् ।
वातलोऽग्निकरः दाहशोषघ्नः शोधनो लघुः ॥७८॥
सोऽतियुक्तः शिरःशूलमन्यास्तम्भभ्रमार्त्तिकृत् ॥७९॥

अथ लवणरसगुणा ।

लवण शोधनो रुच्य पाचन कफपित्तद ।
पुस्त्ववातहर कायशैथिल्यमृदुताकर ॥८०॥
सोऽतियुक्तोऽचिपाकास्रपित्तकोठाचितापक्षत् ॥८१॥

अथ कषायरसगुणा ।

कषायो रोपणो ग्राही शोधणो वातकोपन ।
सोऽतियुक्तो ग्रहाध्मानहृत्पीडाचेपणादिक्षत् ॥८२॥
प्रसन्नदृष्टिर्हृढदन्तकेश शशाङ्कवक्त्र पलितैर्विहीन ।
पिकाभकण्ठ कमलास्यगन्धो तस्योपसेवो भवतीह मर्त्य ॥८३

अथ वमनगुणा ।

कासोपलेपस्वरभेदनिद्रातन्द्रास्यदौर्गन्ध्यविषोपसर्गा ।
कफप्रसेको ग्रहणीप्रदोषा न सन्ति जन्तोर्वमत कदाचित् ॥८४

अथ विरेचनगुणा ।

बुद्ध प्रसाद बलमिन्द्रियाणा धातुस्थिरत्व ज्वलनातिदीप्तिम् ।
चिराच्च पाक वपुष करोति विरेचन सम्यगुपास्यमानम ॥८५॥

वस्तिकर्मादिगुणा ।

वस्तिर्वाते च पित्ते च कफे रक्ते च शस्यते ।
ससग सन्निपाते च वस्तिरेव हित सदा ॥८६॥
वमन श्लेष्मपित्तघ्न विरक्तो रक्तपित्तहा ॥८७॥
वस्तिर्वातहरा ज्ञेया स्वेदे मान्द्ये ऽपकारक ॥८८॥

मूले निषिक्ते हि यथा द्रुम स्यात्
नीलच्छद कोमलपल्लवाग्र ।
काले महत्पुष्पफलप्रदश्च
तथा नर स्यादनुवासनेन ॥८९॥

अथ रक्तमोक्षणगुणा ।

त्वग्दोषा ग्रन्थय शोफा रोगा शोणितसम्भवा ।

कुन्देन्दु स्वच्छकीर्त्तिं परमदलनोद्यानदीर्घ कदन्न ।
यस्याकर्ण्य प्रभूत प्रथितगुणगण कर्णसाफल्यभाजो
दैव निन्दन्ति लोका नयनविफलताखेदमावेदयन्त ॥१०५॥

जननयनसुधांशुस्तस्य शुद्धस्तनूजो
जगति भरणपाले चोणिपालो बभूव।
सकलसकलवाञ्छासिद्धिहेतोर्विधाता
सुरतरुवरचक्रं यत्करच्छद्मनैव ॥१०६॥

हरिश्चन्द्रस्तस्मात् समजनि जनानन्दजननो
हरिश्चन्द्रो लोके परवलपरीतापकरण ।
पर विश्वामित्रे व्यहितमयमाधत्त मतिमान्।
विशिष्टो नैतस्माज्जगति महितोऽन्य सुकृतिन ॥१०७॥

तस्मादभूदङ्गतक्तत्यमान्य साधारणी भूमिपतिर्वदान्य ।
दारिद्र्यमुन्मूल्य पुन स्ववैरिष्वस्थापि काम क्षपयेव येन ॥१०८॥

अजनि सहजपालस्तस्य पूर्वस्तनूज
सकलगुणनिधान शास्त्रधर्मैकवेत्ता।
प्रथितपुरुषरत्न य समालोक्य लोका
बहुविधिषु विधातु कान्तता मन्यते स्म ॥१०९॥

यो राज्ञा मुखतिलक कटारमल्ल
स्तेन श्रीमदनन्तृपेण निर्मितेऽत्र।
ग्रन्थेऽस्मिन् मदनविनोदनाम्नि पूर्णो
वर्गोऽय गुणगणमिश्रमिश्रकोऽयम् ॥११०॥

समाप्तोऽय ग्रन्थ ।

रक्तमोक्षणशीलानां न भवन्ति कदाचन ॥८०॥

अथ ऋतुचर्य्या ।

संहर्षात् कुपिता भवन्ति हि मला वर्षासु वातादयः
क्लिन्नत्वाद् वपुषोऽनले कृशतरे वैद्येन देयं ततः ।
अन्नं दीपनपाचनञ्च मलहृत् क्लेदापहोपाद्रवं
रूक्षं नातिकषायतिक्तकटुकं स्निग्धञ्च किञ्चिद्रसैः ॥८१॥
दिव्यं चौण्ड्रमथाम्बु तत्सशिशिरं सचौद्रमल्पं पिवेत्
गच्छन्त्योषधयो विदाहमधिकं तारुण्ययोगात्तदा ।
व्यायामार्कमरीचिमैथुनसुखावश्यायवर्ज्ज्यं ततः
भूवाष्पाम्बुभुजङ्गदंशमशकैर्वर्ज्ज्ये शयीतालये ॥८४॥
शीतोत्थे मृदुवातवृष्टिजनिते साङ्गारयाने गृहे
निर्वाते चितिपः शयीत मधुरं किञ्चिच्च पीत्वासवम् ।
काश्मीरागुरुलेपभूषिततनुर्यष्टाङ्गनाभिर्व्रजेत्
गुर्वन्नव्यञ्जनावगाहनरतिं स्वापन्दिवा च त्यजेत् ॥८५॥
सेव्याः स्वादुकषायतिक्तविशदा यर्षे त्यजेज्जाङ्गलं
द्राक्षाक्षीरसितेक्षुशालिमधुरा गोधूममुद्गादयः ।
नैर्मल्यादखिलं जलं लघुतरं वासः सचन्दनं
सेवेतेन्दुकरान् प्रदोषसमये गाहेत साब्जं सरः ॥८६॥
वर्षासूपचितं विरेचविधिना पित्तं हरेद् बुद्धिमान्
युक्त्या रक्तविमोक्षणेन हविषस्तिक्तस्य पानं तथा ।
रात्रौ जागरणं व्यवायमधिकं घर्मं तुषारं दधि
क्षाराम्लौष्णविदाहि तीक्ष्णकटुकं निद्रां दिवा च त्यजेत् ॥८७॥
हेमन्ते लवणाम्लतिक्तकटुका क्षारोत्कटं हं स्नं
सर्पिस्तैलसमेतमुष्णमशनं तीक्ष्णानि पानानि च ।
सेवेतागुरुकं पिबेदम्बु शिशिरञ्चाहेत तैलम्बु तः
कौशेयास्तरणे शयीत शयने साङ्गारयाने गृहे ॥८८॥

श्यामापीनपयोधरोरुजघनामाश्लिष्य धन्योऽङ्गनां
वाह्लीकागुरुलेपभूषिततनुं धूपैर्वरैर्धूपिताम्।
कामं मैथुनमद्यतर्पितवपुः सेवेत बल्ये रसैः
कर्तव्यः शिशिरेऽयमेव नितरां शीताधिकत्वाद्विधिः ॥९९॥
तीक्ष्णक्षारकषायरूक्षकटुकं कोष्णं वसन्तेऽशनं
तम्मद्यं मधुसूद्गजाङ्गलयवप्रायं हितं निर्मलम्।
व्यायामं विपिनञ्च कोकिलकलालापाकुलं कामिनो-
स्नानोद्वर्त्तनचन्दनानि नृपतिः सेवेत रम्याः स्रजः ॥१००॥
हेमन्ते निचितः प्रकुप्यति कफो भानोः करैराहत-
स्तस्मात् तीक्ष्णगिरोविरेकवमनैर्गण्डूषधूपादिभिः।
त प्राप्तो विजयेच्च विश्वजलदक्षाथैरथोष्णाम्बुभिः
शीतस्निग्धगुरुद्रवाम्लमधुरं निद्रां दिवा च त्यजेत् ॥१०१॥
ग्रीष्मे शीतगृहान् सरांसि सरितो वापीर्वनानि स्रजो
हारान् शीतलतालवृन्तपवनान् सेवेत निद्रां दिवा।
वासांस्यच्छलघून्यनुष्णमधुरं चान्नं ससर्पिर्द्रवं
मन्थक्षीररसपानकानि च सितादिग्धानि शीतान्यपि ॥१०२॥
शुभ्रे हर्म्यतले शयीत शयने प्रत्यग्रपुष्पाचिते
वातैश्चन्दनचन्द्रचर्चिततनुः संस्पृश्यमानः सुखैः।
व्यायामं परिशोषिमैथुनरतिं घर्मं तथोष्णं रसा-
नाग्नेयान् परितस्त्यजेन्मतिमतो वैद्यस्य वाक्ये रतः ॥१०३॥

अथ ग्रन्थकृत् परिचयः।

टीकान्वये महति भूमिभुजां विशुद्धे
काकेति नाम नगरं जगति प्रसिद्धम्।
यद्वेधसा विहितमादरतः स्वसृष्टे-
रत्नकूटतातिशयपुञ्जदिदृक्षयेव ॥१०४॥
तत्र श्रीरत्नपालः समजनि जनतानन्दहृन्देककन्दः

कुन्देन्दुः स्वच्छकीर्त्तिः परमदद्लनोद्दानदीर्घैकदक्षः।
यस्याकर्ण्य प्रभूतं प्रथितगुणगणं कर्णसाफल्यभाजो
देवं निन्दन्ति लोका नयनविफलताखेदमावेदयन्तः॥१०५॥
जननयनसुधांशुस्तस्य शूद्रस्तनूजो
जगति भरणपाले चौणिपालो बभूव।
सकलसकलवाञ्छासिद्धिहेतोर्विधाता
सुरतरुवरचक्रं यत्करच्छद्मनैव॥१०६॥
हरिश्चन्द्रस्तस्मात् समजनि जनानन्दजननो
हरिश्चन्द्रो लोके परबलपरीतापकरणः।
परं विश्वामित्रे व्यहितमयमाधत्त मतिमान्।
विशिष्टो नैतस्माज्जगति महितोऽन्यः सुकृतिनः॥१०७॥
तस्मादभूदङ्गतकल्पमान्यः साधारणो भूमिपतिर्वदान्यः।
दारिद्रमुन्मूल्य पुनः स्ववैरिष्वस्यापि कामं क्षपयेव येन॥१०८॥
अजनि सहजपालस्तस्य पूर्वस्तनूजः
सकलगुणनिधानं शास्त्रधर्मैकवेत्ता।
प्रथितपुरुषरत्नं य समालोक्य लोका
बहुविधिषु विधातुः कान्ततां मन्यते स्म॥१०९॥
यो राज्ञां मुखतिलकः कटारमल्ल-
स्तेन श्रीमदनन्तपेण निर्मितेऽत्र।
ग्रन्थे ऽस्मिन् मदनविनोदनाम्नि पूर्णो
वर्गोऽयं गुणगणमिश्रमिश्रकोऽयम्॥११०॥
समाप्तोऽयं ग्रन्थः।